CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# संस्कृत प्रतिभा

# SAMSKRITA PRATIBHA

पञ्चम उन्मेषः
प्रथमो विलासः
१९६५

साहित्य अकादेमी, नवदेहली

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Samskrita Pratibha, a Half-yearly Journal

Editor: Dr. V. Raghavan

*Annual Subscription*: Rs. 4, 14 *s*. or $ 2 (inclusive of postage)

Single copy: Rs. 2 (inclusive of postage)

Send your literary contributions to the Editor

Send your subscriptions and advertisements to the Secretary Sahitya Akademi, Rabindra Bhavan, 35, Ferozeshah Road, New Delhi-1.

Advertisement Rates

| | | |
|---|---|---|
| Inside Full page: | General Rs. 100; | for Books Rs. 50. |
| Inside Half page: | General Rs. 50; | for Books Rs. 25. |
| 3rd Cover: | General Rs. 150; | for Books Rs. 75. |
| 4th Cover: | General Rs. 200; | for Books Rs. 100. |

Mechanical Data
Size: Demy Octavo ($8\frac{1}{2}'' \times 5\frac{1}{2}''$)
Print Area: $7'' \times 4''$
Line Measure: 24-ems

Edited and published by Dr. V. Raghavan for Sahitya Akademi, (35, Feroz Shah Road, New Delhi), at 7, Sri Krishnapuram Street, Royapettah, Madras-14. and printed by N. Ramaratnam at the M.L.J. Press Private Ltd., Madras-4

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# सं स्कृ त प्र ति भा

# SAMSKRITA PRATIBHA

पञ्चम उन्मेषः
प्रथमो विलासः
१९६५

साहित्य अकादेमी, नवदेहली

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संस्कृतप्रतिभा पञ्चम उन्मेषः प्रथमो विलासः
१९६५
साहित्य-अकादेमी, नवदेहली

विषयानुक्रमणिका—

१. सम्पादकीयम्—वे. राघवः

खण्डकाव्यानि—

२. भारतविलापः—चि. द्वा. देशमुखः
३. श्रीनेहरूनिर्याणम्—हरिश्चन्द्रो रेणापुरकरः
४. जवाहरगङ्गालहरी—काशीनाथ रघुनाथ वैशम्पायनः
५. भारतीविषादः—य. महालिङ्गशास्त्री
६. अजाशती—भास्कराचार्य त्रिपाठी
७. गेयाञ्जलिः—बि. आर्. शास्त्री

गद्यबन्धः—

८. संस्कृतसाहित्ये राष्ट्रीयभावना—वे. राघवः—अनु० अशोक अकलूजकरः

रूपकम्—

९. प्रतिज्ञाशान्तनवम्—जग्गू वकुलभूषणः

अनुवादाः—

१०. श्रीरङ्गराजसुप्रभातम्—तोण्डरडिप्पोडि आल्वार् (दिव्यसूरिर्भक्ताङ्घ्रिरेणुः)—अनु० अ. मु. श्रीनिवासाचार्यः
११. भारुण्डगीतानि एकनाथः—अनु० वि. के. छत्रे
१२. श्रीतुकारामगाथाः—अनु० एस्. एल्. तम्बे
१३. परमानन्दानुवादः—अनु० जगन्नाथशास्त्री
१४. श्रीरहीम्-अनुवादः—अनु० ,, ,,
१५. जपा-मालाकारौ—चि. द्वा. देशमुखः
१६. निर्दया देवी—वे. राघवः
१७. शालिगोप्त्री—हरिहर त्रिवेदी

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## निकषोपलः (पुस्तकविमर्शः)—

संस्कृतरत्नाकरः, शारदा, भारती, अमृतलता—एतासां पत्रिकाणां नेहरू-विशिष्टाङ्काः; गुरुकुलपत्रिकाया विष्ण्वङ्कः; भारत्याः आयुर्वेदाङ्कः; संस्कृतरत्नाकरस्य लाल्बहदूर-अङ्कः; नूतनाः पत्रिकाः—अमृतलता, ऋतम्भरा, ऋतम्भरम्, परशुरामीयम्, संवित्; महाजनसंस्कृतकलाशालायाः सुवर्णमहोत्सवदीपिका; जवहरज्योतिः (हिन्दीप्रचारिणी सभा, छिन्द्वाडा); श्रीनेहरू-निर्वाणकुसुमाञ्जलिः (जगन्नाथशास्त्री); श्रीरामदासगीता (रामकृष्णभट्टः); सूर्योदयस्य योगाङ्कः; शुद्धशाङ्करप्रक्रियाभास्करः (श्रीसच्चिदानन्देन्द्रसरस्वती); चतुस्सूत्री (एम्. वि. उपाध्यायः); महाभारते काव्यांशाः (राम करण शर्मा); शतकसप्तकम् (ति. गु. वरदाचार्यः); स्तुतिपुष्पोपहारः (श्रीमहालिङ्गशास्त्री); गणेशपञ्चरत्नादि; श्रीकामाक्षी-नामत्रिंशत् (श्रीलक्ष्मीकान्तशर्मा); जयाशाशारदापञ्चस्तवी (जगन्नाथ रिवू शास्त्री); श्रीसुब्रह्मण्यकर्णामृतम् (श्रीगोपालकृष्णः); सङ्गीतसुधातरङ्गिणी (मधुसूदनदत्तवाजपेयी); नन्दचरितम् भर्तृदानं च (शिरोमणि-सन्निधानं सूर्यनारायण शास्त्री); उत्तिष्ठत जागृत (मुनिश्रीबुद्धमल्लः); चिन्तनाश्च चिदुन्मेषाः (श्री-अरविन्दः) रूपकसमीक्षा; रुद्रैकादशिनी महारुद्रातिरुद्राणां वसोर्धारायाश्च फलश्रुतिः (श्रीसोमसुन्दरदीक्षितः); ब्रह्मर्षिदैवरातः; इन्द्रयज्ञः (ब्रह्मर्षिदैवरातः); सुरभारतीसन्देशः (श्रीवासुदेवद्विवेदी); मिलिन्दमित्रम् (वनमाली भारद्वाजः); द्वैतं काव्यम् (श्रीद्विजेन्द्रलालशर्मा); आदिकाव्योदयम् (य. महालिङ्गशास्त्री); विक्रान्तभारतम् (डा. बि. आर्. शास्त्री); नवमालिका (विश्वेश्वरपाण्डेयः); रणश्रीरङ्गः (श्री. भि. वेलणकरः).

## लेखकपरिचयः

'संस्कृतप्रतिभा'—सम्पादकः (तुरीयावरणपृष्ठे)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## सम्पादकीयम् —

पञ्चमं वर्षमुपेयुषीं संस्कृतप्रतिभामनु तदुद्दिष्टेन पथा नूतनगद्यपद्यदृश्य-निर्माणानि, भाषान्तरानुवादा इति विभज्य विविधविषयमण्डिताः नूतनाः संस्कृतपत्रिकाः बह्व्यः प्रादुर्भूताः प्रहर्षयन्ति मनांसि संस्कृतोज्जीवनाय प्रयतमानानाम् । केन्द्रीयसंस्कृतसमित्या पत्रिकाभ्यो वितीर्यमाणं साह्यमपि मेघोदय इव पत्रिकामयूराणां कलापभारं, नृत्तं, केकारवांश्च समुल्लासयति । स्तोत्रं, महाकाव्यं, खण्डकाव्यं, लघुरूपकम्, ऐतिहासिकः प्रबन्धः इति बहुमुखं नवीनं साहित्यं संस्कृतवाण्यां प्रवहति । सर्वमिदं संस्कृते तत्तच्चिकीर्षूणां विजृम्भितं भाषायाः सौभाग्यस्य संरक्षणाय समृद्धये च स्यात्, यदि शब्दशुद्धिरपि अनेन नूतनसिसृक्षावेगेन अनुपमर्दिता तिष्ठेत् । वाण्या अस्या यल्लक्षणं, यः संस्कारः तत् सत्या इव चारित्रं तस्या जीवभूतम् । शब्दाशुद्धेरपि अधिकतया दृश्यमानोऽपकर्षः वृत्तभङ्गः, ह्रस्वदीर्घत्वाधिर्यं च लेखकानां श्रवसोः । आदीयन्तां नाम भाषान्तरेभ्यः अभिनवानि छंदांसि । यानि सांप्रदायिकानि उपयुज्यन्ते तत्रेयमितोऽप्यधिका जागरूकता प्रार्थ्यते ।

* * *

तिरुप्पतिक्षेत्रे केन्द्रीयसंस्कृतविद्यापीठे द्वितीयस्नातकबिरुदवितरणोत्सवे भाषमाणाः केन्द्रीयशासनविद्याविभागस्य उपमन्त्रिणः श्रीमन्तो भक्तदर्शन-महाशया अवोचन्—'एतद्विद्यापीठकार्यं वा संस्कृतकार्यमन्यद्वा निधिदारिद्र्यहेतुतो नैव कमपि विघ्नमनुभविष्यति । तृतीययोजनायां विभक्तं यद् ७५-लक्षात्मकं धनं संस्कृतार्थं तत्सर्वमुपयोक्ष्यते; समनन्तरायां योजनायां ततोऽपि अधिकं साह्यधनमेतदर्थमुपकल्पयितुं शक्यम्' इति ।

* * *

विद्यापीठेनानेन संस्कृतं समीचीनया प्रक्रियया संप्रति बोधयितुं 'शिक्षा-शास्त्री'-कक्ष्या एकवार्षिकी प्रचाल्यते । अत्रोत्तीर्णाः संस्कृतशिक्षा-शास्त्रिणः कुत्र स्वैरुपलब्धं पाटवं कृतार्थयिष्यन्ति ? कुत्र वा वृत्तिं लभेरन् ? भाषात्रयकण्ठपाशानिबिडिताननाः विसंष्ठुलामवस्थामनुभवामः सर्वत्र । श्रीराम-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कृष्णमठान्विताः स्वामिचिद्भवानन्दमहाशयाः कावेरीतीरे त्रिशिरःपल्लिपरिसर-स्थापिते रामकृष्णतपोवने विद्यास्थानं किमपि गुरुकुलप्रायं प्रचालयन्ति, यत्र संस्कृतायोगः दक्षिणयात्रायामतिथिरभूत् । विद्याविषये चिरपरिचयसम्पन्ना एते 'Aspects of Education' इति किमपि पुस्तकं नचिरात् प्राकाशयन् । अत्र वर्तमानां शिक्षापरिस्थितिं परिशीलयन्त एते लिखन्ति-'क्रमशः संस्कृतभाषा किञ्चित्किञ्चिदपसार्य अन्ततः पाठशालाभ्यः निष्का-सिता इति, इदं कार्यमस्मदीयैरेव कृतमिति च खेदावहोऽयं विषयः । अत्यन्तं स्वादु पोषकं च संस्कृताख्यममृतं यथा प्राचीने काले उपलभ्यं बभूव, तथाद्यापि वर्तत एव ।' इति । केरलेषु 'चङ्गनचेरि'नाम्नि क्षेत्रे भारतसाधुसमाजस्याधिवेशनमभूत् । 'भारतसंस्कृतेः, भारत-ऐक्यस्य च आङ्ग्लेयसाम्राज्यकाले यद् दुर्बलीकरणमापादितं, तत्संस्कृतविद्यापरित्याग-मूलकम् । अधुना तु ततोऽपि भूयसा अनादरः तस्यां भाषायां दरीदृश्यते, विशिष्य केरलेषु, मद्रास्प्रान्ते च, यत्र पूर्वस्मिन् काले इयं भाषा, एतत्साहित्यं, शास्त्राभ्यासश्च सर्वस्मिन्नपि भारते संस्कृतविद्याया जीवातुभूतमवर्तत ।' अतः साधुसमाजाधिवेशनेन मद्रास्-केरल-शासकानां पुरतः पाठशालासु संस्कृत-बोधनावश्यकतां प्रति काचित् विशिष्टा अभ्यर्थना प्रेषिता । केन्द्रीयसंस्कृत-समितिः यदा धनसाह्यार्थं तत्तत्प्रदेशान् प्रादेशिकीः संस्थाश्च विचारयति, तदा समित्या तया अवधेयोऽयं विषयः । यत् न केवलमुपमन्त्र्युक्तेन प्रकारेण योजनायामस्यां निर्दिष्टं धनं सर्वमुपयोक्तव्यं, विभज्य प्रतिसंस्थं दीयमानं धनमपि इतोऽप्यधिकेन औदार्येण देयम्, किन्तु देशे ये प्रान्ता विशेषेण एतद्भाषाविषये दुरवस्थामनुभवन्ति, तत्र पक्षपातोऽधिकः समित्या प्रदर्शनीयः । न च तथा करणे कोऽपि दोषः । यतः शरीरे यद्यङ्गमेकं रुग्णं, भग्नं वा भवति तेन सर्वमेव शरीरं व्यथते, तदङ्गचिकित्सा च सर्वशरीरस्वास्थ्याय कल्पते ।

* * *

ग्रेक्कपुराणे 'सिसैफ़स्' इति कोरिन्त्-भूपतिः श्रूयते । तेन अविश्रान्तं वर्तुला शिला काचिद् पर्वतस्य तिरश्चीनपार्श्वोपरि उल्लुण्ठ्योल्लुण्ठ्य पर्वतशिखराग्रं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नीयते स्म । शिखराग्रं प्राप्य यदा शिलातो हस्तावपनीयेते स्म तत्क्षणमेव उपरि नीता शिलापि लुठन्ती अधः पतति स्म । स चानरवतमस्मिन्नेव व्यायामे व्यग्रो बभूव इति । तादृशी हि वर्तते परिश्रमः संस्कृतोद्धिधूर्षूणाम् ॥

* * *

निखिलामेव सर्वप्रान्तीयां संस्कृतदशामालोडयितुं, केन्द्रीयसमित्या एतावता कालेन य उपकारो वितीर्णः, तस्य फलं कीदृशं, तदुपयोगविषये च प्रतिराज्यं किं किं कष्टं वर्तते इति विचारयितुं देहल्यां केन्द्रीयसमित्याः सम्मेलनं किमपि संघटितम्, यत्र तत्तत्प्रान्तीयशासने संस्कृतपर्यवेक्षकाः संस्कृतशिक्षाप्रतिनिधिभूताश्च सर्वे उपस्थिताः । विद्यामन्त्रिणां छाग्लामहोदयानां प्रस्तावनोक्तया उपक्रान्तं संमेलनस्य कार्यम् । तेऽवदन्- 'प्राचीन-अधुनातनकालयोः सन्धानार्थं संकृताभ्यास आवश्यकः । यद्यपि वयं भृशं नवीना बुभूषामः, तथाप्यस्माकं चरणयोः निष्ठा, अस्माकं मूलमपि अस्मदीये क्षेत्र एव भवितुमर्हति । प्रान्तीय-मातृ-भाषया संमिश्र्य भाषात्रय-सूत्रे संस्कृतमपि प्रवेशयितुं शक्यते ।' इति । उपमन्त्रिभिर्भक्तदर्शनैरपि संस्कृताध्ययने प्राचीन-नवीनपद्धत्योः सामरस्यम्, पण्डितानामद्यतनीयकला-शालासु विश्वविद्यालयेषु विमर्शसंस्थासु च नियोगः, संस्कृतपरीक्षाणां तदितरनवीनपरीक्षाभिस्सह समता, संस्कृतपण्डितानां वेतनस्य उन्नतिः इत्यादिकाः प्रश्नाः समाहिताः स्वकीयोपक्रमभाषणे । विषयानेतानधिकृत्य सम्मेलनेन केचन निर्णयाः सर्वसम्मततया अभ्युपगताः । निर्णयेषु मुख्यतममिदं यद् भाषात्रययोजने प्रान्तीय-मातृ-भाषाकोट्यां समवेततया संस्कृतस्यापि योजनम् (Composite Course) । अन्यो निर्णयः - संस्कृताभिवृद्धये यदि प्रान्तीयशासनानि केन्द्रीयसाह्यमपेक्षेरन्, तादृशस्य साह्यस्य शते पञ्चाशदिति विधया वितरणम् । मद्रास्-प्रान्ते संस्कृतशिक्षायाः, तथा महाराष्ट्र-प्रान्ते प्राचीनपद्धत्याश्च निरवकाशता या वरीवर्ति तद्विषये केन्द्रीयसमित्या तत्प्रदेश-शासनयोर्निकटे समुचितं बोधनं कार्यमिति च निर्णयान्तरं स्वीकृतम् ।

* * *

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सर्वोऽपि प्रदेशः 'पालिटिक्स्'नाम्ना झञ्झावातेन दोधूयमानः, सर्वोऽपि व्यवहारः स्थैर्यविधुरः, नित्यचलः बौद्धानुभव इव कमपि सन्तानाभासमनुबध्नन् कथञ्चित् प्रवहति । अस्यामवस्थायां का वार्ता विद्यायाः, विशिष्य तपस्विन्याः संस्कृतविद्यायाः ? अस्ति द्राविड्यामाभाणकः 'आषाढवाल्यायां शिलापेषण्येव डयते, का गतिः शाल्मलितूलस्य ?' इति । एवं हि वर्तते सर्वः सांस्कृतिको विषयः । नूतनः कोऽपि शिक्षायोगः सर्वंकषविचारार्थमधिकृतः । उत्तरापथे तत्तत्प्रान्ते तृतीयभाषास्थाने संस्कृतमेतावत्पर्यन्तं पाठितमभूत्; तत्र 'तृतीयभाषा नाम प्रान्तीयव्यवहारभाषा, न संस्कृतं, पर्सियन्, अराबिक् इत्यादि' इति टीका नूतनतया दत्ता प्रान्तीयप्रधानमन्त्रिसंमेलनेन ! यदि संस्कृतस्य स्थानमितोऽपि पापीयो न क्रियेत, तदा सर्वे वयं धन्या भवेम । वयं तु अश्लथश्रद्धं संस्कृतगोपाः व्यवस्यन्त एव स्याम । कर्मण्येवाधिकारो नः । न हि कल्याणकृत् कश्चिद्दुर्गतिं जातु गच्छति ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## भारतविलापः

चि. द्वा. देशमुखः

विधिना विषमेण वञ्चिता वयमस्मिन्नुचितोत्सवे दिने ।
जनुषोऽगतपञ्चसप्ततौ सहसा नोऽपहृतो जवाहरः ॥ १ ॥

छविमन्नवलेखपुस्तकैरभिनन्द्योऽभव इष्टबान्धवैः ।
जनुषा महितेऽहनि त्वया स्रगियं हन्त परेतवन्दना ॥ २ ॥

करयोस्तव संस्तवाञ्जलिं विनिधाय 'स्मर नः सहोदरान्' ।
इति सप्रणयं विवक्षवो वयमद्य स्मृतिजीविनस्तव ॥ ३ ॥

सुमनाः सुमनोभिरादृतः स्मृतिपुष्पैरधुना समर्च्यसे ।
इह वा द्यवि वामरद्युतिर्ध्रुववद्भारतरत्न राजसे ॥ ४ ॥

इह तु त्वदपायविक्लवा युववृद्धाः पुरुषाबलार्भकाः ।
पथिका इव लुप्तदीपिका निशि योग्याध्वनि जातसम्भ्रमाः ॥ ५ ॥

ज्वलति स्मृतिदीपिका पुनर्गुणजातं मनसि प्रकाश्य ते ।
चरितं स्थिरचक्षुषोऽग्रतो मनसश्चित्रपटाभमञ्चति ॥ ६ ॥

इतरैः समसन्धिसंगरः स्वजनैः साधितयोजनावलिः ।
स्वभुवो निजतन्त्रताप्रभुर्जगतः शान्तिपथाग्रतःसरः ॥ ७ ॥

सुजनः सुहृदग्रणीः सुधीर्जनबन्धुः शिशुवल्लभः सखा ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न नो हृतम् ॥ ८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# श्रीनेहरूनिर्याणम्

## हरिश्चन्द्रो रेणापुरकरः

यावज्जीवं भरतविषयं सेवमानो महात्मा
यावच्छ्वासं निरतिशयितं विश्वशान्त्यै प्रयस्यन् ।
आस्वातन्त्र्यात्परमसचिवो भारतस्याद्वितीयः
कष्टं ! कष्टं ! दिवमुपगतः श्रीजवाहारलालः ॥ १ ॥

श्रीमत्पुत्रो विभवसहितः श्रेष्ठवंशेऽपि जातः
विद्याचुञ्चुर्निपुणविधिवित्सर्वमान्योऽपि धीमान् ।
कृत्स्नान् लोभान् मनुजसुलभान् संत्यजन् राष्ट्रहेतोः
हा धिक् हा धिक् ! दिवमुपगतः श्रीजवाहारलालः ॥ २ ॥

आत्माधीनां भरतधरणिं येन वीरेण कर्तुं
कारावासः कठिनकठिनो नैकवारं विसोढः ।
सर्वस्वानां वलिरुपहृतः स्थण्डिले मातृभूम्याः
सोऽयं हा धिक् ! दिवमुपगतः श्रीजवाहारलालः ॥ ३ ॥

दारिद्र्यात्यो कवलितजनान् वासहीनाननाथान्
बोधाभावव्यथितमखिलं युद्धमग्नं च विश्वम् ।
यत्नैर्दीर्घैरविरतकृतैर्मोक्षियिष्यन् महात्मा
कष्टं ! कष्टं ! दिवमुपगतः श्रीजवाहारलालः ॥ ४ ॥

रावीतीरे परिषदि भवन् क्रान्तिकारी प्रधानः
लक्ष्यं चक्रे भरतभुवि नः पूर्णमेव स्वराज्यम् ।
कालाद्दीर्घाद्दलितजनतामुद्धरन् दास्यपङ्कात्
कष्टं ! कष्टं ! दिवमुपगतः श्रीजवाहारलालः ॥ ५ ॥

बांडुंगाख्ये विदितनगरे संगतायां सभायां
भूपालानां युगपरिणतिं लोकपीडाकराणाम् ।
कल्पादिं च व्यथितजगतो घोषयन्मुक्तकण्ठं
हा धिक् ! हा धिक् ! दिवमुपगतः श्रीजवाहारलालः ॥ ६ ॥



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीमद्गान्धेः प्रियतमभटः शिष्यभावोपपन्नः
यस्मादासीत्परमसुभगो विश्ववन्द्यस्य मुख्यः ।
सत्याहिंसाप्रशमकरुणाः साधनानां शुचित्वं
तत्सत्तत्त्वं विमलधवलं नित्यमेवाचचार ॥ ७ ॥

अण्वस्त्राणां प्रतिभयरणज्वालमालाज्वलिष्यद्
भूयोभूयो बत जगदिदं त्रायमाणः प्रणाशात् ।
दोलारूढं जगदुपशमं स्थापयन् गाढपीठे
कष्टं! कष्टं! दिवमुपगतः श्रीजवाहारलालः ॥ ८ ॥

रूसाम्रीकाजनपदयुगाभ्यन्तरे वर्धमानं
वैरं घोरं प्रलयपिशुनं युक्तियुक्तं निरस्य ।
विश्वं रक्षन् कुशलतमया राजनीत्या स धीमान्
स्वर्गं प्रायादहह ! सहसा श्रीजवाहारलालः ॥ ९ ॥

आर्यावर्तं त्रिभुवनगुरुं रूढिपङ्के निमग्नं
भाषाजात्यादिकसमलघुक्षुद्रवादेऽवगाढम् ।
उद्धृत्यायं प्रथमसरणौ स्थापयिष्यन् महात्मा
स्वर्गं प्रायादहह! सहसा श्रीजवाहारलालः ॥ १० ॥

भाक्रादामोदरसममहाह्लादिनीसेतुबन्धैः
विद्युच्छक्तिप्रजननपरैर्योजनानां शतैश्च ।
कायाकल्पं भरतविषयस्यात्मनः संविधाता
स्वर्गं प्रायादहह! सहसा श्रीजवाहारलालः ॥ ११ ॥

दक्षः शिल्पी प्रगतबलवद्भारतस्याभिगीतः
सन्निर्माता भुवनविदितग्रन्थराजत्रयाणाम् ।
निःसंगाया निपुणनयविद्राष्ट्रनीतेर्विधाता
हा धिक् ! हा धिक् ! दिवमुपगतः श्रीजवाहारलालः ॥ १२ ॥

आफ्रेश्यान्तर्गतजनपदैः सादरं सेव्यमानां
विश्वक्षेमावहनचतुरा संघमुक्ता तटस्था ।
नीतिर्देशान्तरविषयिणी कल्पिता येन भव्या
सोऽयं हा धिक् ! दिवमुपगतः श्रीजवाहारलालः ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नन्दादीपो विधुरजगतो विश्वशान्त्यग्रदूतः
कारुण्यानां विपुलजलधिर्मानदण्डो नराणाम् ।
मानुष्यस्य प्रतिकृतिरयं शीलसौजन्यमूर्तिः
स्वर्गं प्रायादहह ! सहसा श्रीजवाहारलालः ॥ १४ ॥

दीपस्तम्भो जगति महतो लोकराज्यस्य भास्वान्
आशातन्तुर्दलितजगतः पञ्चशीलप्रणेता ।
पोताध्यक्षः कुशलतमधीर्लोकतन्त्राब्धियाने
हा धिक् ! हा धिक् ! दिवमुपगतः श्रीजवाहारलालः ॥ १५ ॥

हा ! हा ! मग्ना विधुरजगती शोकसिन्धावगाधे
नूनं व्याप्तं त्रिभुवननभोमण्डलं कृष्णमेघैः ।
छन्नाऽभूद्भूर्निबिडतमसा विश्वशान्तिर्विनाथा
तस्मिन् याते भुवनदयिते श्रीजवाहारभानौ ॥ १६ ॥

स्वाधीनत्वं खलु गतधवं प्राणहीनानुकम्पा
निष्कापट्यं सखिविरहितं पञ्चशीलं विमित्रम् ।
मानुष्यं सत्प्रणयिरहितं बन्धुभावो दरिद्रः
स्वर्गं याते भुवनदयिते श्रीजवाहारबन्धौ ॥ १७ ॥

राजर्षीणां जनकसदृशां वीतरागावतारो
येसू-गान्धी-सुगतमहतां स्नेहकारुण्यसारः ।
साक्षाद्रामो भुवनतिलको लोकहर्षाभिरामः
स्वर्गं प्रायादहह ! सहसा श्रीजवाहारलालः ॥ १८ ॥

यावद्भानुर्विपुलगगने भाति सेन्दुस्सतारो
यावद्भूमौ गिरिवरसरित्सागराश्चैव सन्ति ।
यावद्राष्ट्रं भवति भुवने भारतीयं विशालं
तावत्स्थास्यत्यजरममरं श्रीजवाहारनाम ॥ १९ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# जवाहरगङ्गालहरी

काशीनाथ रघुनाथ वैशम्पायनः

पवित्रेयं गङ्गा मम हृदयसङ्गा सुखमयी
त्रिवेणीतीर्थेऽसौ प्रवहति सदाखण्डितगतिः
मया वारंवारं सुखदसहवासः सुविहितः
जनन्यां गङ्गायामनुदिनमहं स्नेहभरितः ॥ १ ॥

ऋतूनां वैचित्र्यादभिनवदशां धारयति सा
तथाभूता गङ्गा वितरति च मे दर्शनसुखम् ।
प्रवाहाद् गङ्गायाः प्रभवति च संगीतमतुलं
स्वदेशस्य स्नेहं गतविभवतां श्रावयति माम् ॥ २ ॥

कृतः स्नेहः प्रायः सुरसरिति भो भारतजनैः
मुखं तेषां गङ्गा स्मरति करुणापूर्णमनसा ।
इयं गङ्गामाता जनविजयगीतं श्रुतवती
श्रुता दास्योद्भूता कटुतरकथा शान्तमनसा ॥ ३ ॥

स्वदेशस्यासीद्या सुखदविमला संस्कृतिरहो
प्रतीकं गङ्गेयं बत मनसि मन्येऽहममलम् ।
प्रवाहे चाञ्चल्यं सततमनिरुद्धप्रवहणं
दिशन्ती सातत्यं तदपि हि महाश्चर्यजनकम् ॥ ४ ॥

मया दृष्टा गङ्गा झटिति सकलं स्मारितवती
हिमाद्रेरौन्नत्यं शिखरविभवं चुम्बति नभः ।
गुहाः पातालज्ञाः प्रथितहिमशैलस्य रुचिराः
हिमाद्रेरासन्ना चिरपरिचिता भूर्मम सदा ॥ ५ ॥

---

१. नेहरूमहाशयैरन्तिमे मृतिलेखे गङ्गामधिकृत्य या स्वीया भावना आविष्कृता तां विषयीकुर्वन्तीमे श्लोकाः । शैल्यां मनाक् पण्डितरायजगन्नाथयिं ङ्ग ालहरीमनुकुर्वन्ति च ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शिवं गङ्गारूपं किमपि मधु हृद्यं च विविधं
सुखानन्दोत्थं मे नयनसलिलं च प्रवहति ।
विलोक्याहं गङ्गां सचकितमनाश्चास्मि विवशः
मनो गङ्गालीनं भ्रमति च परित्यज्य सकलम् ॥ ६ ॥

यदा सूर्यालोकः प्रसरति जगन्मङ्गलकरः
तदा गङ्गामाता हसति कुरुते नर्तनमपि ।
यदा संध्याच्छाया सकलभुवनं व्यापयति सा
तदोदासीनेयं भवति हि सचिन्ता चिरमहो ॥ ७ ॥

समायातो यावच्छिशिरऋतुरारामसहितः
स्वरूपं गङ्गेयं विघटयति संकोचयति च ।
यदा वर्षाकालः प्रभवति तदा गर्जति भृशं
सुभव्यं सद्रूपं जगति जलधेर्दर्शयति नु ॥ ८ ॥

जलोर्मीणां नृत्यं भयकरमहो सागरजले
विनाशो नौकानां भवति भयदस्ताण्डवविधिः ।
तथैवेयं गङ्गा भवति ननु पर्जन्यसमये
पयोधेरर्धांगीपदमहह सार्थं प्रदिशति ॥ ९ ॥

पुरारूढो देशो जगति हि महैश्वर्यपदवीं
महासंघर्षं योऽनुभवति दिनप्राप्तमधुना ।
महोत्कर्षो भावी जनगणसुयत्नेन भविता
त्रिकालज्ञा सेयं जनविभवदात्री सुरनदी ॥ १० ॥

न धर्मान्धश्रद्धा स्तवनविषये प्रेरयति मां
कृतज्ञोऽहं गङ्गासदुपकृतिराकर्षयति माम् ।
विसृज्यात्मा देहं मम बत ! विनिर्गच्छति यदा
तदा गङ्गायां मे विसृजतु चिताभस्म सुजनः ॥ ११ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# भारतीविषादः

य. महालिङ्गशास्त्री

(पूर्वतोऽनुवृत्तः)

दिष्ट्या तमोभरचिरावरणं विभिद्य
विश्लेषयत्यहह संप्लव एष भासाम् ।
दिष्ट्या दिवश्च सुमनांस्यभितश्च्यवन्ते
वाताङ्कुराः प्रतिनवाः सुखयन्ति गात्रम् ॥ ९६ ॥

वादित्रनिस्वन इव श्रुतिमभ्युपैति
दूराद्दिवो मधुरगीतिरवानुविद्धः ।
अम्बा विबुद्धयत इव प्रचलाङ्गयष्टिः
मय्येव मन्थरमुदञ्चयतीव दृष्टिम् ॥ ९७ ॥

चेतः प्रसीदति समुच्छ्वसितीव गात्रं
चक्षुर्मयः श्रुतिमयः सहसाऽस्मि जातः ।
अप्यक्षराणि जननीवदनेरितानि
मां ह्लादयेयुरिति सङ्क्षु कृतप्रतीक्षः ॥ ९८ ॥

उत्तिष्ठ वत्स परितुष्टिरहो ममाभूद्
दुष्टे कलौ न सुलभा यदियं विनीतिः ।
कल्याणतातिरभवन्मतिरीदृशी य-
त्तत्ते प्रशास्यमधुना किल नान्यदस्ति ॥ ९९ ॥

दीर्घाभिभाषणविधौ परवत्यभूवं
कालेन तन्नियमने परवत्यथास्मि ।
पादानतेन भवता मनसः शुचा च
यज्जृम्भते हृदयवह्निरिवाप्तदर्शम् ॥ १०० ॥

यस्यास्त्रिलोकपरिपावनकौमुदीषु
पाश्चात्यिकीं भुवमदीपयदंशुरेकः ।
या काव्यशास्त्रगणितौषधितत्त्वमुख्या
विद्या दधार गणयाद्य दशां ममेमाम् ॥ १०१ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आबालगोपललनावणिगन्त्यवर्ण-
विद्वत्कुलं भरतखण्डसमादृतायाः ।
नित्यं स्तुतिप्रवणदेवगणावृताया
रम्याणि तानि हि दिनानि गतानि वत्स ॥ १०२ ॥

सर्वागमाश्रयसमुन्नतभद्रपीठे
जिह्वापुटे समभवं द्रुहिणस्य पूर्वम् ।
अन्यूनवैभवमवात्सममर्त्यलोके
कालं महान्तमुदितोदितवीचिलीलम् ॥ १०३ ॥

वेधाः कदाचिदथ मानुषमुन्निनीषु-
र्लोकं विषण्णमृषिपुङ्गवमेव पात्रम् ।
मत्सन्निधानविधये विदधे धरित्र्यां
काव्यागमः प्रववृते यदुपज्ञमेव ॥ १०४ ॥

आर्योपभुक्तपरमर्द्धिममूं तवाम्बा-[1]
मासाद्य तत्र सुभगां सदृशीं सखीं मे ।
दिग्यौवतश्रुतिवतंसितकीर्तिपुष्प-
मारादवर्धयमशेषमपत्यमस्याः ॥ १०५ ॥

तत्रावयोरपि परस्परभावगम्या
संश्लिष्टयोरुपचितोभयभूरिशोभा ।
तन्त्रीस्वरानुगतमञ्जुलकण्ठगीति-
साधारणी समुदभूदभिरूपमैत्री ॥ १०६ ॥

अव्याहताज्ञमनुशिष्टसमस्तलोका
स्वारब्धपूतयजनां विविधोत्सवाढ्याम् ।
धात्रीमपालयमिमामखिलैर्विनम्रा
धर्माभिधं शकटमध्वनि वर्तयन्ती ॥ १०७ ॥

---

१. भारतभूमिम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दृष्टैः श्रुतैर्विरचितैर्मुनयः पुराणाः
वाङ्मण्डलैस्त्रिभुवनाभ्युदयैकदीक्षैः ।
भूयो मदंशकलिताः कवयोऽपि काव्यैः
कालक्रमाद्ववृधिरे जगतां विभूत्यै ॥ १०८ ॥

आसन् पुरा ह्युदयनार्यकचन्द्रगुप्ता-
स्ते बिन्दुसारसहिताश्च सपुष्यमित्राः ।
श्रीविक्रमार्कशतवाहनसूनुहर्ष-
भोजादिकाः क्षितिभुजो निरता मदर्थे ॥ १०९ ॥

यन्मे महत्त्वमथ यो विभवः प्रभावो
यस्ते न किं व्यथयति क्वचन स्मृतोऽपि ।
कालः करालवदनः कमिवोत्ससर्ज
दंष्ट्रावलीकुटिलयन्त्रभयाच्चिराय ॥ ११० ॥

यावद्व्यवस्थितमभून्नयवर्त्म लोके
यावद्धरा सुविमलांस्तनयानसूत ।
तावत्त्वधृष्यमहिमाऽऽसमतस्तदन्ते
व्यत्यस्तमेव भुवनं यवनैरकारि ॥ १११ ॥

सीमातिलङ्घिदृढमौर्ख्यदशापरीतै-
रावेशरुद्धमुषिताखिलदेवपस्त्यैः[1] ।
तैर्व्याप्तमर्दितविपन्नमशेषमार्या-
वर्तं विहाय समधावमगस्त्यकाष्ठाम् ॥ ११२ ॥

दग्धा क्वचित्क्वचिदपि व्रणिता तुरुष्कैः
शुष्कैर्वपुष्यहमटन्त्यधितुङ्गभद्रम् ।
अध्वश्रमेण विपिने[2] विवशा व्यलीये
विद्याभिधाजुषि[2] विमर्दभयेन भूयः ॥ ११३ ॥

---

१. पस्त्यं गृहम् । २. 'विद्यारण्ये' इत्यर्थः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उत्पातमुत्कटमिमं करुणार्णवौ मे
गौरीशशाङ्कमकुटौ तरसा विभाव्य ।
भूयो भुवि व्यतनुतां विपुलाः समन्ता-
दालम्बनाय मम वंशलता द्विजानाम् ॥ ११४ ॥

आमोदिनामविरलं समुदित्वराणां
यास्वन्ववायलतिकासु सुमोत्कराणाम् ।
सर्वः श्रिया परमया परितोऽपि देशः
सौभाग्ययोगमतिदुर्लभमध्युवाह ॥ ११५ ॥

श्रीबुक्कराट्प्रमुखवीरनृसिंहमुख्य-
श्रीकृष्णराजमुखभूपतिभिः क्रमेण ।
दत्ताभयाहमुवसानतिदीर्घकालं
विद्याह्वयेऽथ नगरेऽतिविराजमाना ॥ ११६ ॥

कालः कियानपि ससार स पारगाणां
शास्त्रेषु संकलितनूतनपद्धतीनाम् ।
प्रावृट्कदम्बमुकुलायितवाक्प्रपञ्च-
सञ्चारिणां कवयतामपि यः शुभंयुः ॥ ११७ ॥

युष्मत्कुले यजनकर्मणि वीर्यभाजां
विद्याविनोदरसमेदुरमानसानाम् ।
मध्ये विशुद्धयशसां विदुषां वराणा-
मप्पाध्वरीन्द्र उदभूत् सुगृहीतनामा ॥ ११८ ॥

यः शैवशास्त्रमुददीधरदप्रमेय-
मेधापरास्तपरिपन्थिदुरुक्तिपूराः ।
अद्वैतकल्पतरुमाप्तदिगन्तरेण
चायोजयत्परिमलेन महानुभावः ॥ ११९ ॥

श्रीनीलकण्ठमखिराडथ पाण्ड्यमन्त्री
रेजे स यूथपतिवत् कवितल्लजानाम् ।
मध्ये मदोद्धतमतङ्गजरिङ्खणाना-
मुच्चावचद्रमिडभूपसमेधितानाम् ॥ १२० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एवं विसृत्वरपरार्ध्यबहुप्रमोदा
कुर्वत्यशेषजनताकुशलाय राज्यम् ।
साहं समेत्य सुषमातिशयं ललन्ती
व्यस्मार्षमेव पदवीं मुषितां पुराणीम् ॥ १२१ ॥

धाता न मृष्यति चिराय सुखासिकां यत्
कस्यापि, यावदहमित्थमपेतशङ्का ।
तावन्न्यवर्तत दशा परिभाविनी मे
पाश्चात्यसंहतिसमाक्रमणेन पृथ्व्याः ॥ १२२ ॥

अश्वेतचर्मसु चतुष्पदबुद्धयोऽमी
पाश्चात्यकाः परमतावमतिप्रगल्भाः ।
आचारदूरचरिताः करुणाविहीनाः
भेदे मृधे च निपुणा भुवने प्रसस्रुः ॥ १२३ ॥

कामं भवेत् किमपि सूक्ष्मविदर्शितैषां
सर्वप्रमेयपरिशीलनचुञ्चुता वा ।
अन्तः प्रविश्य निखिलं खिलमाकुलं च
कुर्वन्त्यपेतविनया अवहेलयैव ॥ १२४ ॥

प्रत्नैर्मदर्घमुपलालितमाक्षिपन्ति
दायादभावमपि मे सुचिरात्स्मरन्तः ।
भाषा च सा परममीभिरुपास्यमाना
साम्राज्यलक्ष्म सकलं मदपाजहार ॥ १२५ ॥

आविश्य काममनया बहुधा गृहीतै-
रार्यैः सुतैर्मम तथा विवशैर्वभूवे ।
क्षिप्त्वा यथाश्रुतिपुराणसमेतशास्त्र-
सङ्घातभूतमवटे बहिरभ्यधावम् ॥ १२६ ॥

अन्तर्बहिश्च विकृताः पुरुषाः पुराण-
विद्वेषिणो नवनवैकरसप्रमत्ताः ।
वैदेशिका इव निजावनिमावसन्तः
प्रापुर्दशां सपदि ते प्रतिकारदूराम् ॥ १२७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

धर्मं विपाट्य चिररोपितमर्थकामा-
वत्यूर्जितां स्थितिमवापतुरार्यभूमौ ।
अप्येतयोर्धिगनिवारितदुष्प्रवृत्त्यो-
रुन्मत्तकल्प इह हस्तगतः प्रपञ्चः ॥ १२८ ॥

शास्त्रं मदोद्धतशिरोऽङ्कुशमुग्रमाहु-
रालानशङ्कुमपि शिष्टजनाभ्यनुज्ञाम् ।
यन्तारमास्तिकमतिं तदशेषहानाद्
दुर्निग्रहो बत जनो भुवि बम्भ्रमीति ॥ १२९ ॥

यन्त्रैः प्रसह्य बहुसाधनतां प्रणीतै-
र्मर्त्यः प्रभावमुपलभ्य बहुप्रकारम् ।
दर्पोष्मणा विहरते स यथा यथेच्छं
वष्टभ्य पामरतया ह्रियते तथाऽधः ॥ १३० ॥

हूणैरुपर्युपरि पौरुषमादधानै-
र्भ्राजिष्णुभिर्भुवि तिरस्कृतदैवसाह्यः ।
वित्रासितासु दिविषत्परिषत्सु नृणां
सामान्यतोऽद्य जरतीति मयि प्रतीतिः ॥ १३१ ॥

सा मे सखी च भरतक्षितिरत्युदग्र-
सन्तापकर्शितमतिः प्रलयं प्रवृत्तम् ।
सर्वंसहा गमयति क्षमयैव मत्तो
विश्लेषदुर्गतिमवाप्य विशीर्णसन्धिः ॥ १३२ ॥

निन्दन्ति नूतनधिया परुषीकृता मा-
मार्यब्रुवाः कतिचनान्यकृतोपदेशाः ।
इच्छन्ति तामपि सखीं मम भूषिताङ्गीं
सर्वात्मना प्रतिनवै रचनाविशेषैः ॥ १३३ ॥

केचिन्मृतां चिरमृतां बत कीर्तिकायां
निश्चित्य मां परिचरन्ति विदेशभाषाः ।
प्रायो जनः प्रविततासु मदीयभूमि-
ष्वप्राकृतोक्तिषु निरक्षरकुक्षिरेव ॥ १३४ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मूकानिमान् मम सुतान् बधिरान् महान्धान्
प्रज्ञाप्रकाशविधुराननुपात्तगन्धान् ।
अम्बावचस्सु नितरामरसज्ञधुर्यान्
संश्चिन्त्य शोचति मनो मम निर्विनोदम् ॥ १३५ ॥

अज्ञानिनो भ्रमवशात्कुपथप्रवृत्तान्
अर्धप्रमाणविधिविच्युततारतम्यान् ।
उच्छूनतामयमुदाहरतो महत्त्व-
मेतान् विकीर्य करुणाश्रु निभालयामि ॥ १३६ ॥

विद्वेषवर्षि न सहासिकया विशङ्कं
नित्यं मिथः प्रकटविश्लथभावदुःस्थम् ।
निन्दानिरङ्कुशमुखं मदपाययोगात्
दीदांसते भरतवर्षमदान्तमेतत् ॥ १३७ ॥

अस्मिन्नसाध्यरुजया समये परीते
युक्तं न किं सुभग मे वनविप्रवासः ।
मृत्युर्न मे प्रभवतीति धृतिं गृहाण
कालः प्रतीक्ष्य इह नः कुशलोदयाय ॥ १३८ ॥

अत्रापि मामृषिकुलप्रभवाः कदाचित्
केचित् प्रयत्नकृतपर्यटनाः समेत्य ।
स्वप्रेप्सितानि च यथारुचि भिक्षमाणाः
कालं कियन्तमपि मन्निकटे वसन्ति ॥ १३९ ॥

श्रद्धालवो मयि भवन्ति भुवि प्रकीर्णा
मां संप्रधार्य सुचिरास्तमितस्वरूपाम् ।
आवासितां प्रतिमया मणिमन्दिरेषु
येऽभ्यर्चयन्त्यवहिता महता व्ययेन ॥ १४० ॥

अप्येवमन्तरितमूर्तिरुपासकानां
साऽहं प्रियाणि विविधान्यनुगृह्णतीह ।
वत्स्यामि तात विबुधा यदुपासकानां
भावानुरूपपरिणामभृतः प्रसन्नाः ॥ १४१ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उद्धर्तुमुद्यमवतां सुधियां क्वचिन्मा-
मालम्ब्य साह्यमवनीतिलकायितानाम् ।
आशंसितार्थकुशलं द्रुतमाविरस्तु
ते मत्प्रसादरुचिरं च फलं लभन्ताम् ॥ १४२ ॥

यन्मामकल्यकरणामपि भव्यवार्ता
विश्वस्य वत्स सुकुमारवयास्त्वमेवम् ।
अन्वेष्टुमभ्युपगतामितसाहसोऽसि
भक्त्याऽनयाऽस्मि परितोषपरिप्लुताऽहम् ॥ १४३ ॥

पूतान्वयोऽसि सुकृतैः पुरुभिः पुराणै-
र्जातोऽसि साध्वभिनिवेशनितान्तपूतः ।
मद्दर्शनादथ च पूततरोऽद्य जात-
स्तस्माद्यतस्व रुचिरे पथि भद्रमस्तु ॥ १४४ ॥

हन्तास्फुटीभवति पश्यत एव मूर्ति-
र्देव्यास्तिरोभवति काननभूमिरेव ।
स्वप्नावसानचलपक्ष्मपुटस्य ताव-
ल्लोकः स मे परिचितः पुनरभ्युदेति ॥ १४५ ॥

उद्वेगतापरभसाद्भुतकर्बुरं मे
चेतो न मुञ्चति रसादधुनापि चित्रम् ।
यत्प्रेक्षितं यदनुभूतविनष्टमस्य
संस्कारमादृततया दृभतीव गाढम् ॥ १४६ ॥

आप्यायनानि दलतः श्रुतिसंपुटस्य
प्रोत्तेजनानि हृदयस्य विषीदतश्च ।
दौर्भाग्यसन्ततिसमापनसुव्रतानि
मातः श्रुतानि सुकृत्तात्तव भाषितानि ॥ १४७ ॥

देवास्त्रयोऽपि सबृहस्पतयः स्पृहार्द्रा-
स्तिष्ठन्ति यस्य पथि ते नयनाञ्चलस्य ।
तस्योत्पतत्सरसतुङ्गकृपान्तरङ्गै-
राप्लावितोऽभवमहो रभसादपाङ्गैः ॥ १४८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मातस्त्वदुद्धरणधूर्वहतामुपोढुं
मन्दः कथं त्वरितमल्पतरो यतिष्ये ।
वालाहतैर्झषशिशुर्न रमां पयोधे-
रुत्थापयेदलघुमन्दरमन्थलभ्याम् ॥ १४९ ॥

भावस्थिरं सुमनसो गुणसौरभं ते
जिघ्रन्ति केचिदिह यत्सहसा प्रबुद्धाः ।
मन्ये तदुन्मुखतरः शुभदः स कालः
त्वामञ्जसा समवतारयितुं धरित्र्याम् ॥ १५० ॥

ज्योत्स्नेव पाण्डरघनान्तरिता क्षणार्धं
स्रोतस्वती क्षणमिवाद्रिषु रुद्धमार्गा ।
अभ्रान्तरे तडिदिव क्षणमात्रलीना
पूर्वाधिका पुनरुदेष्यसि शर्मणे नः ॥ १५१ ॥

तेनान्तरायविहताङ्घ्रिरपि त्वदङ्घ्रि-
सेवामृताब्धिनवनीतमिव प्रसादम् ।
आविष्कृतं जननि शीतदृगन्तभङ्ग्या
पाथेयभूतमधिगम्य दिशो विजेष्ये ॥ १५२ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# अजाशती

भास्कराचार्यत्रिपाठी

(पूर्वतोऽनुवृत्ता)

समीक्ष्य संख्यं यदिमौ वितेनतु-
निशम्य च ध्वानमजाऽथ खड्गिनः।
वराहमारं ननु मारयिष्यते
तनुर्ममापीत्यचिचिन्तदातुरा ॥ ६१ ॥

निवेदयन्ती विनयेन खड्गिने
समीपगं पञ्चनखं परन्तु सा।
यदा सकृद् धैर्यमदीधरत्तदा
झटित्यसावप्यपलायतोच्छलन् ॥ ६२ ॥

कियत्यथानेहसि गच्छति क्षुधा
तरक्षुरेको निकषा समागमत्।
शनैश्च सम्बोध्य तमप्युवाच सा
वचो यथापूर्वमजामचर्चिका ॥ ६३ ॥

निशम्य हर्यक्षमजाऽवनं[1] वनं
तदाशु तत्याज भियाऽयमप्यहो।
तदैव चैको न चिरादचीकरद्
गमिं वने व्याघ्रवरोऽतिरंहसा ॥ ६४ ॥

अमूमुपेत्यैव यदाऽकरोदहो
स चित्रकृत्ती रसितं समुच्चकैः।
तदा चकम्पेऽतितरामजातनू-
रुदञ्चदाकृष्णतनूरुहा मुहुः ॥ ६५ ॥

---

१. अवनः रक्षकः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चतुर्दिगाघूर्णितभीषणेक्षणो
यदा व्यसुं सूकरमप्यबोधि सः ।
नदंस्तदा मन्द्रतरं महोद्यमः
समग्रवृत्तान्तमपृच्छदादितः ॥ ६६ ॥

अथावकाशं वचसामवाप्य सा
मुदाऽनृतं सर्वमुदन्तमालपत् ।
न्यवेदयच्चापि यदात्मधाष्ट्र्यतो-
ऽमुनैव सिंहेन हतो वराहकः ॥ ६७ ॥

विलोकयन्कोलकलेबरव्रणान्
हरेः खुराङ्कं च वसुन्धरातले ।
भिया स शार्दूलवरो विकम्पितः
शशाक न स्थातुमपि क्षणं वने ॥ ६८ ॥

पलायिते द्वीपिनि काननान्तरं
बभूव साऽह्नाय निकामनिर्दरा ।
समाप्तकल्पैव यतोऽस्ततारका
तदैक्ष्यत ध्वाङ्क्षरुतैर्विभावरी ॥ ६९ ॥

अथोडुमालाविकलं विहायसं
दिशश्च पूर्वामतिपिञ्जलप्रभाम् ।
विलोक्य कल्ये निजनीडमन्तरा
विनिद्रतामीयुरलं शकुन्तयः ॥ ७० ॥

यथा यथा शीतसमीरणो ववौ
वने गलद्ध्वान्तचये समन्ततः
निजार्भकाणामथ भूरिभाग्यत-
स्तथा तथाऽस्या ववृधे जिजीविषा ॥ ७१ ॥

तदैव लम्बाकृतिरेककेसरी
दरावहारालकराललोचने ।
चतुर्दिगस्यन्नशितव्यकाङ्क्षया
स्मयोद्धतस्तां समया ययावजाम् ॥ ७२ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न रात्रिपर्यन्तमटन्नितस्ततः
कमप्यरण्ये पशुमध्यगादसौ ।
परं प्रभाते दयया विधेरजां
विलोक्य दूरादनदन्मुदोल्बणम् ॥ ७३ ॥

अहो जगर्जैष यदा समुच्चकै-
स्तदाऽखिला वन्यमृगा विदुद्रुवुः ।
प्रकामभीतादिव चातिसत्वरं
वनादुदस्थाद्द्विगुणप्रतिस्वनः ॥ ७४ ॥

तिरस्कृतस्तद्रदरोचिषा विधुः
समाललम्बे पतयालुकोऽचलम् ।
तदुष्णनिःश्वासवशादवादहो
क्षणेन च स्फारतरः समीरणः ॥ ७५ ॥

असृक्छटाचर्चितमाननं वहन्
प्रतप्तकार्त्तस्वरपिङ्गकेसरः ।
बुभुक्षयाऽऽर्त्तोऽपि महाजवोऽजया
करालदंष्ट्रो ददृशे मृगेश्वरः ॥ ७६ ॥

अकम्पतारण्यपतिं तमागतं
विलोक्य सा स्विन्नकलेबराऽऽकुला ।
वनेऽञ्जसाऽऽलोकिषतापि चानया
भिया भ्रमन्त्यः ककुभो भुवा समम् ॥ ७७ ॥

अजामथोपेत्य मरुत्प्लवोऽचिराद्
रुषाऽतिदुष्प्रेक्ष्यपिशङ्गलोचनः ।
नखैरनेकद्विपमारणाचणै-
रियेष तां लोठयितुं धरातले ॥ ७८ ॥

अहो नृशंसो विधिरस्ति निश्चयं
य आनिशं साशमरक्षयन्मुहुः ।
न चोषसि घ्नन्नधुना स लज्जते-
ऽथवा न धूर्त्तिः फलदायिनी चिरात् ! ७९ ॥


CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचिन्तयन्त्येवमजा विचिक्लिशे
बभूवतुस्तन्नयने च साश्रुणी ।
मुमूर्षयातः शिरसा रसास्पृशा
पुरो हरेः सादरतो नताऽभवत् ॥ ८० ॥

नताऽपि पादोदकसन्निभानजा
ददावमुष्मै नयनाम्बुसीकरान् ।
निषिध्यति स्मेव च कायकम्पनै-
र्न यत्प्रवध्या भवतैकलाऽबला ॥ ८१ ॥

अपि क्षुधा व्यात्तमुखो नखायुध-
स्तदा मनाग्विस्मितमानसोऽभवत् ।
त्वमत्र का यापयसि क्षपामिति
स्वयञ्च पप्रच्छ कुतूहलान्वितः ॥ ८२ ॥

पदाञ्चतुर्णां नखरैः खरैरजे
सदा शिरोदारणकर्मदारुणैः ।
यतो मया दद्भिरिवाहता मृगा-
स्ततोऽस्मि पञ्चानन[1]नामविश्रुतः ॥ ८३ ॥

परन्तु तेऽत्यल्पकलेबरे हि मे
पदप्रहारो भवितुं न साम्प्रतम् ।
अतोऽतिपञ्चेन मुखेन केवलं
लतेव तन्वी कबलीकरिष्यसे ॥ ८४ ॥

मदीयनादश्रवणेन वारणाः
विशुष्कदानाम्बुकटा गतश्रियः ।
क्षणं न धैर्यं दधति त्वया पुनः
कथं सुखेनेह विरम्यतेऽजया ॥ ८५ ॥

---

१. पञ्चाननः सिंहः पञ्चाननानि मुखनखररूपाणि यस्येति, अथवा पञ्च विस्तृतम् (पचि विस्तारे) आननं यस्येति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यदोल्वणा सिंहवचःपरम्परा
विषोपमाऽस्याः श्रुतिशष्कुलीमगात् ।
कथञ्चिदेषा त्रुटिताक्षरं तदा
न्यवेदयद् गद्गदकण्ठतो वचः ॥ ८६ ॥

मृगेश भग्नाङ्घ्रिरहं वियोजिता
स्वयूथतोऽत्रैव निशा बभूव च ।
गृहेऽर्भकौघोऽस्ति नितान्तकोमलः
स तत्र रोदित्यहमत्र च म्रिये ॥ ८७ ॥

वसुन्धरायां पुरतो [1]विशङ्कटं
भवान्निजाङ्घ्रेरिममङ्कमीक्षताम् ।
यमेव संश्रित्य निशाऽतिवाहिता
सराजमुद्रं जनमस्ति कुत्र भीः ॥ ८८ ॥

शृगालकोक[2]र्क्षवराहगण्डका-
स्तरक्षुशार्दूलवराश्च रोषतः ।
क्रमादुपाजग्मुरिदं विलोक्य च
स्फुटं भवल्लक्ष्म भिया पलायिताः ॥ ८९ ॥

भवद्दयां मय्यवगत्य चेतसा
स कान्दिशीकत्वमुपेयिवान् [3]किरिः ।
पलायमानोऽपि ससम्भ्रमं भया-
दिहैव तत्याज बत स्वजीवितम् ॥ ९० ॥

भवन्मिषादेव सुरक्षितं वपुः
क्षुधाऽधुना चेद् भवतैव काङ्क्ष्यते ।
न तर्हि किञ्चिद् भयकारणं प्रभो
मुदा भवद्वस्तु भवत्कृतेऽर्प्यते ॥ ९१ ॥

---

१. विशङ्कटः विशालः ।
२. कोकः वृकः ।
३. किरिः सूकरः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इति ब्रुवाणा पुनरप्यजाऽनमन्-
मृतिं ध्रुवामाकलयाञ्चकार च ।
परन्तु तद्दीनवचःप्रभावितो
हरिः सपद्यत्रपतातिमात्रकम् ॥ ९२ ॥

समाबभाषे च शनैरजोत्तमां
यदद्य जाल्मं दयया क्षमस्व माम् ।
मदीयपादाम्बुजचिह्नसेविनी
न नाशयोग्या शरणागताऽसि यत् ॥ ९३ ॥

तवामिषं स्वादु विचिन्त्य जन्तुभि-
र्विना बुभुक्षामपि भोक्तुमीह्यते ।
न चेदिदं तर्हि नु गण्डकादय-
स्तृणाशनास्ते कथमन्यथाऽऽगमन् ॥ ९४ ॥

इयं त्वया या करुणातरङ्गिणी
प्रवाहिता मच्छ्रवणम्पृणाऽधुना ।
तया पुनः क्षुच्छमितेति केसरी
चकार निर्भीतिमजामशेषतः ॥ ९५ ॥

पुनश्च पप्रच्छ यदद्य बस्तिके
किमीहसे सम्प्रति निर्दरं वद ।
तवैव राज्यं निखिलेऽपि कानने
वनेचरास्तेऽनुचराश्च सर्वदा ॥ ९६ ॥

निशम्य सिंहस्य वचोऽचिरादजा
नतेन मूर्ध्ना प्रणनाम तं पुनः ।
ममालयं प्रापय काननेश मा-
मिति स्ववाञ्छां प्रकटीचकार च ॥ ९७ ॥

तदा स कान्तारपतिर्मदच्युतं
द्विपेशमाकारयदादिशच्च तम् ।
निषाद्य सुप्रांशुनि नैजपीठके
झटित्यजां प्रापय तद्गृहानिति ॥ ९८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

हरेः शिरोधार्यवचांसि सादरं
निशम्य तां सङ्कटकातरामजाम् ।
कराग्रनिश्रेणिबलान्निजोपरि
द्विपः समारोप्य ययौ शनैश्शनैः ॥ ९९ ॥

प्रमोदिताच्छागलिका व्यचिन्तयद्
यदद्य मातङ्गशिरोनिषण्णया ।
मया स्वभाग्यादजयापि भूयते
वरिष्ठया जन्तुकदम्बकेऽखिले ॥ १०० ॥

अयं प्रभावो मम धैर्यशेवधे-
रसंशयं यन्निशि रक्षिताऽभवम् ।
वने वृकव्याघ्रतरक्षुभिस्समं
मृगान्तरं वक्तुमलं न मामृते ॥ १०१ ॥

परन्त्वहम्मन्यतयाऽलमेतया
यतो हि हिंस्रा धृतितो न बिभ्यति ।
बलीयसामेव जयो धरातले
बलं विना धैर्यमपि ध्रुवं मुधा ॥ १०२ ॥

बलिष्ठसिंहस्य पदाङ्कमप्यहं
वनेऽवलम्ब्येभशिरस्युपाविशम् ।
अभाययच्चोद्धतहिंस्रकानहो
महाप्रभावो महतां समाश्रयः ॥ १०३ ॥

समुच्चकैश्च द्विरदासने स्थिता
रसालजम्बूप्रभृतीनि कामतः ।
फलानि पक्वानि महीरुहामजा
मुखेन लूत्वा मुदिताऽभ्यवाहरत्[1] ॥ १०४ ॥

---

१. अभ्यवाहरत् अभक्षयत् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदा कलारावमिषाच्छकुन्तयः
प्रसारिभी रम्यकरैश्च भास्करः ।
प्रसूनवर्षैरनिलाश्च शीतलाः
ददुर्मुदा साधुवचांसि पृष्ठतः ॥ १०५ ॥

निशम्य दूरात्करिराजबृंहितं
वराननाद्या बहुघोषवासिनः ।
क एष आयाति गजोपरीत्यलं
व्यलोकयन्नुत्कलिकाभिराकुलाः ॥ १०६ ॥

शशङ्किरे ते यदयं महीपती
रुषा वसानोऽसितमुत्तरीयकम् ।
स्वसिन्धुरेणाध्वनि खेलगामिना
प्रभूतराजस्वकृतेऽभ्युपागतः ॥ १०७ ॥

दीनः कश्चित्तदाहो धरणिपतिभयान्निर्गतो दूरदेशं
संगोप्यात्मानमन्यो निजभवनगतो भार्यया भर्त्स्यते स्म ।
अन्ये त्वामोदिपुष्पाण्यकिरदधिपथं भूपतिस्वागतार्थं
निन्युर्हैयङ्गवीनं बहुकलशभृतश्चोपहारार्थमन्ये ॥ १०८ ॥

गोधूल्यां छागिका मे विजनवनगता नैव जाने क्व नष्टा
गोसर्गे चावनीशो भयमिह जनयन् भाग्यदोषादुपैति ।
दैन्येऽनेकार्त्तियूथो युगपदभिमुखीभूय दुःखं विधत्ते
धिङ्मामित्याविकेऽपि प्ररुदति सहसा प्रापिता तत्र साऽजा ॥ १०९ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## गेयाञ्जलिः—

डा. बि. आर्. शास्त्री

### (१) निद्रे !

(ध्रुवम्) निद्रे! प्रिये! सर्वभद्रे! घनानन्दमुद्रे!
मामितः कुत्रापि देवि! नय सत्वरमिदानीम्
स्पृशसि मृदु मे तनुं सान्त्वयसि जीवितम्
ह्लादयसि मानसं मीलयसि दर्शनम् ।
यामि देशान्तरं यामि देहान्तरम्
यामि लोकान्तरं यामि जन्मान्तरम् ॥ १ ॥

प्रकृतिं प्रपद्येऽद्य विकृतिं निरस्यामि
दुःखानि सर्वाणि मामिदानीं जहति ।
अङ्ग! शोकालयं नाद्रिये जगदिदम्
विहगः कुलायमिव निविशे स्वमालयम् ॥ २ ॥

उदितप्रभे! नारि! सदयमित आयाहि
मन्दमन्दं प्रचल सरभसं गृह्णीष्व ।
परिरभस्वोद्धुरं मा मुञ्च रमणि! माम्
सन्ततं स्वपिमि ते निश्चिन्तमङ्केषु ॥ ३ ॥

### (२) कथमिमं तरामि सागरम् ?

(ध्रुवम्) कथमिमं तरामि सागरम
कर्णधार!
कथमिमं तरामि सागरम

आक्रामति सर्वत इयमभ्रराजिरम्बरम्
तर्जयन्ति मामितः करालिकास्तडिल्लताः ।
हन्त! हन्ति हृदयमदयमेतदशनिगर्जितम्
झञ्झामरुदुरु विरौति कम्पते दिगन्तरम् ॥ १ ॥

फणाटोपफूत्कारैः कल्लोला मां दशन्ति
वेपते विसंष्ठुलं विपद्यते बतोडुपम् ।
नीचैरित उच्चैरत आहन्ये मुहुर्मुहुः
विह्वलामि संकुचामि निवर्तस्व कूलं प्रति ॥ २ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वदसि किंचिदपि न मित्र! हससि मृदुलमयि दयार्द्रे!
धीरमग्रतः प्रयासि मां भ्रातः! कुत्र नयसि ? ।
त्वच्छायायां निविश्य विस्मरेयमात्मानम्
त्वं हि नाथ! गतिरसि मे नय मां पारावारम् ॥ ३ ॥

## (३) चल वृष ! चल वृष !

(ध्रुवम्) चल वृष! चल वृष![1] चल वीरेश![2]
हर! सर! नय! वह! चल! धर्मेश![3]

चक्रं परिभ्रमति नेमिः शनैर्नदति
किङ्किणी निःस्वनति वैजयन्ती स्फुरति ।
हृष्टोऽसि वीरेश! तुष्टोऽसि धर्मेश!
प्रसरति प्रवहणं प्रस्थिता वयमहो! ॥ १ ॥

नीलगगनं भाति मन्दपवनो वाति
गोकुलं वनमेति सरसि हस्ती स्नाति ।
शालिगोपी हसति काकी मुहुः कौति
चित्तमुल्लसति मे नायक![4] स्वस्ति ते ॥ २ ॥

निम्नोन्नतं वीक्ष्य मा शुचस् त्वं पान्थ!
पश्य नरजीवितं याति शकटं यथा ।
याहि सततं शनैर् नास्ति दूरं किमपि
त्वय्येव तव गम्यमयि सम्यगीक्षस्व ॥ ३ ॥

## (४) दृष्टोऽसि हन्त परमेश !

(ध्रुवम्) दृष्टोऽसि हन्त परमेश ! दृष्टोऽसि
दृष्टोऽसि यो मया देव ! दृष्टोऽसि
मां ह्लादयसि मेघमालिकाञ्चलगूढलीलाविलासवपुषा
मां हरसि निष्पतन्निर्झरीरङ्गत्तरङ्गकलगीतकलया ।
मां हससि मल्लिकामालिकाललितकलकललोलसुस्मितरुचा
मां क्षिपसि सन्ध्याम्बराङ्गणारुणरोचिरादीपितोज्ज्वलदृशा ॥ १ ॥

---

१. शकटस्वामी शकटं चालयति । २, ३. बलीवर्दयोर्नामनी । ४. पान्थ!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एक एवाग्निराभाति सर्वत्र नानाविधव्यक्तिमहिमा
एक एवादित्य इममखिलमुच्चावचं लोकमादीपयति ।
एकैव नवनवोन्मेषशोभाप्रभासम्पदा दीव्यत्युषा
एक एवासि बहु भवसि धाम्ना भूरि भासि चेतसि मे विभो ॥ २ ॥

## (५) वर्तमानमेव मेऽस्तु

(ध्रुवम्) वर्तमानमेव मेऽस्तु
रामणीयकप्रदम्

विस्मरामि हृदयभिदुरमुत्कटेक्षणं गतम्
न स्मरामि संतमसाच्छन्नमिदमनागतम् ।
मुष्णीतो मम चेतो भूतमिदं तद् भव्यम्
द्वन्द्वमेतदाकुलयति शान्तिरेति मां हि कथम् ॥ १ ॥

याहि पलायस्व धाव भूत ! महादुःखजात !
त्वं तदात्व ! भद्रमेधि सर्वथास्मि तदा सुखी ।
स्वप्नविभ्रमैः कथं नु तुदसि मां किलायते !
मामुपेहि वर्तमान ! सान्त्वयाशु मे स्वान्तम् ॥ २ ॥

एतावन्तं कालं तव सौहृदमजानता
अवमतोऽसि नादृतोऽसि सर्वदा मया प्रभो !
व्याहरामि तुभ्यमिदं स्वागतं क्षमस्व मित्र !
त्वामुपैमि भवद्देव ! देशिकोऽसि स त्वं मे ॥ ३ ॥

## (६) कविते !

(ध्रुवम्) उपसर मां कमनीये कविते !

आविश मां रमणीये कविते !

तिष्ठ मे पुरतः स्मितेन मामनुगृह्य
कुरु सरसमरसमिदमाविलं जीवितम् ।
जन्म मे सफलं भवेदिदानीं देवि !
भव ममालम्बनं मामव निरन्तरम् ॥ १ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

व्योमगङ्गातरङ्गौघेषु विहरामि
स्वार्थैकपरदुर्मदान्धवृजिनं हन्मि ।
दलितपादाहतत्रस्ताननुनयामि
अन्धविश्वासदन्द्रम्यमाणान् पामि ॥ २ ॥

गर्जामि सरभसं दश दिशः पूरयन्
उच्छ्वसिमि वल्लकीहृदयङ्गमक्वणे ।
दीव्यामि कल्यकमनीयकर्बुरवियति
हृष्यामि नवनवोन्मेषविस्फूर्जिते ॥ ३ ॥

मधुमत्तमां वाचमीरयसि मानसे
एकाकिनं व्याकुलं भजसि जनमिमम् ।
अन्तःकरणमये रञ्जयसि सौहृदात्
श्रान्तमध्वगमिमं सान्त्वयसि सुन्दरि! ॥ ४ ॥

(७) वाचांपतये नमः

(ध्रुवम्) वाचांपतये विश्वसृजे नमः
रससिद्धाय कवये ते नमः

नीले गगने मेघो भूत्वा
जगदाकलयसि विचरन् स्वैरम् ।
सागरतुङ्गतरङ्गैः खेलसि
मधुरं कूजसि परभृतकण्ठे ॥ १ ॥

(ध्रुवम्) वाचां निधये विश्वसृजे नमः
रससिद्धाय कवये ते नमः

दृष्ट्वा दुःखं जगतः खिद्यसे
समेत्य दीनं मुञ्चस्यस्रम् ।
स्मृत्वा लोकामङ्गलकारान्
ज्वलसि समुद्दीपितपावक इव ॥ २ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ध्रु. वाचां प्रभवे विश्वसृजे नमः
रससिद्धाय कवये ते नमः

उन्मीलयसि प्रतिभाचक्षुः
दिवमाक्रामसि उडुभिर्विहरसि ।
तिमिरमपास्यसि चेतः प्रविशसि
भासयसीदं विश्वं चिदचित् ॥ ३ ॥

ध्रु. वाचामीशे विश्वसृजे नमः
रससिद्धाय कवये ते नमः

द्रष्टुं प्रभुरसि बोधसि निखिलम्
सत्यं विमृशसि पश्यसि तत्त्वम् ।
वाचमतीतमखण्डमनन्तम्
स्वान्ते विन्दसि परमानन्दम् ॥ ४ ॥

(८) उदेति हृदये

(ध्रुवम्) उदेति हृदये मधुरो भावः
स्मये रमे परवशतामेमि

स्वप्ने दृष्टः, न पुनरीक्ष्यसे
विहाय मां प्रिय! कुत्र गतस्त्वम् ?
केयमकरुणा तव दयितां प्रति
अवलोकय मामीदृगवस्थाम् ॥ १ ॥

ध्रु. उदेति हृदये मधुरो रागः
स्मये रमे प्रियवशतामेमि

आयतनयनं सुस्मितवदनम्
मधुरालापं मञ्जुलरूपम् ।
मोहनचरितं जीवितनाथम्
ध्यायामि त्वां सुन्दर! सततम् ॥ २ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ध्रु. उदेति हृदये मधुरं गीतम
स्मये रमे तव वशतामेमि

स्मरसि संगतं स्वप्नमावयोः ?
कथं प्रसीदसि ? कदा द्रक्ष्यसे ?
जीवितमधुना रोचते न मे
वल्लभ! सत्वरमायाहि त्वम् ॥ ३ ॥

## (९) विजयतां स्वतन्त्रभारतम्

(ध्रुवम्) विजयतां स्वतन्त्रभारतम्
लोकेऽस्मिन् विजयतामखण्डभारतम्

शीताचलपूर्वदक्षिणप्रतीच्यवार्धिवप्रवलयवेष्टितम्
ब्रह्मपुत्रसिन्धुजाह्नवीगोदाकावेरीदुग्धलालितम् ।
सर्वकालपल्लवफलसुक्षेत्रारण्यराजितम्
धर्मसत्यदयानिष्ठपौरजानपदमहाचरित्रभूषितम् ॥ १ ॥

वामदेवयाज्ञवल्क्यजनकरामकृष्णार्जुनबुद्धमहावीरपालितम्
ब्रह्मर्षिब्रह्मवादिनीकवीशवाल्मीकिव्यासोक्तानामयामृतम् ।
वेदोपनिषत्समस्तशास्त्रकलाविद्याविद्योतितावनीदिगन्तरं
ज्ञानभक्तिकर्मयोगचतुर्वर्गसुखितसर्वलोकमङ्गलप्रदायकम् ॥ २ ॥

लोकसंग्रहश्रेयोऽभ्युदयपरायणजीवनशक्तिवर्धनम्
ब्रह्मक्षत्रप्रभूतशास्त्रशस्त्रसमाहारशत्रुभीषणम् ।
नरनारायणलीलाक्षेत्ररामणीयकप्रभाविभास्वरम्
पूर्वपुण्यफलसंचयलब्धजन्मभूमिस्वर्गाभिधानकम् ॥ ३ ॥

## (१०) अयमुदेति

(ध्रुवम्) अयमुदेति मन्दमन्दमिन्दुरुदयगिरिशृङ्गात् पश्य! पश्य!
अयमुदेति मन्दमन्दमिन्दुरुदयगिरिशृङ्गात् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(सः) मृदुलहासमधुररोचिरालिप्ताम्बरसरणिः
कौमुदीसुधारसाभिषेकाप्लुतभूवलयः ।
दिवसखिन्नजगदुल्लासोज्जीवनजीवातुः
भासुरविसृमरकरनिकरापास्तघनतमिस्रः ॥ १ ॥

(सा) सिञ्चति हृदि सुरभिशैत्यमपानुदति दुःखतिमिर-
मङ्कुरयति रागकन्दमुत्सुकयति मम चेतः ।
नयने निर्वर्णयतः, रमणीयं रूपमिदम्
स्वान्तं विस्मरति स्वं किं निवेद्यमत्र रमण! ॥ २ ॥

(उभौ) पर्वतेषु निर्दरेषु पादपेषु शाद्वलेषु
निर्झरेषु पल्वलेषु सिकतासु समीरणेषु ।
पल्लवशयनेऽस्मिन् परिधाने कणदाभरणे
ओष्ठे तव हृदये तव विहरति नृत्यति ज्योत्स्ना ॥ ३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# संस्कृतवाङ्मये राष्ट्रीयभावना*

डा० वे. राघवः

ऋग्वेदाथर्ववेदयोः प्रतिबिम्बितः समाजः

न हि ऋग्वेदः केवलम् इन्द्राद्या देवताः स्तौति, किन्तु तत्स्तोत्रद्वारा प्रदर्शयति तत्कालीनस्य समाजस्य चित्रम् । वेदकालीनानामस्मत्पितॄणां यो जीविते समुत्साह आसीत्तमपि समुन्मीलयति, तथा तत्कालीनप्रजानां मनोभावांश्च । अतीव उत्साही कार्यरतश्च अयं जनसमूहः पुष्कलजीविताभिलाषी, राष्ट्रस्य सर्वतोगामिन्याः सम्पन्नतायाः कृते, युद्धेषु विजयाय च वारंवारं प्रार्थयते । अद्यतनराष्ट्रनेतृप्रतिनिधिभूतेव मूर्तिरिन्द्रस्य सूक्तेषूज्जिहीते । 'वीराः पुत्राः प्रजायन्ताम्', 'संग्रामेषु विजयो भूयात्', इति मुहुर्मुहुः देवता उद्दिश्य प्रार्थनानि क्रियन्ते । वर्णयति किल ऋग्वेदस्य षष्ठमण्डलस्थं निखिलं सूक्तं शस्त्रविशेषान्, धनूंषि, शरान्, सूतान्, स्यन्दनान्, अश्वांश्च । युद्धभूमिमवतरन्तं शूरं स्तौति, आह च - "जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तन्वा जय त्वं सखा वर्मणो मदिमा पिपर्तु ॥" इति ।

इतोऽप्यधिकतया लौकिकान् विषयान् परामृशति अथर्ववेदे न केवलं संग्रामशस्त्रादिस्तोत्रपराणि बहूनि सूक्तानि, तथा विजयप्रार्थनानि च दृश्यन्ते, किन्तु शान्तिमयकालोचितानि प्रार्थनानि राष्ट्राभिवर्धकानि, राजविषयकाणि, राष्ट्रसभाविषयकाणि च दृश्यन्ते । दृश्यन्ते च सूक्तानि संवनन-संज्ञान-सांमनस्यपराणि, यान् गुणानधुना सर्वमपि भारतं सर्वात्मना वाञ्छति, येषामावश्यकतां पुरातन एव काले वेद-ऋषयो ददृशुः, ये च बहुषु सूक्तेषु ऋचि, अथर्वणि च गीयन्ते - 'सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।' इति ।

राष्ट्रसभामुद्दिश्य प्रवृत्तं ७. १२ अथर्ववेदीयसूक्तं सभायां निर्विवाद-चर्चार्थं मतैक्यार्थं च प्रार्थयते । सूक्तान्तरमत्रैव (३. ६०) एकं हृदयम्, एकं मनः, संमतिं च प्रार्थयते - 'सहृदयं सांमनस्यमविद्वेषं कृणोमि वः' इति ।

---

* २१. ४. १९६३- 'इलस्ट्रेटेड्वीक्ली-'नाम्न्यां पत्रिकायां प्रकाशितस्य आङ्गलनिबन्धस्यानुवादः । अनुवादकः अशोक अकलूजकरः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वैदिक्यां राजनीत्यां बहवः प्रजातन्त्रनीत्यंशा आसन्, येषु विदथो नाम सभाविशेषः प्रमुख आसीत्। राष्ट्रपालनपराणि, राष्ट्रपालकपराणि, प्रजापराणि, सेनाबलपराणि, राष्ट्राभिवर्धकानि च सूक्तान्युपलभ्यन्ते। अत्र विशिष्योदाहरणार्हे दुन्दुभिपरे द्वे अथर्ववेदीये सूक्ते—

आ क्रन्दय बलमोजो न आ धा अभिष्टन दुरिता बाधमानः।
अप सेध दुन्दुभे दुच्छुनामित इन्द्रस्य मुष्टिरसि वीडयस्व॥ (६. १२६)

सिंह इवास्तानीद् द्रुवयो विबद्धोऽभिक्रन्दन्नृषभो वासितामिव।

* * *

शुचा विध्य हृदयं परेषां हित्वा ग्रामान् प्रच्युता यन्तु शत्रवः॥

* * *

एवा त्वं दुन्दुभेऽमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय।
यथा वृकादजावयो धावन्ति बहु बिभ्यतीः॥ (५. २०; २१)

वेदा न केवलं वीराः प्रजाः प्रार्थयन्त, अपि तु सभाः प्रविश्य उदारया प्ररोचयित्र्या शैल्या भाषितुं समर्थान् यूनश्च प्रार्थयन्त। राष्ट्रीयप्रार्थनात्वेन कैश्चिदाधुनिकैर्विद्वद्भिः समादृतः वेदे नैकत्र दृश्यमानः कश्चन मन्त्र आह—"आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु, फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।" राष्ट्रभक्तिं केवलं भावरूपेणानुदीर्य, राष्ट्रस्य सुस्थितये ये ये विषया अपेक्षिताः कार्यमार्गे—राष्ट्ररक्षार्थमपेक्षितं वीर्यं, राष्ट्रसम्पत्त्यै अपेक्षिता तत्तद्वस्तूत्पत्तिः—ते सर्वे मन्त्रेण गीयन्ते। 'चमक' इति यः प्रसिद्धो भागः, स समाजस्य सर्वतोमुखसम्पत्तिमुद्दिश्य प्रवृत्ता प्रार्थना भवति।

राष्ट्रविषयकः, तथा राष्ट्रगत-नदी-पर्वत-वनादिविषयकश्च प्रेमातिशयः वेदैः परिपोषं नीतः। केनचिन्मन्त्रेण सर्वा नद्यः हूयन्ते (ऋ. १०. ७५. ५): "इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया॥" इति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वेदैरेव भूमिः देवतात्वं नीता

वयं हि आत्मनः पुण्यभूमिम् इमां 'भारतमाता' इति हृदयालये बिम्बवत्पूजयामः। बाङ्किमचन्द्र-सुब्रह्मण्यभारती-महोदयाभ्यां भारतमाता परमा जननी, पराशक्तिरिति महीकृता। माता भूस्सदैवास्माभिः भूमिदेवीति विश्वस्थिति-कर्तुर्हरेः पत्नीति चोपास्यते। सर्वा चेयं भूमेर्देवतात्वभावना वेदमूला। अस्ति अथर्ववेदे अत्युदात्तं पृथिवीसूक्तं, यस्मिन् ऋषिणा पृथिवी गीयते (१२. १)—

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

असंबाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः॥

* * *

सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः॥

ऋग्वेदे दशममण्डलस्थे वागाम्भृणीसूक्ते च स्तूयते वागेव श्रेष्ठा पराशक्तिरिति। सैव सर्वोत्तमा देवता आत्मानम् 'अहं राष्ट्री संगमनी वसूनाम्' इति राष्ट्रदेवतात्वेन वर्णयति।

ब्राह्मणग्रन्थेषु ऐकराष्ट्र्यलक्ष्यम्।

वेदकाले बहवो यज्ञाः प्रावर्तन्त येषु अश्वमेधो मुख्योऽभूत्। एकं राष्ट्र-मेकस्य संराज आधिपत्येऽन्तर्भूतमिति एकराष्ट्रभावना यज्ञैः परिपोषिता। यज्ञानुष्ठानस्य चैतादृशं यल्लक्ष्यं तदद्यापि वाच्यमानेषु आशीर्वादेषु श्रूयते। एव-मैतरेयब्राह्मणे श्रूयते "सांराज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय महाराज्याय आधिपत्याय...।" तैत्तिरीयब्राह्मणे च "महते क्षत्राय महत आधिपत्याय महते जानराज्याय...।" इति। पुराणैः राजर्षीणां चक्रवर्तिनां च कथाभिः एकराष्ट्रभावना जनानां मनसि स्थिरतया स्थापिता। कौटिल्येन च "देशः पृथिवी। तस्यां हिमवत्-समुद्रान्तरम् उदीचीनं योजनसहस्रपरिमाणं तिर्यक् चक्रवर्तिक्षेत्रम्" इति वदता चक्रवर्तित्वप्राप्तिः आहिमाचलमा च दक्षिणोदधि देशस्यास्य एकशासनान्तर्भावश्च राज्ञां लक्ष्यत्वेन दत्तौ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुराणानां बहुविधं साहाय्यम

वेदसंहितानां ब्राह्मणग्रन्थानां च अपेक्षया बहुतरमुपकारं निर्वर्तितवन्तः पुराणग्रन्था एकराष्ट्रभावनाविषये। पुराणलक्षण इदमन्तर्भूतं यद् वर्णनं देशस्य, तन्नदीनां, तत्पर्वतानां, तन्नगराणां, तत्तीर्थानां च। सर्वेषाम् अष्टादश-पुराणानामुपपुराणानां च निखिल एव भारतवर्षो विषय आसीत्; उत्तरस्यां दिशि आहिमालयं दक्षिणस्यां चाकन्याकुमारि भारतमेकीकृत्य ददुर्नः पुराणानि। 'आसेतुहिमाचलम्' इति इदानीं भारतसंज्ञापर्यायभूतः शब्दः यद्यस्माकं हृदयेषु निरूढः सोऽपि पुराणप्रदत्त एव। तीर्थयात्राविजये न कापि वाराणसीयात्रा रामेश्वरदर्शनं विना सफलतां धत्ते इति संसूच्य, प्रतिदिनं पठनीयेषु श्लोकेषु "गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु॥" "महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥" "अयोध्या मधुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः॥" इत्येतान् श्लोकान् समावेश्य च समाहितास्मासु एकभारतवासना। प्रतिकर्मानुष्ठानमुपक्रमे यस्संकल्प उदीर्यते तत्र जम्बूद्वीपरत्नभूतः पूर्णो भारतवर्षः पुरत उपस्थाप्यते। यदा यदा यत्र कुत्रापि वा स्नायते तत्र उत्तरापथीया गङ्गा दक्षिणापथीया कावेरी च हूयेते। एवं च सामान्या इतिहासपुराणकथाः, यत्पात्राणि यत्क्षेत्राणि च भारते नानादिग्भ्य आहृतानि। उदात्तया समन्वयदृष्ट्या पौराणिकी प्रक्रिया सर्वाः प्रादेशिकीः संस्कृतीः वैचित्र्यमनुपमर्द्य एकीचकार।

यदि देशभक्तिः स्वजन्मभूमेः मूर्तीकरणेन तत्रादरातिशयेन वर्तनं, तादृशो भावो नः पुराणैर्दत्त एव। पुण्यभूमिः कर्मभूमिः, यत्र देवा अपि जन्म वाञ्छन्ति तादृशीयं भूमिरिति निर्दिश्यते पुराणैः भारती भूमिः। विष्णुपुराणम् "अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।" "गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे॥" इति घोषं वितनुते। गीयते च ब्रह्मपुराणे भागवतनारदपुराणयोश्च "उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥" इति। किं बहुना इतिहासपुराणोपज्ञमयमाभाणक आवर्त्यमानोऽस्माभिर्मुहुः—"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति।



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राष्ट्रस्य मुकुटायमानः हिमालयः

संस्कृतसाहित्यं निखिलभारतव्यापितया अभिवर्धितम् । तत्र भारते सर्वप्रान्तीयाः कवयः शास्त्रकाराश्च भागिनः । स्वकृतिषु कालिदासेन एकभारतमूर्तिः प्रकाशिता । प्रथितं किल तस्य कुमारसम्भवारम्भे "अस्त्युत्तरस्याम् . . . ." इत्यादिना पृथिव्या मानदण्डत्वेन हिमालयस्य वर्णनम् । तस्य रघुवंशे रघुविजयद्वारा भारतभूगोलस्य साक्षाद्वर्णनं कृतं, यत्र प्राच्यां कामरूपात् दक्षिणस्यां कावेरीकेरलपर्यन्तं, प्रतीच्यां वङ्क्षुपारसीकावधि, तथोत्तरस्यामाहिमालयम् एष देशो विस्तीर्णो दृश्यते । कुमारसम्भवे हिमालयः प्रधानपात्रेषु अन्यतमः, अस्माकमुपास्याया उमाया अपि पिता, भगवतः शङ्करस्यापि स्थानम् । मेघदूते पुनः वर्णनम् अस्य देवतात्मनः । शाकुन्तलविक्रमोर्वशीययोश्च केचन मनोरञ्जका अङ्का हिमालय एव वर्णिताः । उज्जयिन्यां कालिदाससमारोहे नेहरुमहोदयाः हिमालयः कथम् अस्मन्मनः प्रतिभां च आविश्य विजृम्भत इति निर्दिष्टवन्तः । नचिरात् त एव लोकसभायां निवेदितवन्तः—

"विवादास्पदीकृतः प्रदेशः (हिमालयरूपः) भारतस्यातीव मुख्यः, यतो हिमालयः अस्थ्ना रक्तेन चास्माकमपृथक्तया अन्तर्भूतः । वर्षसहस्रेषु यान्यस्माकं पुस्तकानि, प्राचीनानि वा मध्यमकालीनानि वा, अस्माकं सर्वं साहित्यं हिमालयवार्तापूर्णमेव वर्तते । अस्माकं देवताश्च तत्रैव सन्ति । स न केवलं प्रदेशविशेषः, किन्तु सः अस्माकमत्यन्तमन्तरङ्गीभूतः ।"

विदेशीयो म्लेच्छः, तेनाक्रमणमस्य देशस्य निरोद्धव्यं, स निष्कासयितव्य इति च भावः संस्कृतसाहित्ये प्ररूढः ।

शकारि-विक्रमादित्ये समुज्ज्वले ऐतिहासिके महाराजे राष्ट्रीयो भाव एष मूर्ततां गतः । वस्तुतः ये द्वे नः राष्ट्रीये युग-गणने 'संवत्' 'शकाब्दः' इति ते उभे अपि विदेशीयाक्रमणाद्देशस्य मुक्त्या समवेते ।

अर्वाचीनं साहित्यम्

कालिदाससमनन्तरकविषु श्रीहर्षः स्वीये नैषधीयचरिते दमयन्तीमुखेन वदति-"वर्षेषु यद् भारतमार्यधुर्याः स्तुवन्ति" इति । यथा आश्रमेषु गृहस्थाश्रमः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्राधान्यं प्राप्नोति एवम् राष्ट्रेषु भारतम् इत्यपि प्रकटितवान् स्वीयम् अभिप्रायं महाकविरयम् । एकया उपमया सूचिताः तत्र तेन भारतस्य अतिथिप्रियता, मनोहरदेशत्वेन सुखदता, तथा आध्यात्मिकप्रयत्नानुकूलता च । वितीर्णं स्वर्गमपि भारतापेक्षया निकृष्टत्वेन निराकरोति दमयन्ती । "तस्माद् भारतमिष्टं....सर्वा भूमिः शुभगन्धा काञ्चनी यस्मात् ॥" इति नाट्यशास्त्रेऽपि भरतेनोक्तम् ।

लोकशङ्कराः शङ्कराचार्याः

सांग्रामिकविजययात्राद्वारा यत् पौराणिका राजर्षयः, ऐतिहासिकाश्चक्रवर्तिनश्च कर्तुं प्रायतन्त, तदेवाध्यात्मिकदिग्विजयं कुर्वाणा दक्षिणदिग्भवा आचार्यवराः शङ्कराः निरवर्तयन् । विश्वस्मिन् राष्ट्रे स्वं मतं प्रसार्य, तत्र तत्र केन्द्रस्थानेषु मठं प्रतिष्ठाप्य देशैक्यमेवैतैः संपादितम् । स्वापदानैस्ते एकभारतभावनाया एव पुनः प्राणप्रतिष्ठां चक्रुः ।

स्वतन्त्रे भारते

अद्यापि राष्ट्रीयप्रगत्यां संस्कृतभाषापि भागिनी मुख्या भवति । देशभक्तिवासितं नूतनं संस्कृतसाहित्यं बहुभिः संस्कृते विरच्यते । एतच्च संस्कृतप्रतिभाद्यासु पत्रिकासु द्रष्टुं शक्यम् । संस्कृतं न यस्य कस्यापि प्रान्तस्य, किन्तु निखिलस्यापि देशस्य स्वं भवति । राष्ट्रीयभावनाया यो दृढ आधारः—संस्कृतिमयी एकीभूता राष्ट्रमूर्तिः कापि—स एव संस्कृतसाहितीमात्रा भारतप्रजाभ्यो दत्तः शाश्वतिको दायभागः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जग्गू वकुलभूषणः

अधीनमुत्सृज्य जितेन्द्रियस्सुखं
गुरोस्सपर्यैककृतात्मनिश्चयः ।
जनेषु यो विस्मयमाततान तं
नमाम्यहं भक्तिभरेण लक्ष्मणम् ॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः—(सानन्दम्) एवमार्यमिश्रान्विज्ञापयामि—

नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि जग्गू-वकुलभूषणः ॥ २ ॥

(सकुतूहलं कर्णं दत्वा) अये! मयि विज्ञापनैकताने शब्द इव! ज्ञास्यामि तावत् । (परिक्रामति ।)

(नेपथ्ये)

वयस्य, पश्य तावदितः—

उलपपिहितकायश्चित्रकायो भयार्तः
विवरनिहितदीप्रस्फीतदृष्टिस्स्वनासाम् ।
असकृदभिलिहन्सन् जिह्वया स्तब्धकर्णः
करधृतशरचापं वीक्षते मामटन्तम् ॥ ३ ॥

सूत्रधारः—हन्त, ज्ञातं, मृगयासक्त इव शन्तनुः ।

(निष्क्रान्तः ।)

(स्थापना ।)

(ततः प्रविशति विदूषकद्वितीयो धनुष्पाणिश्शन्तनुः ।)

शन्तनुः—(पूर्वोक्तमेव पठित्वा) वयस्य, किन्नु खलु, औदास्यमवलम्बसे ?

(विदूषकः स्वशिरः परिघूर्णयन्नधः पतति ।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शन्तनुः— हन्त, परिश्रान्तोऽस्वस्थ इव । (विचिन्त्य) भवतु तावत्, क्वापि सलिलमाहरामि । (इति परिक्रम्य सवैलक्ष्यम्) हन्त भोः ! अननुभूतोऽयं गन्धः, कुत्रत्योऽयम् ? महदिदमाश्चर्यम्—

इत एहीति मां दूरादाह्वयन्निव संज्ञया ।
गन्धोऽयं प्रसरन्मन्दं तनोति घ्राणतर्पणम् ॥ ४ ॥

(गन्धानुसारं कतिचित्पदानि गत्वा) अये यमुना !

कल्लोलाग्रप्रचुरविशदस्फीतफेनौघहृद्या
गर्तापातक्षुभितसलिलप्रोच्चलच्छीकराढ्या ।
शश्वद्वेगात्तटगततरून्मूलनायेव सक्ता
चक्षुर्मेऽद्य स्वजववशगं कर्षतीव स्रवन्ती ॥ ५ ॥

(तटेन कतिचित्पदानि गत्वा) दर्शनीयोऽयं देशः ।

उपानद्रहितान्मर्त्यांश्चारयन्बालवालुकः ।
अस्याः प्रतीक्ष्यतां शंसंस्तटदेशो विराजते ॥ ६ ॥

(कर्णं दत्वा) कथं, गीतध्वनिरिव ! (दूरतो दत्तदृष्टिः) हन्त, यौवतं द्रोणीं प्रवर्तयतीव (परिक्रम्य) कथं नामैता अबलाः ! (निर्वर्ण्य) हन्त, कास्विदियं धीवरीषु—

नौकादण्डप्रचलनरणत्कङ्कणक्वाणपाणिः
गुञ्जामालोन्नियमितकचा मञ्जुलालापभव्या ।
वल्लीवाङ्गं विविधवलनैर्नर्तयन्ती सलीलं
मुग्धा द्रोणीं नुदति सुदती निम्नपूरेष्वभीता ॥ ७ ॥

अप्यस्त्यस्मिन्नपि जने तावदीदृशं सौन्दर्यम् ? अथवा—

ईदृशेऽपि जने सृष्टिरेतादृग्ललनामणेः ।
सारसं सृजतः पङ्के युक्तरूपैव वेधसः ॥ ८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

किंनु खलु मदीयमप्यत्र मनस्स्निह्यति ? अयुक्तं किलेदं, तद्गच्छामि तावत्। (परिक्रम्य) हन्त—

गच्छन्तमपि मामेतद्बलात्कर्षति मानसम् ।
सौन्दर्यैकरतस्यास्य कथं वा स्याद्विवेकिता ॥ ९ ॥

(विचिन्त्य) अथवा स्थाने खलु, वदन्ति किल दुष्कुलादपि स्त्रीरत्नम्- इति शास्त्रविदः, अहं च 'पार्थिवो रत्नहारी' । किञ्च—

कदापि मन्मनः क्वापि धर्म्यादस्खलितं पथः ।
इदानीमत्र रक्तं यत्सक्तं तद्युक्तवर्त्मभाक् ॥ १० ॥

(परिवृत्य परिक्रम्य च) यावद्वृक्षान्तर्हितः पश्यामि धीवरीणां स्वेच्छा-विहारम । (तथा करोति)

(ततः प्रविशति सत्यवती द्रोणीं प्रवर्तयन्ती सह सखीभिः ।)

सत्यवती—पश्यत सख्यः, तरङ्गचालितेभ्यो लताकुञ्जेभ्यः कथं पुष्पाणि सलिले निपतन्ति ।

एका—अनया द्रोण्या त्वरितं गत्वा तमञ्जलिना गृह्णीमः ।

सत्यवती—तर्हि त्वरितमहमेनां प्रेषयामि (इति क्षेपणीं सत्वरं चालयति)

शन्तनुः—(विलोक्य)

दष्टाधरं कुटिलितभ्रु विलोलचक्षुः
लोलालकाकुललाटमरालकण्ठम् ।
ताटङ्कताडनततारुणिमोच्चगण्डं
पश्यामि पुण्यवशतोऽद्य मुखाब्जमस्याः ॥ ११ ॥

सत्यवती—(सावेगमुत्थाय) अहो, पर्वतसकाशं गच्छतीवैषा ।

शन्तनुः—(सवैलक्ष्यं विलोक्य) हन्त, इयं तावत्—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कञ्चरकृतकुचबन्धा-
ध्यनलङ्करणाप्यनच्छभोज्यापि ।
स्पृहणीयैव निसर्गा-
न्मधुरं रूपं ह्यनन्यसापेक्षम् ॥ १२ ॥

सत्यवती—(ससम्भ्रमम्) हा धिक्, हा धिक्! आवर्तभ्रामितैषा यत्रकुत्रापि धावति, न हि मम वशवर्तिनी, इदानीं किं कुर्मः? (द्रोण्या सवेगं निष्क्रान्ता।)

शन्तनुः—(परिक्रम्य) अये क्वाप्यन्तर्हिता द्रोणी । निर्वर्णितापि नैव दृष्टिपथमारोहति । (सावेगमनुधाव्य)—

नदीवेगोऽयमुद्घोषः पुरो धावन्नितो गता ।
द्रोणीति दर्शयन्नार्तं समाश्वासयतीव माम् ॥ १३ ॥

तदितो गत्वान्विष्यामि । (परिक्रम्य) हन्त, अत्रापि स एव गन्धः । (कतिचित्पदानि गत्वा) किन्नु खलु—

आनम्रवृक्षविटपाहितबाहुवल्लिः
वेगानुकूलचलशैवलकल्पकेशा ।
आवेगविक्षुभितविस्तृतलोचनाब्जा
कैषोर्मिताडिततनुर्धुरि दृश्यतेऽत्र ॥ १४ ॥

(सावेगमुपसर्पति ।)

(ततः प्रविशति यथानिर्दिष्टा सत्यवती ।)

सत्यवती—(सावेगम्) का गतिः !

शन्तनुः—अलमावेगेन, अहमस्मि । (इति तां मन्दं करेण गृहीत्वा तटं नयति ।)

(सत्यवती वेपमाना तिष्ठति ।)

शन्तनुः—(आत्मगतम्)—

आर्द्रांशुकासक्ततया समन्तात्
सुस्पष्टनिम्नोच्चमनोहराङ्गम् ।
शरीरमस्यास्स्रवदम्बुधारं
ग्रीष्मापगापात्रमिवावभाति ॥ १५ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सत्यवती—(सावेगं परितो विलोक्य) कुत्र मे सख्यः?

शन्तनुः—(निर्वर्ण्यात्मगतम्) हन्त, दिष्ट्या सेयम्, अस्यामेवापूर्वोऽयं गन्धः, किमियं देवकन्या शापवशात्स्याद्धीवरी संवृत्ता?

सत्यवती—(स्वगतम्) क एषः, राजर्षिरिव प्रतिभाति? (सलज्जं तिष्ठति।)

शन्तनुः—(प्रकाशम्) अलमावेगेन।

सत्यवती—गृहमहं गमिष्यामि। (परिक्रम्य स्वगतम्) नाहमेकानेनाकृष्टा, मम हृदयं च।

शन्तनुः—तिष्ठ तावत्। (अर्गलीभूय) कथं त्वय्यपूर्वोऽयं गन्धः?

सत्यवती—(सलज्जम्।) पराशरस्यानुग्रहेण।

शन्तनुः—कथं? पराशरानुग्रहः! धन्यासि, करते सुकृती पिता?

सत्यवती—मत्स्यजीवी।

(नेपथ्ये) सत्यवति, सत्यवति!

सत्यवती—कथं (सहर्षम्) सख्य इव (मन्दं शन्तनुमेव पश्यन्ती निष्क्रान्ता।)

शन्तनुः—(सावेगम्) कथं गतैव? (विचिन्त्य)

अहमिव शरेण सापि
स्मरस्य विद्धा भवेच्च मुग्धाक्षी।
पश्यन्त्यभीक्ष्णमेनं
निरगाद्यन्मामनिच्छया मन्दम्॥ १६॥

भवतु, तामेवानुवर्तिष्ये। (कतिचित्पदानि गत्वा विलोक्य च) सह सखीभिरित एवाभिवर्तते सा मृगाक्षी, तद्वृक्षान्तर्हितगात्रो भवामि। (तथा करोति।)

(ततः प्रविशति सह सखीभिस्सत्यवती।)

सत्यवती—केनापि राजर्षिणा।

एका—कथं, राजर्षिणा? धन्या खलु त्वमेव।

सत्यवती—किं कथयेयम्? स पुना रूपेण मन्मथ एव।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अन्या—दर्शनीयो भवेत् ।

सत्यवती—अथकिम् ।

अपरा—तस्य करस्पर्शस्त्वयानुभूतः ?

सत्यवती—(सलज्जस्मितं शिरो नमयति)

अन्या—(सत्यवतीं निर्वर्ण्य) ही, ही, तद्वचनश्रवणेनैव कण्टकितं गात्रम् ।

सत्यवती—(सभ्रूभङ्गम् ) अलं परिहासेन ; तेमचेलस्पर्शेन ।

अपरा—स कुत्र गतः ?

सत्यवती—तदेव मयापि चिन्त्यते ।

अन्या—(सस्मितम् ) भवत्वेतत्, पुनरपि कदापि यदि स महाराजः दृष्टि-
गोचरो भवेत्, कृतजीवितदानस्य किं समर्पयसि ?

अपरा—(समन्दस्मितम् ) आत्मानम् ।

सत्यवती—(सनिर्वेदम् ) न कृतं मया तादृशं भागधेयम् ।

शन्तनुः—(स्वगतम् ) दिष्टया धन्योऽस्मि ।

अपरा—किं चिन्तितेन, अन्विष्यामः ।

सत्यवती—(सहर्षम् ) साधु, भणितम् । तथैव कुर्मः । (अन्वेषणायोद्युङ्क्ते ।)

शन्तनुः—(सहसोपसृत्य) अलमलमायासेन ।

कान्तारतीक्ष्णतरकण्टकपीडिताङ्घ्रिः
मन्मार्गणाय नितरां ग्लपिताङ्गयष्टिः ।
माभूदियं वरतनुश्चिरकाङ्क्ष्यमाणा
सिद्धोऽस्मि तच्चरणदास्यकृतेऽहमेव ॥ १७ ॥

(सर्वाः सवैलक्ष्यं पश्यन्ति ।)

(सत्यवती सत्रपमवनतमुखी तिष्ठति ।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सख्यः—(जनान्तिकम्) दर्शनीय एषः ।

एका—हला, पश्य, तवाग्रत एव मनोरथः ।

सत्यवती—(सभ्रूभङ्गम्) तर्हि किं करणीयम् ?

अपरा—(सस्मितम्) समर्पयात्मानम् ।

सत्यवती—(सक्रोधमिव) भवतु तावत् गत्वा ताताय कथयिष्यामि "एषा किमपि किमपि सोल्लुण्ठनं भणतीति" । (गन्तुमुद्युङ्क्ते ।)

शन्तनुः—(अर्गलीभूय) ननु गमिष्यसि—

यमुनावीचिशिशिरे मन्दमारुतबन्धुरे ।
निषीदत्ववदातेऽस्मिन् भवती तटसैकते ॥ १८ ॥

सख्यः—एवं कुर्मः । (उपविशन्ति) । (सत्यवती अनिच्छन्तीवोपविशति ।)

शन्तनुः—(पुरत उपविश्य) युष्माकं सखीमधिकृत्य किमपि प्रष्टुकामोऽस्मि ।

एका—पृच्छतु महाराजः ।

शन्तनुः—अपीयं धीवरदुहिता ?

अन्या—पोषणेन ।

शन्तनुः—कथं पोषणेन ? तर्हि कस्य ?

सख्यः—कस्येति न खलु जानीमः ।

शन्तनुः—का वा महाभागा जननी ?

एका—(सस्मितम्) यमुनाभ्यन्तरचारिणी एका शफरी ।

शन्तनुः—(सवैलक्ष्यम्) विचित्रोऽयमुदन्तः ।

अन्या—पुरा यमुनायां विस्तृते जाले निगडितैका शफरी ।

शन्तनुः—ततस्ततः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अन्या—ततस्सा समानीता स्वामिनस्सकाशम् ।

शन्तनुः—ततस्सा खण्डिता स्यात् ।

अपरा—अथकिम् ; तस्या उदराभ्यन्तरे सेयमासीत् ।

शन्तनुः—(सवैलक्ष्यम्)—

तदा स्यान्निष्फलं हन्त विधातुस्सृष्टिकौशलम् ।
शफरीखण्डनात्सेयं विदीर्णा चेत्प्रमादतः ॥ १९ ॥

(सस्मितम्) तर्हि वनप्रियेव परभृतेयं युष्माकं सखी ।

अन्या—(सस्मितम्) अत एव सर्वदा वनचारिणी मञ्जुलालापा च ।

शन्तनुः—अपि विवाहिता ?

सख्यः—नहि नहि ।

शन्तनुः—विवाहे तावदस्याः पितुः कथं सङ्कल्पः ?

एका—समुचितपुरुषाय दातव्येति । (सत्यवती-सलज्जं शिरो नमयति ।)
(नेपथ्ये कलकलः)

शन्तनुः—अनुचरास्सन्निहिता इव ।

सत्यवती—गच्छामः महान्काल आसीत् । (सर्वा उत्तिष्ठन्ति ।) (पुनर्नेपथ्ये)
का गतिः गवेषणेनापि न लब्धो महाराजः ।

शन्तनुः—क्व युष्माकमावासः ।

सख्यः—नातिदूर एव । (अङ्गुल्या दर्शयन्ति ।)

शन्तनुः—भवतु, गच्छन्तु भवत्यः ।

(सत्यवती अपाङ्गवीक्षणेन राजानमेव पश्यन्ती निष्क्रान्ता ।)

सख्यः—न विस्मरणीय एष जनः । (इति निष्क्रान्ताः ।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शन्तनुः—(सचिन्तं परिक्रम्य) को वा विजानाति विधिवैचित्र्यं, यच्छफर्या स्त्रीरत्नजनिः ।

(ततः प्रविशति मृगयोचितवेषैः कतिपयपरिजनैः परिवृतो विदूषकः ।)

विदूषकः—अहमपि ब्राह्मणः, कुतो वा न स्यां तपोधनः, एवं राजानुवर्तनापेक्षया वरं किल तपः । (विचिन्त्य) भवतु, अयं दृढसङ्कल्पः (इति निजवस्त्राभरणादिकमनुचरहस्ते निक्षिप्य वस्त्रमेकमेव परिधाय) गच्छन्तु भवन्तः राजान्वेषणाय ।

अनुचराः—कुत्र गच्छति भवान् ?

विदूषकः—तपसे ।

अनुचराः—(सस्मितम्) । अहो एष विरक्तस्संवृत्तः ।

विदूषकः—(सक्रोधम्) किं हसितेन ? यूयं राजानुवर्तनेन विरक्ताः, अहं तु निर्वेदेन । (इति परिक्रामति ।)

शन्तनुः—(उपसृत्य) वयस्य, किन्नु खल्विदम् ?

विदूषकः—(सावेगं विलोक्य) हंहो, राजा (धावति ।)

शन्तनुः—(सस्मितम्) किन्नु खलु, उन्मत्त इव, सखे तिष्ठ तावत् । (उपसर्पति ।)

विदूषकः—(साञ्जलिबन्धम्) महाराज, मा निवारय । तपःकृते प्रस्थितोऽस्मि ।

शन्तनुः—कुत्र तपः ?

विदूषकः—अत्र यमुनातीरे । (इति सरभसं परिक्रम्य यमुनातीरे दृढमङ्गुलिभ्यां स्वनासां गृहीत्वोपविशति ।)

शन्तनुः—(सस्मितं समुपसृत्य) वयस्य, तपः किं सुलभसाध्यम् ?

विदूषकः—राजानुवर्तनं पुनः ?

शन्तनुः—अलं निर्वेदेन । भवदस्वास्थ्यानुनोदनाय गतोऽहम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विदूषकः—मम कुतोऽस्वस्थता ?

शन्तनुः—मदनुसरणेन ।

विदूषकः—अत एवेदानीं निर्वेदः ।

शन्तनुः—निवेदनीयमस्ति ।

विदूषकः—(सशीर्षान्दोलनम्) श्रोतव्यं सर्वं श्रुतमेव ;

शन्तनुः—तर्ह्ययमेव सङ्कल्पः ?

विदूषकः—अथकिम् ।

शन्तनुः—प्रस्थितोऽस्मि राजधानीम् ।

विदूषकः—यथेच्छं गच्छतु भवान् ।

(शन्तनुः परिक्रामति ।)

विदूषकः—तिष्ठतु भवान्, तदा दृढसङ्कल्प एव, यदि बुभुक्षापीडा न भवेत् ।
(उत्तिष्ठति ।)

शन्तनुः—(सस्मितम्) किमचिरादेव प्रत्यक्षतां गता देवता ?

विदूषकः—अथकिम्, भवानेव मम देवो हि । (उपसर्पति ।)

शन्तनुः—वयस्य, अस्ति वक्तव्यं रहस्यम् ।

विदूषकः—प्रथमं गच्छतु भवान् राजधानीं, ततो भवतु रहस्यम् ।

शन्तनुः—यथा रोचते भवते ।

(निष्क्रान्तास्सर्वे ।)

(प्रथमोऽङ्कः ।)

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति सचिन्तो भीष्मः ।)

भीष्मः—(दीर्घं निश्वस्य) किं करोमि ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मामनिच्छन्तमेषोऽद्य पीडयत्यनिशं पिता ।
विवाहाय, गुरोराज्ञा ह्यनुल्लङ्घ्या तनूभुवा ॥ १ ॥

प्रविश्य सचिवः—(समन्दहासम्) हुं, किं कथयेयम् ?

युवराज एष करपीडने पराङ्-
मुखतां गतोऽद्य नृपतिस्तु तत्पिता ।
तरुणीकरग्रहणवाञ्छयाकुलो
विधिचेष्टितं हि विपरीतमद्भुतम् ॥ २ ॥

(उपसृत्य) कुमार, कुमार !

भीष्मः—(ससम्भ्रमं सत्वरमुत्थाय) कथम् अमात्यवर्यः! (साञ्जलिबन्धम्) इदमासनम् ।

सचिवः—(उपविश्य) उपविशतु कुमारः ।

(भीष्मः उपविशति ।)

सचिवः—किन्नु खलु चिन्ताकुल इव कुमारः ?

भीष्मः—न किमपि। अद्यास्मत्पितृपादा दृष्टाश्चिन्ताकुला इव, तत्राहमेवापराधीति।

सचिवः—किमपराद्धं भवता ?

भीष्मः—न किमप्यन्यत्, विवाहे तावन्मम निरुत्सुकतैवापराधः ।

सचिवः—तदर्थं किमु चिन्ताकुलो महाराजः ?

भीष्मः—एवमवैमि, अमात्यवर्य, सर्वं किल सम्पन्नं मम ।

शान्तिर्मे हृदयासक्ता दमस्तत्सहजः सुहृत् ।
इन्द्रियाणि वशे सन्ति बलानि किमितः परम् ॥ ३ ॥

सचिवः—किन्नु खल्वेवमभिधीयते कुमारेण ?

भीष्मः—आम्, स भवति वा गृहमेधिनां य ऊर्ध्वरेतसामानन्दः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ध्येये चित्तं सुचिरमचलं तिष्ठति प्राप्तबोधं
नैवालस्यं स्पृशति मनुजं पाटवं चेन्द्रियेषु ।
दार्ढ्यं देहे भवति हृदये धारणं दीर्घमायुः
तेजो वक्त्रे स्फुरति नितरां निर्विकारः पुमान् यत् ॥ ४ ॥

सचिवः—नास्ति खल्वपुत्रस्य गतिः । तदवश्यं गृहमेधिना भवितव्यम् ।

भीष्मः—तर्हि, का गतिरूर्ध्वरेतसाम् ?

सचिवः—दुर्गतिरेव ।

भीष्मः—हन्त कामिनां प्रलोभनम्! मुधा जगत्यङ्गनाङ्गारविलीनहृदयाः भवन्ति पुरुषाः ।

सचिवः—यौवने विषयैषिणा भवितव्यं किल ?

भीष्मः—सत्यं, विषयजालान्तर्गता मत्स्यकल्पा एव ।

सचिवः—(सनिर्वेदम्) कुमारस्य तावदेवं, न पुनर्महाराजस्य ।

भीष्मः—कथम्? अद्यापि पितृपादा विषयाभिलाषिणः ?

सचिवः—तत्रापि धीवरदुहितरि सक्तमिव मनः ।

भीष्मः—कथं धीवरदुहितरि ? अथवा अलं विचारेण गुरुजने ।

ते तु पूज्याः सदा धर्मप्रवर्तनकृतादराः ।
न कदापि प्रवर्तन्ते पथि दुर्जनसेविते ॥ ५ ॥

(नेपथ्ये)

अद्यापि मे नयनयोर्धुरि पर्यटन्ती
स्निग्धातिमेचककटाक्षमिषेण शश्वत् ।
जालं वितत्य वशवर्ति मनो मदीय-
माकर्षतीव नितरां मदिरेक्षणा सा ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भीष्मः—किन्नु खल्विदम् ?

सचिवः—उक्तं हि, तदेवम् ।

(पुनर्नेपथ्ये) तर्हि, मत्स्य इव तस्या हस्तगतोऽसि ।

भीष्मः—(सनिर्वेदम्) हुं नर्मसचिवस्योक्तिरिव ।

सचिवः—अथकिम् ।

(पुनर्नेपथ्ये)

तत्तु सत्यम् ।

(नेपथ्ये) तर्हि गच्छामः पश्यामः ।

वयस्य, गाङ्गेयमनुचिन्त्य परावर्तते मे हृदयम् ।

भीष्मः—कथं? मन्निमित्तमेवं तातपादाः, तर्हि गत्वा सान्त्वयामि । (उत्तिष्ठति ।)

सचिवः—अलं साहसेन ।

भीष्मः—किमर्थम् ?

सचिवः—आवामप्यन्तर्हितगात्रौ द्रक्ष्यावः किं किं प्रचलिष्यतीति ।
(पुनर्नेपथ्ये) अलं कुमारचिन्तया, एतु वयस्यः, कुमारमहं वारयामि ।

सचिवः—हुं, कुक्षिम्भरेः हृदयमेवं हि ।(उत्थाय कुमारेण सह परिक्रामति ।)
(ततः प्रविशति विदूषकद्वितीयश्शन्तनुः)

शन्तनुः—वयस्य, युवराजस्तु सद्गुणैर्मामप्यतिशेते ।

विदूषकः—ईदृशे गुणे पुनः ?

(शन्तनुस्सलज्जं शिरो नमयति ।)

(सचिवः सस्मितं कुमारं चालयति ।)

विदूषकः—(श्रममभिनीय) कियद्दूरं गन्तव्यम् ?

शन्तनुः—(परिक्रम्य) अनतिदूर एव । पश्यतु वयस्यः—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

काश्चिन्नीव्रैः कतिचन चलद्वासजालैर्निगूढाः
वृक्षैः सान्द्रै रचितवृतयो लम्बमानार्द्रजालैः ।
धूमैर्व्याप्ताः शफरपचनस्फीतदुर्गन्धतीव्रैः
आलोक्यन्ते कुटिलितकुटीवाटिका नातिदूरे ॥ ७ ॥

विदूषकः—(सभ्रूभङ्गनासास्फुरणम् ) वयस्य, त्वया वर्णितं श्रुत्वैव वेपते मम हृदयं, मत्स्यगन्धोऽत्रापि प्रसरतीव ।

सचिवः—(सस्मितं जनान्तिकम् ) कुमार, कथं वर्तते ?

भीष्मः—(जनान्तिकम् ) हुं, विषयव्यग्रता सर्वमपि सह्यं करोति ।

सचिवः—भवतु नाम, एवमन्तर्हितावेवानुसरावः । (परिक्रामति ।)

शन्तनुः—(परिक्रम्य) सन्निहित एव कैवर्तानामावासः ।

विदूषकः—अत्र न शक्नोमि प्रचलितुम् ।

शन्तनुः—वयस्य, पश्य तावदजिरे—

शुक्तिकोदरनिभोदरदेशैः
तेमचिक्कणकिणासितपृष्ठैः ।
सर्वतः प्रसृमरोत्कटविस्रैः
पूरितः पिटक एष विसारैः ॥ ८ ॥

विदूषकः—गृहीतेष्वभिनव इव दृश्यते ।

भीष्मः—(सजुगुप्सं जनान्तिकम् ) ।

सदा थूकृतताम्बूलरसैः कुक्कुटविष्ठकैः ।
चित्रकम्बलगूढेव भूरियं भाति दूरतः ॥ ९ ॥

सचिवः—(सस्मितं जनान्तिकम्) महाराजस्य तु सत्यं, चित्रकम्बलगूढैव ।

विदूषकः—(ऊर्ध्वमवलोक्य) अहो, गृध्रसमूहो गिलतीव माम् ।
वयस्य, एहि प्रासादमेव गच्छामः ।



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

**शन्तनुः**—(सस्मितम्) मूर्ख, पश्य तावत्

आश्यानीकृतमत्स्यकेषु नितरां गृध्नास्तु गृध्रा मुहुः
डीयन्ते वियति प्रतार्य सहसा तत्सङ्ग्रहाकाङ्क्षया ।
निस्स्नेहातिपिशङ्गलम्बितजटाजालालिका बालकाः
दाशानामसिताङ्गका विवसना रक्षन्ति दण्डैर्धृतैः ॥ १० ॥

**भीष्मः**—(जनान्तिकम्) हन्त, हिंसाजीविनां वृत्तिः ।

**सचिवः**—(जनान्तिकम्) एते त्वाविलप्रायाः, पश्यतु कुमारः ।

अवकरकूटः कीटैः
अवटेष्वाभाति पूतिगन्धाढ्यः ।
तदुपरि काकाः कीटा-
कर्षणपटवो रटन्ति कटुरावाः ॥ ११ ॥

(नेपथ्ये) जयतु जयतु स्वामी ।

**विदूषकः**—(नेपथ्याभिमुखमवलोक्य) हन्त, परित्रायतां, परित्रायतां महाराजः ।
(इति सोद्वेगं राजानमालिङ्गति ।)

**शन्तनुः**—(विलोक्य) अलं, साध्वसेन, एष दाशाधिप इव ।

**भीष्मः**—(सस्मितं जनान्तिकम्) स्थाने खलु, कथं वा न स्याद्भीतिः ?

अनल्पाचिकुरोज्ज्वलस्फुटवराटगुञ्जासरः
कपोलतलभङ्गुरप्रसृमरासितश्मश्रुभाक् ।
विसारततदक्कनद्वलयकुण्डलो मांसलः
चकास्ति यमकिङ्करप्रतिम एष दाशाधिपः ॥ १२ ॥

(ततः प्रविशति यथानिर्दिष्टो दाशाधिपः)

**दाशाधिपः**—शज्जेहिं होदव्वं दाशेहिं ळहु शमुद्दशळिळम्मि ।
पव्वअशळिशतिमिङ्गिळबंदणपढुविशाळबडिशेहिं ॥

[छाया—सज्जैर्भवितव्यं दाशैर्लघु समुद्रसलिले ।
पर्वतसदृशतिमिङ्गिलबन्धनपटुविशालबडिशैः ॥ १३ ॥]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अनुचराः—यथादिशति स्वामी । (निष्क्रान्ताः ।)

भार्या—(प्रविश्य) किं करणीयं, सत्यवती पुनश्चिन्तया दूरीकृतशरीरव्यापारा दीर्घश्वासा वर्तते ।

शन्तनुः—(जनान्तिकम्) किंनिमित्तमेवं भवेत्?

विदूषकः—(जनान्तिकम) किमन्यत्, तत्र कृत एव स्यात् ।

भीष्मः—(सहासं जनान्तिकम्) इयमपि दर्शनीयैव ।

सचिवः—(जनान्तिकम) आम् ।

ताम्बूलपिण्डपरिपीवरगण्डदेशा
स्निग्धातिमेचकरदा पृथुकेशबन्धा ।
आलोलदन्तमयकुण्डलदीर्घकर्णा
सिन्दूरवृत्ततिलकाऽसितमूर्तिरेषा ॥ १४ ॥

दाशाधिपः—कथं? वत्सा दीर्घनिश्वासा? (विचिन्त्य) तामानय तावत् ।

भार्या—तथा । (निष्क्रान्ता ।)

शन्तनुः—(जनान्तिकम्) वयस्य, आयात्यद्य नयनसुधा । पश्य तावत् सावधानम् ।

विदूषकः—किं करोमि, अर्गलीभवन्ति अवकरकूटमक्षिकाः । (इति वस्त्राञ्चलेन मुखं वीजयंस्तिष्ठति)

(ततः प्रविशति सत्यवत्या सह भार्या ।)

भार्या—गच्छतु वत्सा, आकारयति पिता ।

भीष्मः—(विलोक्य)

स्थाने खलु पितुः कामो दाशेशदुहितर्यपि ।
षट्पदो हि समादत्ते कर्दमादपि सन्मधु ॥ १५ ॥

सचिवः—रत्नहारी खलु राजा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सत्यवती—(ध्यानमन्दं परिक्रामति ।)

विदूषकः—किं करोमि, अनिमिषोऽहं न जातः । वयस्य, त्वया वर्णितं रूपं स्तोकं तर्कयामि ।

शन्तनुः—(सानन्दम)

मुखलावण्यपूरेऽस्या लोलदृङ्मीनयुग्मकम् ।
नासासेतुतटे कूलाघातकेलिं तनोत्यहो ॥ १६ ॥

दाशाधिपः—(सत्यवतीशिरः परामृशन्) वत्से, किं निदानमेवं भवितुम् ?

सत्यवती—किमिति भणामि ।

विदूषकः—वयस्य, एषा तव कृते न ह्येवम्, अन्येन कारणेन भवितव्यम् ।

शन्तनुः—(जनान्तिकम्) मूर्ख, अप्रकाशं हि स्त्रीणां हृदयम् ।

विदूषकः—किमीदृशजनस्याप्यप्रकाशं हृदयम् ?

शन्तनुः—जगति स्त्रीसामान्यमेकरूपं हि-

तिर्यक्ष्वपि पुमान्कामादभिगच्छति सादरम् ।
कामातुरापि योषित्तु तदोदास्ते स्वभावतः ॥ १७ ॥

भार्या—तदाप्रभृत्येवं वर्तते, यदा यमुनात आगता ।

दाशाधिपः—किं तत्र भीतिः समुत्पन्ना ? कथय वत्से, परिहरामि ।

सखी प्रविश्य—सख्याः सज्जमभ्यवहार्यम् ।

भार्या—एषा पुनः किमपि न भणति, किं कुर्मः, वत्से, गच्छतु भवती भोजनकृते ।

दाशाधिपः—जालाक्षि, सत्यवती किमु यमुनासलिले भीता ?

सखी—न खलु भीता, किन्तु जले निपतिता ।

दाशाधिपः—कथं ? निपतिता ? ततः,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सखी--ततः केनापि महात्मना महाराजेन तीरं नीता ।

दाशाधिपः—कथं? महाराजेन? आश्चर्यं खल्वेतत् !

सखी—तदाप्रभृत्येवं वर्तते ।

सत्यवती--(सभ्रूभङ्गम्) अलं विस्तरेण ।

शन्तनुः—दर्शनीया खल्विदानीम्--

आरोपितकोपेयं
भ्रुकुटितरङ्गितललाटकमनीया ;
स्फुरदधरा रक्तमुखी
वल्गितवक्षोजकुम्भगम्भीरा ॥ १८ ॥

दाशाधिपः--किं तत्र ते मनो लग्नम्?

सत्यवती—(सलज्जं शिरो नमयति ।)

सखी—एवमिव ।

दाशाधिपः—हन्त, दाशदुहिता कथमिव महाराजकरग्रहणे शक्नोति? वत्से, अलं स्वप्नधनाभिलाषेण ।

विदूषकः--(जनान्तिकम्) वयस्य, इदानीमेव पुरतो गच्छतु भवान्, प्रत्यक्षधनमेव भवतु ।

शन्तनुः--युक्तमभिहितम् (इत्युपसर्पति)

सर्वे--(सवैलक्ष्यं पश्यन्ति)

दाशाधिपः--(सविनयम्) एतु महाराजः, अत्र निषण्णो भवतु ।

सत्यवती--(सत्रपं पितुः समीपे लीना तिष्ठति ।)

शन्तनुः--(स्वगतम्) हन्त !

मारुतान्दोलितलतासदृक्षा पक्ष्मलेक्षणा ।
त्रिभङ्गवक्रिततनुर्लीयते पितुरन्तिके ॥ १९ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(प्रकाशम्) अलमलमत्यादेरण, अत्रैवास्मि ।

दाशाधिपः—किमनेन रक्षिता?

सत्यवती—(चेलाञ्चलं परामृशन्ती तूष्णीमवनमितशीर्षा तिष्ठति)

सखी—अनेनैव, भवितव्यम् ।

शन्तनुः—आम्, मयैव रक्षितेयम् ।

दाशाधिपः—(सदैन्यम्) धीवरोऽहं वत्सारक्षकाय महाराजाय किं समर्पयामि?

विदूषकः—(सहसोपसृत्य) तामेव समर्पय ।

शन्तनुः—(स्मयते ।) सत्यवती—(लज्जां नाटयति ।)

दाशाधिपः—(भार्यामवलोक्य) साधु भणितमार्येण ।

भार्या—(सानन्दं) हंहो, महाराजो मम जामाता !

दाशाधिपः—यद्यभिमतं महाराजस्य ।

विदूषकः—किं करणीयम्, इदानीं कथमप्यनुमन्तव्यम् ।

शन्तनुः—(समन्दस्मितम्) आर्यब्राह्मणवचनस्य नाहमर्हामि प्रतिवक्तुम् ।

दाशाधिपः—महान्प्रमोदः ।

भार्या—यद्येवम्, अत्र किमपि पृच्छ्यते ।

शन्तनुः—निर्भयं पृच्छ्यताम् ।

भार्या—मम दुहितुर्गर्भसम्भूतस्यैव करणीयो राज्याभिषेकः ।

विदूषकः—(नासातले तर्जनीमाधाय) अहो, लोकविनाशिनी खलु स्त्रीबुद्धिः !

शन्तनुः—(सोद्वेगम्) हन्त, शान्तं पापं, शान्तं पापम् । (दिग्भ्रान्तस्तिष्ठति)

भीष्मः—(जनान्तिकम्) अमात्यवर्य, मदर्थं खल्वेवं दुरवस्थोऽस्मत्तातः ! सम्प्रति नाहमुत्सहे, (सरभसमुपसर्पति) (सर्वे सोद्वेगं पश्यन्ति ।)

विदूषकः—अहो कुमारः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शन्तनुः—(सोद्वेगम्) वत्स, किन्नु खल्विदम्?

भीष्मः—(प्रणम्य) पुत्रकृत्यमिदम्।

शन्तनुः—किमिदं, पुत्रकृत्यम्?

भीष्मः—पितृमनस्सन्तोषणमेव खलु; (दाशाधिपमवलोक्य) तात, स्तोकमपसर, मज्जननीं प्रणमामि। (उपसृत्य) अम्ब, प्रणमति ते पुत्रो भीष्मः।

सत्यवती—(ससम्भ्रममपसरति)

भार्या—(गण्डतले हस्तमाधाय) एवं करणेन तव राज्यं न भविष्यति।

शन्तनुः—(सक्रोधम्) आशापिशाचाक्रान्ते, मूर्खे, मास्तु ते दुहिता। (परावर्तते)

भीष्मः—(अर्गलीभूय) क्षन्तुमर्हन्ति तातपादाः।

शन्तनुः—(सगद्गदम्) वत्स

अभिमतापि वधूरियमात्मजं
ननु भवन्तमपास्य न मे मुदे।
अनुचिते यदि कर्मणि सम्मतिः
जगति मां निगदन्त्यभिकं जनाः॥ २०॥

भीष्मः—अनुचितं न कदाप्यनुष्ठीयते तातपादैः।

शन्तनुः—वत्स, भवन्तमन्तरा नान्यस्मै दातुमुत्सहे राज्यम्।

भीष्मः—अग्रे सम्भविष्यन्नपि नन्वात्मजः-(दाशाधिपभार्यामवलोक्य) यथारोचते भवत्यै।

भार्या—यद्यभिलषेत्तव पुत्रो राज्यम्?

अमात्यः—हन्त, स्त्रीबुद्धिः!

विदूषकः—(नासातले तर्जनीमाधाय) साधु, पृष्टम्।

भीष्मः—वर्णी खल्वहम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भार्या—पाणिग्रहणानन्तरम् ।

अमात्यः—(स्वगतम्) हन्त, किं वा प्रतिजानीते कुमारो न जाने। (सहसोपसृत्य) कुमार, अलं साहसेन ।

शन्तनुः—हन्त, अमात्योऽप्यत्रैव ।

भीष्मः—(बाहुमुद्यम्य) सावधानमवधारयन्तु सर्वा देवताः-

पित्रर्थं त्यक्तराज्योऽहं जितबाह्यान्तरेन्द्रियः ।
भवेयं ब्रह्मचार्येव विचिकित्सैव मात्र भूत् ॥ २१ ॥

(गगनात्पुष्पवृष्टिः पतति) हन्त, भीष्मप्रतिज्ञा !

शन्तनुः—(सबाष्पगद्गदं भीष्ममालिङ्ग्य) वत्स, किं व्यवसितम्? मदर्थं सर्वमपि त्यक्तं हि भवता, किं ते प्रियमुपहरामि?

भीष्मः—(साञ्जलिबन्धम्) तस्यास्तावत्पाणिं गृह्णन्तु तातपादाः । तदेव मे प्रियम् ।

शन्तनुः—तथास्तु । (सत्यवत्याः पाणिं गृह्णाति, गगनात्पुष्पवृष्टिः पतति ।)

(भरतवाक्यम्)

नेतारः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी ।
कासारा रसपूरिता विटपिनः पुष्पैः फलैस्सम्भृता-
स्सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः ॥ २२ ॥

(निष्क्रान्तास्सर्वे)

———

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# श्रीरङ्गराजसुप्रभातम् *

भक्ताङ्घ्रिरेणुः (तोण्डरडिप्पोडि आलवार्)

अनु० अ. मु. श्रीनिवासाचार्यः

1. कदिरवन्

भास्वान् दिवस्पतिदिशाशिखरं समायात्
अन्धं तमोऽस्तमभवद्रुचिरं प्रभातम् ।
फुल्ला महासुमनसो मधु सारयन्ति
देवा नृपा मिथ उपेत्य समेत्य घृष्टाः ॥ १ ॥
प्राप्ता अगस्त्यदिशम्, एभिरुपागतानां
यूथं समत्र करिणां करिणीयुतानाम् ।
भेर्यश्च सोर्मिजलराशिनिभा निनादे
रङ्गाधिनाथ ! शयनाद्भजतात् प्रबोधम् ॥ २ ॥

2. कोळुङ्कोडि

पौरस्त्यवात इह पुष्पलतासमेत-
यूथीसुमान्यभिमृशन्निव एव वाति ।
हंसाः प्रसूनशयने शयिताः प्रबुद्धाः
निर्धूय नैजगरुतो महतो हिमार्द्रान् ॥ ३ ॥
सङ्ग्रासिनक्रबिलतुल्यमहास्यशुभ्र-
दंष्ट्रानिखातजविषातिविषादितस्य ।
दन्तावलस्य महतीं शमयंश्च बाधां
रङ्गाधिनाथ! शयनाद्भजतात् प्रबोधम् ॥ ४ ॥

3. शुडरोळि

भास्वत्कराः समदिशः प्रसृतास्समन्तात्,
सान्द्रोडुभास्वरमहः क्रशिमानमाप्तम् ।
शीतः प्रभूतकिरणो विधुरेष निश्श्रीः,
ध्वान्तं निरस्तमभवत्, सुनिकुञ्जसंस्थात् ॥ ५ ॥

---

*श्रीवैष्णवसंप्रदाये भक्ताङ्घ्रिरेणु (तोण्डरडिप्पोडि) नाम्ना प्रसिद्धेन दिव्यसूरिदशके अष्टमेन सूरिणा प्रणीता श्रीरङ्गनाथस्य प्राबोधिकी सूक्तिमाला—"तिरुप्पळ्ळियेळुच्चि" इति द्राविडप्रबन्धनाम्ना निर्दिश्यते । तस्याः प्रतिकृतिरियम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पूगाद्विदार्य कुहलीं तत आत्तगन्धः
प्राभातवात इह वाति, अमितप्रभाभिः ।
ज्वालावलीभिरतिसुन्दरचक्रपाणे
रङ्गाधिनाथ! शयनाद्भजतात् प्रबोधम् ॥ ६ ॥

4. मेट्टिळ

अत्युच्चबालमहिषानुगवल्लवानां
वंशीरवैश्च निनदैर्वृषघण्टिकानाम् ।
संभूय संभृतरवः प्रसृतो दिशासु
क्षेत्रस्थषट्पदगणाः सरवाः प्रयाताः ॥ ७ ॥

लङ्केशवंशपरितापकचारुशार्ङ्ग!
देवोक्ष! कौशिकमहर्षिमखं सुरक्ष्य ।
वैरिन्नवीर्यनिलय! अवभृथं प्रकल्प्या-
योध्याधिनाथ! भज रङ्गनिधे! प्रबोधम् ॥ ८ ॥

5. पुलम्बिन

सम्यग्विकस्वरनिकुञ्जपतत्रिणोऽपि
नर्दन्ति, रात्रिरगमत् , समभूत्प्रभातम् ।
प्राग्गर्जदम्बुधिरवः प्रसृतस्समन्तात् ,
संहृष्टपुष्पलिडुपासितपुष्पजालैः ॥ ९ ॥

संदृब्धमाल्यनिकरं स्वकरे दधानाः
त्वत्पादयुग्मनतये विबुधा इतास्तत् ।
लङ्काधिनाथकृतदास्यसमग्रधाम्नि
नाथास्मदीय! शयनाद्भजतात्प्रबोधम् ॥ १० ॥

6. इरवियर्

सूर्या महारथयुता इम एव, रुद्रा-
श्चैकादशापि जगतोऽस्य धुरं दधानाः ।
षड्वक्त्र एष पुनराप्तमयूरवाहोऽ-
प्यष्टाविमे च वसवो मरुतस्समेताः ॥ ११ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सङ्गीतनर्तनयुताश्च रथैश्च वाहैः
देवध्वजिन्यपि समेत्य च सङ्गशोऽस्ति ।
सान्द्रा महाद्रिनिभधाम्नि पुरस्तवैषा
रङ्गाधिनाथ! शयनाद्भजतात्प्रबोधम् ॥ १२ ॥

7. अन्दरत्तमरर्हळ्

अण्डान्तरस्थविबुधाः परिवारसङ्घाः
एते तपस्विमुनयो मरुतस्तथामी ।
इन्द्रस्य हस्त्यपि स च स्वयमागतोऽसौ
देवास्मदीय! तव धामपुरोविभागे ॥ १३ ॥

विद्याधराकुलितसुन्दरघर्षणेन
यक्षाश्च दिव्यपदसंश्रयणे व्यमुह्यन् ।
द्यौर्भूमिरन्तरविनाकृतमस्ति तस्मात्
रङ्गाधिनाथ! शयनाद्भजतात् प्रबोधम् ॥ १४ ॥

8. वम्बविळ्

दातुं सुगन्धभरिताः शतपर्विकाश्च
देवा निधीनथ च गौः, मुकुरादिकानि ।
देवार्चनोपकरणानि करे दधानाः
सन्मौनिनः प्रथिततुम्बुरुनारदौ च ॥ १५ ॥

अत्राविशन् पुनरिमे, रविरप्यभासीत्
भासो निजाः प्रसृमराः कलयन् प्रदीप्ताः ।
अन्धन्तमोऽम्बरतलादपयाति दूरं,
रङ्गाधिनाथ! शयनाद्भजतात् प्रबोधम् ॥ १६ ॥

9. एदमिल्

ढक्काश्च दोषरहिता अथ चैकतन्त्री
वीणा मृदङ्गमुरली विरुवन्ति दिक्षु ।
गानेन किन्नरगणा गरुडाश्च नक्तं
गन्धर्वबृन्दमपरे सुतपस्विनोऽमी ॥ १७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

देवाश्च चारणयुता अपि यक्षसिद्धाः
　श्रीपादसेवनकृतो मिलिता विसंज्ञाः ।
तस्माद्दिवा प्रपदनाय दयस्व तेषां
　रङ्गाधिनाथ! शयनाद्भजतात् प्रबोधम् ॥ १८ ॥

10. कडिमलर्

पद्मान्यमूनि सुरभीणि विकस्वराणि,
　भास्वान् स्वनज्जलनिधावुदयं गतोऽयम् ।
ढक्कावलग्नललिता वनिता निमज्ज्य
　संमर्द्य वारिरहितं चिकुरं विधूय ॥ १९ ॥

वस्त्रं प्रधार्य निरगुः, कनकापगाप्र-
　श्रीरङ्गनाथ! ललितग्रथितैस्तुलस्याः ।
माल्यैः पिटेन च समुल्लसदंसदेशं
　दासं 'दयाविषय एष' इति प्रसाद्य ॥ २० ॥

भक्ताङ्घ्रिरेणुममुमावह दास्यवृत्तौ
　त्वद्भक्तिमत्सु, शयनाद्भजतात् प्रबोधम् ।
[प्राबोधिकी स्तुतिरियं किल रङ्गभर्तुः
　भक्ताङ्घ्रिरेणुमुनिना प्रणयात् प्रणीता] ॥ २१ ॥

———

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# भारुण्डगीतानि*

## एकनाथेन विरचितानि

अनु० विश्वनाथ केशव छत्रे

[जाति पादाकुलक]

(१) आवेदनपत्रम्

१ नमोऽस्त्वनन्त ब्रह्माण्डपते, सर्वशक्तिमन् त्रिभुवनकीर्ते ।
दासावेदनमिदं श्रूयताम् यथोचिताज्ञा चाशु दीयताम् ॥

२ भवदादेशात्कायाग्रामम् प्राप्तो जीवाभिधभृत्योऽयम् ।
सोत्साहं बहु तेन त्वरितम् कार्यं प्रारब्धं च नियुक्तम् ॥

३ परं वणिक्श्रेष्ठो दम्भाजिर् महाजनश्चायं कामाजिः ।
मनोदेशमुख-ममतानारी क्रोधारक्षकगणाधिकारी ॥

४ इत्येते मत्ताश्च प्रबलाः वर्तन्ते स्वच्छन्दं सकलाः ।
सर्वथैव तै रुद्धं कार्यम् रंहस्तेषां प्रभोऽनिवार्यम् ॥

५ सपदि जरासन्धस्त्वायातः यमाजिराजस्याग्रिमदूतः ।
'भवदाज्ञावशयमागमोऽयम्' करोति दूतो घोषं चैवम् ॥

---

*साधुवर्यस्य एकनाथस्य विविधवाङ्मये भारुण्डगीतानि विशेषेण लोकप्रियताम् अवाप्नुवन्, गेयत्वात् सामान्यपरिचितविषयत्वाच्च । अन्धः, मूकः, पंगुः बधिरः ज्यौतिषिकः, अजः, श्वा, शुकः, उक्षा, वृश्चिकः, कण्डनं, पेषणं, भूतं, आपणः, वधूः, वरः, श्वश्रूः इत्यादयः तेषां विषयाः ।

भारुण्डो नाम द्विमुखः पक्षी (काल्पनिकः स्यात्), तथा भारुण्डगीतं द्व्यर्थवाहकम् । वाच्यार्थो व्यावहारिकः विनोदाय । गूढार्थः परमार्थसाधनाय च ।

गानप्रियः सामान्यमनुष्यः । गीतं च पठनस्मृतिसुलभम् । अतः दीनाज्ञबान्धवान् अध्यात्मोन्मुखान् विधातुं एकनाथेन ईदृशानि गीतानि रचितानि । तज्ज्ञाः गायकाः ग्रामाद्ग्रामं भ्रमित्वा यात्रोत्सवेषु इमानि गीतानि गीत्वा गूढार्थं विशदीचक्रुः । बाह्यतः विनोदप्रचुराणि इमानि गीतानि जनमानसानि सद्यः आचकृषुः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(२) अभयपत्रम्

१ अयोध्यापति-श्रीरामेण, दासो विज्ञाप्यते नृपेण ।
भवदावेदनपत्रं प्राप्तम् वृत्तमशेषं चापि ज्ञातम् ॥

२ कामकोपममतादम्भाद्यैः आरब्धं तुमुलं यैर्दैत्यैः ।
ब्रह्मपुरीमार्गं रुन्धन्तः सुतर्जितास्ते बहुबलवन्तः ॥

३ आत्मानात्मविवेकः सचिवः स्वानुभवः सेनानीः कुशलः ।
दैवी सम्पत् प्रबोधसैन्यम् इत्येतत् प्रहितं मेऽनन्यम् ॥

४ क्षणार्ध एवाक्रमकान् हत्वा प्रमत्तलोकानपि ते जित्वा ।
सुव्यवस्थां ग्रामे शान्तिम् स्थापयन्ति, मा, मा, भज भीतिम् ॥

५ वर्णाश्रमविधि-पालन-साधन- चतुष्टयाश्रय-साधुसमागम- ।
नवविधभक्ति-पथे ते निहिताः भवद्वशाः स्युः समस्तमत्ताः ॥

६ ब्रह्मपुरीपथमाक्रममाणः नियुक्तसेवामपि कुर्वाणः ।
लप्स्यस्यस्मत्कृपाप्रसादम्, शश्वत् पदमपि विना विवादम् ॥

(३) तर्जनपत्रम्

१ देहग्रामाधिकारिवर्गः तर्ज्यते मया प्रभुणा सर्वः ।
जीवाजिवशैः सर्वैर्भाव्यम् तत्साहाय्यं सकलैः कार्यम् ॥

२ बुधाजि-चित्ताजीतीदक्षाः, नरा महार्हाः कार्ये दक्षाः ।
अपसार्यैतान् गतं शासनम् त्वहङ्कारपन्तस्याधीनम् ॥

३ द्वेषविकारोन्मादकुतर्काः, मूर्खाज्ञानभ्रमाविवेकाः ।
आशातृष्णामायाचिन्ताः, कुबुद्धिनिद्राममताहन्ताः ॥

४ भृत्यैरित्येतैस्तु समस्तः ग्रामो नव्यैर्हा ! उद्ध्वस्तः ।
निःसार्यैतानिह निर्दिष्टाः विनियोज्याः पूर्वा मेऽभीष्टाः ॥

५ धैर्यं सत्यं सात्विकवृत्तिः विवेक आनन्दश्च विरक्तिः ।
दया नम्रता क्षमा सुबुद्धिः शान्तिरुन्मनीस्थितिः समाधिः ॥

६ इत्येता मम दासदासिकाः कार्ये योज्यास्त्वरितं नैकाः ।
आज्ञाभङ्गे प्रवर्तमानः दण्डं प्राप्स्यति कृतावमानः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(४) ब्राह्मणवृषभयोः

ब्रा०—रे, रे, उक्षन्नायाहीतः ।
वृ०—किमहं वद रे मूढाऽऽहूतः ? ॥

ब्रा०—निर्बुद्धस्त्वं मौर्ख्यागारम् ।
धर्षति को नु पशो तृणभारम् ? ॥

वृ०—त्वमेव धर्षकं[2] इति खलु सत्यम् ।
विमृश्य सम्यक् पश्चाद् वाच्यम् ॥

ब्रा०—कियानुद्धतो ननु पशुरेषः ॥

वृ०—अस्य दृश्यतां ज्ञानं विदुषः ॥

ब्रा०—पशुरीदृक्षः सदने नेष्टः ।
वृ०—वृषं[3] विना संसारः कष्टः ॥

ब्रा०—वृषेण[3] कार्यं किं सुभगेन ? ।
वृ०—यात्रा[4] कस्य तु साहाय्येन ? ॥

ब्रा०—वयं ब्राह्मणास्तु तपोनिष्ठाः ।
वृ०—परं[5] मादकद्रव्यासक्ताः ॥

ब्रा०—नित्यं स्नात्वा वयं विशुद्धाः ।
वृ०—बहिर्विशुद्धा अन्तर्मलिनाः ॥

ब्रा०—[6]श्रेष्ठता तु नो न मनाङ् नष्टा ।

---

१. सुन्दरीं परांगनां परवित्तं च दर्शनमात्रेण मनसा उपबुभुक्षुः ।

२. एकनाथकाले वृषः अत्यवश्यः पशुः प्रत्येकगृहे कृषिकर्मप्रधाने सति विविधोपयोगित्वात् ।

३. वृषस्थाने महिषान् अश्वान् वा पालयिष्यामः अधिकधनव्ययेनापि ।

४. यात्राप्रसंगे उरुभारवहने च वृषस्थाने नेतरपशुः तादृगुपयोगी स्यात् ।

५. तीर्थस्थानेषु वैदिकब्राह्मणाः सायं 'भांग'-पानं कुर्वन्ति ।

६. वर्णानां ब्राह्मणो गुरुः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वृ०—अस्मद्विष्टा तु युष्मदिष्टा ! ॥

ब्रा०—विरम, रेऽन्यथा सहस्व दण्डम् ।
वृ०—पश्य शृङ्गयुग्मं मे चण्डम् ! ॥

ब्रा०—दास्ये पृष्ठे प्रचण्डभारम् ।
वृ०—प्रक्षेप्स्ये त्वामरण्यपारम् ।

एकनाथः—गौरीहरयोः प्राज्ञवृषोऽयम् ।
एकजनार्दनभक्त्या भद्रम् ॥

(५) जयहरगीतम्

(जोहार)—चाण्डाल्या[८] आत्मवृत्तम्

नमो नमो मे मातापितरौ ॥ ध्रु० ॥

चाण्डाली नमतीयं चरणम् नीयतां प्रभुर्मा विस्मरणम् ।
नाहं क्षुद्रा जात्याप्यधमा श्रूयतां क्षणं मद्गुणमहिमा ॥

विष्णुविधिहराद्या गुणहीनाः मयैव चैते विहिताः सगुणाः ।
निराकार ईशो मे भर्ता सुप्तेऽस्मिन् साधूंश्च प्राप्ता ॥

एकाकी[९] मे सुचिरं नाथः तस्मान्मनसि बभूवास्वस्थः ।
आहूताहं त्वरया याता स्वापितो मया शिशुरिव भर्ता ॥

सृष्टं च ब्रह्माण्डं सत्ता पत्युरेव मे परं समस्ता ॥

---

७. प्रत्येकद्विजसदने प्रातः भूमिः महानसे देवागारे च विशेषतः गोमयेन विलिप्य शुद्धीक्रियते ।

८. मायायाः

९. एकाकी न रमते, बहु स्याम् प्रजायेय इति श्रुतिः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# श्रीतुकारामगाथाः

अनु० एस्. एल्. तम्बे

अभंगः १५६

शास्त्राणां यः सारो वेदानां यो मूर्तिः । स मम वयस्यः प्राणसखः ॥ १ ॥
अधिकान् न मन्ये तस्मादन्यान् कांश्चित् । सर्वं भवति सांगं नाम्नैकेन ॥२॥
सगुणं निर्गुणमंगे एते यस्य । स एवास्माभिः कुरुते क्रीडाम् ॥ ३ ॥
तुको ब्रूते वयं विधेर्जनयितारः । स्वयंभुवा न स्मो विनिर्मिताः ॥ ४ ॥

अभंगः १५८

केन कृतो वद त्वदीयांगीकारः ? निश्चितिर्महती त्वया मता ॥ १ ॥
केन त्वामुद्दिश्य कृत उपदेशः ? मा गच्छ शरणं विठ्ठलमिमम् ॥ २ ॥
पृष्ठरक्षकस्ते तदा को नु भवेत् ? धरणीं पातयेद्यदा यमः ॥ ३ ॥
व्यर्थं वञ्च्यसे किं कालः क्षपयत्यायुः । दिने दिने बलं क्षीणं भवति ॥ ४ ॥
तुको ब्रूते नरमुपदिशत केऽपि । विस्मृतोऽस्ति हरिः पिता माता ॥ ५ ॥

अभंगः १९०

निजौषधप्रभावेण वैद्या रुग्णस्य जीवितम् ।
अरक्षिष्यन्यदि तदा देवं ध्यायेन्नु को नरः ॥ १ ॥

दैवतस्य च संचारः नरदेहे भवेद्यदि ।
संकटानि तदा तत्र किं स्थास्यन्ति मनागपि ॥ २ ॥

अभीष्टबाह्यविधिना पुत्राः कन्या भवन्ति चेत् ।
उद्वाहेन तदा कार्यं भवत्यावश्यकं स्त्रियः ॥ ३ ॥

युक्तमस्य विचारस्य समाधानपरोत्तरम् ।
दातुं शक्नोति भगवान् तुकस्य सर्वदो हरिः ॥ ४ ॥

अभंगः १९९

अन्नस्य गंधेन यदि शाम्यति क्षुधा । कथं तर्हि पाका गृहे गृहे ॥ १ ॥
स्वहितमाचरत जनाः सर्वे यूयम् । वाचा स्मरत नित्यं रामं रामम् ॥ २ ॥
उदकदर्शनाद् यदि शाम्यति तृष्णा । किमर्थं संचयो गृहे गृहे ॥ ३ ॥
छायाया दर्शनान् न विंदति सुखम् । यावन्नोपविशति नरस्तले ॥ ४ ॥



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गानश्रवणाभ्यां हितं संपद्यते । यदि वसति चित्ते दृढभावः ॥ ५ ॥
तुको ब्रूते भवसि भावेनैव मुक्तः । उपायं चिन्तय ज्ञानप्राप्तेः ॥ ६ ॥

अभंगः २०४

अतीवार्ता भृशं तप्ताः परिस्थित्या जनाश्च ये ।
आत्मीयभावनां तेभ्यः यो दर्शयति मानवः ॥ १ ॥

साधुः स एव मन्तव्यः देवस्तत्र न संशयः ।
अन्तर्मृदु यथैवास्ति नवनीतं तथा बहिः ॥ २ ॥

ज्ञातव्यं सज्जनस्यापि चित्तं मृदु तथाविधम् ।
आत्मीयो यस्य ना नास्ति दयां तस्मिन्करोति यः ॥ ३ ॥

स्ववत्से यां दयां कुर्यात् दासे दास्यां तथाविधाम् ।
स एव मूर्तो भगवान् इति तं मन्यते तुकः ॥ ४ ॥

अभंगः २२५

निजां कटिं दृढं बद्ध्वा कलिकालस्य संमुखः ।
संप्रहाराय संनद्धः निर्भयः संचराम्यहम् ॥ १ ॥

मया विरचितो मार्गः भवसागरपृष्ठके ।
तेन मार्गेण गच्छेयुः जना विश्वासधारकाः ॥ २ ॥

लघवो वा महान्तो वा नरा नार्योऽपि सर्वथा ।
आगच्छन्तु पथाऽनेन नूनं निःशंकचेतसा ॥ ३ ॥

उद्योगिनो निरुद्योगाः जपिनस्तापसास्तथा ।
पन्थानमनुगच्छन्ति विमुक्ताश्च मुमुक्षवः ॥ ४ ॥

प्रेषितं हरिणा सर्वलोकानामुपकारकम् ।
तुको ब्रवीति देवस्य मंगलं नाम साधनम् ॥ ५ ॥

अभंगः २२६

एतदर्थमिह प्राप्ता वयं वैकुंठवासिनः ।
अब्रुवन्नृषयो वाचं सत्यभावप्रदर्शकाः ॥ १ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मार्जयामः सतां मार्गं जगत्कंटकसंकुलम् ।
तेषामुच्छिष्टभागस्य शेषं सेवामहे वयम् ॥ २ ॥

अर्थो लीनः पुराणेषु शब्दज्ञानं सुनिष्फलम् ।
विषयाणां प्रलोभेन व्यर्थः साधनसंग्रहः ॥ ३ ॥

पांडुरंगस्य भजनं घोषयामो महीतले ।
तद्दुंदुभिनिनादेन प्रकम्पेतान्तकः खलः ॥ ४ ॥

सर्वांल्लोकान्समुद्दिश्य तुकारामो ब्रवीति यत् ।
हरिनामप्रणादेन पूरयध्वं दिगन्तरम् ॥ ५ ॥

अभंगः २३५

यद्धनं लब्धुमिच्छामस्तन्नास्ति तव संग्रहे ।
कस्माद्भीतोऽसि तर्हि त्वं पांडुरंग, न कारणम् ॥ १ ॥

विचिंतय त्वं जानासि नाम्ना तुष्टा वयं तव ।
अन्यत् किंचिन्न कांक्षामः केवलं नाम नः प्रियम् ॥ २ ॥

ऋद्धिसिद्धी वर्जयित्वा दातव्यं न च ते धनम् ।
अस्मन्मतेन तृणवत् भक्तिस्तस्माद्गरीयसी ॥ ३ ॥
तुको ब्रूते वयं यामः पद्भ्यां वैकुंठनायकम् ।
तत्र लप्स्यामहे नूनं दर्शनस्यामितं सुखम् ॥ ४ ॥

अभंगः २३८

तव चरणसुखं वर्णनस्यातीतम् । ईदृशोऽनुभवो नास्ति तव ॥ १ ॥
वचनसत्यता कथं प्रदर्श्यताम्? । अमृतमेव वेत्ति स्वीयान् गुणान् ॥ २ ॥
आवां स्वः साक्षिणौ उभौ मातापुत्रौ । उभौ जानीवहे सुखं सत्यम् ॥ ३ ॥
तुको ब्रूते मोक्षे निर्विण्णाःस्मो वयम् । एवं न गोपाल वेत्सि कथम् ॥ ४ ॥

अभंगः २३९

तिष्ठसि त्वं स्थापयित्वा कटिदेशे करावुभौ ।
विलोक्य रुचिराकारं तव, मे जायते सुखम् ॥ १ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदा न किंचिच्छक्नोमि विहातुं चरणौ तव ।
मुखेन गीतं गायामि करतालेन संयुतम् ॥ २ ॥

चित्तस्यैकाग्रतां प्राप्य प्रेम्णा नृत्यामि मंदिरे ।
रूपं मनोहरं दृष्ट्वा नामघोषं करोम्यहम् ॥ ३ ॥

जायते यत्समाधानं तेन तुल्यं न किंचन ।
विविधं सृष्टवस्तूनां सौन्दर्यं न च तादृशम् ॥ ४

न मंदिरं न वोद्यानं न वस्त्रं न च मण्डनम् ।
तुको ब्रूते प्रभो रूपं गुणाश्चित्तहरा यथा ॥ ५ ॥

अभंगः २४०

अन्येन संप्रति न नः प्रयोजनम् । अर्थशून्यं वचः को जल्पति ॥ १ ॥
सुखदुःखे समे तथा पुण्यपापे । एतत्सुविज्ञातमसंशयम् ॥ २ ॥
तुकेनार्पिता स्ववागनन्ताय । इदानीं न कार्यं वाचा किंचित् ॥ ३ ॥

अभंग· २५३

यदि केऽपि मम ग्रीवाच्छेदं कुर्युः । तर्हि मा वद जिह्वे हरेरन्यत् ॥ १ ॥
सकलानीन्द्रियाणि प्रार्थयामि यथा । दूरं मा व्रजत पांडुरंगात् ॥ २ ॥
कर्णौ शृणुयातां नेतरेषां वार्ताम् । इतरन् न द्रष्टव्यं लोचनाभ्याम् ॥ ३ ॥
चित्त त्वया नित्यं स्थातव्यं समीपे । भूत्वा सुनिश्चितमेकविधम् ॥ ४ ॥
पादौ हस्तौ कुरुत कार्यमेतदेव । गच्छतं प्रणमतं श्रीविठ्ठलम् ॥ ५ ॥
तुको ब्रूते नास्ति भयस्य कारणम् । अस्माकं त्राताऽस्ति नारायणः ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## परमानन्दानुवादः*

अनु० जगन्नाथशास्त्री

आशां त्वदीयां मनसि प्रधार्य
प्राप्तोऽस्मि तेऽहं प्रतिहारभूमिम् ।
दासं किमर्थं नयसे वृथा त्व-
मुदासभावं शरणागतं माम् ॥ १ ॥
दग्धं त्रितापैर्मम रागनीरं
लेभे न निद्रां भवता विनार्तः ।
तृषावृतो द्वारि विषेण घूर्णन्
समागतो जन्मशतैश्च तेऽहम् ॥ २ ॥ दासं किमर्थं—
शान्तं मनः स्वेन्द्रियवर्गयुक्तं
तथापि मे दीपितरागदीप्तिः ।
नोदेत्यभावेन विदग्धचेतः
सिञ्चामृतेनैव हि मामनाथम् ॥ ३ ॥ दासं किमर्थं—
तीर्त्वाशया क्रोशसहस्रभागान्
प्रत्यागतः शून्यकरः पुनश्च ।
यथा तथा द्वारि तवैव नूनं
साध्नोम्यहं तद्भवतः स्वलाभम् ॥ ४ ॥ दासं किमर्थं—
स्मृत्या सदा वञ्चित एव दासः
सोऽहं च ते दृष्टिपथं गतोऽस्मि ।
दशा च मे ते श्रुतिगा त्वनाथः
वदामि किं राजकुले गतस्ते ॥ ५ ॥ दासं किमर्थं—
यच्छोभनं साधु सुकर्म कारय
प्राप्तं पुनर्जन्मशतं निवारय ।
अभ्यासयोगेन जगत्यनाथम-
प्यानन्दकन्दं वह मां प्रभो परम् ॥ ६ ॥ दासं किमर्थं—

---

*काश्मीरभाषायां रहस्यवादगीतिकाव्यकर्तृषु प्रसिद्धः परमानन्दः काश्मीरेषु शतकचतुष्टयात् पूर्वं बभूव । मार्ताण्डतीर्थवासी महामना एष लल्लादेवीव अध्यात्मभावव्यञ्जकैर्गीतैः काश्मीरभाषायाः कामपि नवीनतमामाभामाधत्त । तदीयगीतेभ्यः कानिचिदत्र भक्तियोगविषयकाणि संस्कृतेऽनूद्य दत्तानि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## श्रीरहीम्-अनुवादः*

अनु० जगन्नाथशास्त्री

मुनीन्द्रभार्या पतिशापतप्ता
तीर्णा भवाब्धेः रजसेति मत्वा ।
स्नात्वा गजस्तद्रज एव चिन्वन्
धूल्या विलिप्तं कुरुते स्वमङ्गम् ॥ १ ॥

कुलं दशां वै समयं विचिन्त्य
प्राप्नोति मानं जगतीह जन्तुः ।
दीनं त्वनाथं च विना त्वयैव
मानं करोतीह च कः प्रभो मे ॥ २ ॥

स एष धन्यः पुरुषो हि लोके
योऽकिञ्चनं वै कुरुते सहायम् ।
श्रीकृष्णचन्द्रेण हि किं सुदामा
समर्हति प्राप्तुमसौ स्वमैत्रीम ? ॥ ३ ॥

सदैव भाव्यं प्रबलं वदन्ति
ज्ञातुं न तत्कोऽपि भवेत्समर्थः ।
दग्धुं न तत्कोऽपि भवेत्समर्थः
समर्थ आसीद् भगवान् स रामः ॥ ४ ॥

भाव्यं यदि स्यात्पुरुषस्य हस्ते
मृगानुसारी न भवेच्च रामः ।
दशाननो नैव हरेच्च सीतां
दुर्भाग्यकाले विपरीतबुद्धिः ॥ ५ ॥

---

*खानखानः अब्दुल् रहीम् सम्राजोऽकबरस्य सभानवरत्नेषु अन्यतमः संस्कृत-हिन्दी-पारसीकभाषासु निपुणः परोपकारी दानशीलश्च बभूव । अकबरपुत्रेण जहाङ्गीरेण हृतसर्वस्वः कारावासेन दण्डितः चित्रकूटपर्वते कालं निनाय । अस्य दोहापद्यानि ज्ञान-नीति-भक्ति-शृङ्गारपराणि; ग्रन्थाश्चास्य 'रहीम्-सतसई' 'रासपञ्चाध्यायी', 'शृङ्गारसोरठ' इत्यादयः प्रसिद्धाः । स्थालीपुलाकन्यायेन तत्पद्येभ्यः कानिचिदनूद्यात्र दत्तानि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## जपा-मालाकारौ*

चि. द्वा. देशमुखः

उपवने पवनेरितनर्तना
विकचरक्तजपाकलिका नवा ।
युवजनोचितदर्पभराहसत्
समवलोक्य पुरःस्थितमालिनम् ॥ १ ॥

मनसि सा कुरुते स्म मदाकुला
"न जरया विकलाखिलविग्रहः ।
चिरमयं भविता नु धरातले
शमनपाणिवशं तु गमिष्यति" ॥ २ ॥

उपचितावयवा ववृधेऽथ सा
मलयमाधवमारुतपायिनी ।
पुनरवेक्ष्य वलीवृतगात्रकं
तमवदद्वदनोल्लसितस्मिता ॥ ३ ॥

"नियतमेष मुमूर्षुरहोऽचिरात्
परिणतोऽयमतीव हि दृश्यते" ।
अथ परेद्यवि सा कलिकानशत्
सहिमपातसमीरणसंहृता ॥ ४ ॥

स मृदि तां मृदिताखिलकोमल-
च्छदचयां सदयं निचखान च ।
सुभगता कलिकात्र मता तथा
नियतिकालमवेत च मालिनम् ॥ ५ ॥

---

*आस्टिन् डाब्सन्नामकस्य आङ्ग्लकवेः 'A Fancy from Fontenelle' इत्याख्यस्य खण्डकाव्यस्यानुवादोऽयम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## निर्दया देवी*

डा० वे. राघवः

"आः किं तापयतु त्वा-
मेकाकी पाण्डुरो भ्रमसि ।
नडिनी सरसि म्लाना
न च गायति कोऽपि विहगोऽत्र ॥ १ ॥

आः किं तापयतु त्वां
दुर्जात ! व्यसनकर्शितोऽस्येवम् ।
व्रीहिचितं जन्तुबिलं
संपूर्णो धान्यलावोऽद्य ॥ २ ॥

ईक्षे तव नयनाब्जं
दुःखज्वरतुहिनसंभरितम् ।
वर्णः कपोलयोस्ते
पतति म्लानो जवेनासौ ॥ ३ ॥

(वीरः—)

"शाद्वलभूमिषु कामपि
फुल्लश्रियमापमप्सरःप्रभवाम् ।
आयतकबरभरां लघु-
चरणामुद्भ्रान्तलोचनद्वन्द्वाम् ॥ ४ ॥

मालामगुम्फमस्याः
शिरसो वलयांश्च गन्धिनीं काञ्चीम् ।
रक्तेव मामपश्यत्
मधुरं मणितं च सा व्यतनोत् ॥ ५ ॥

वल्गिनि वाजिनि मम तां
न्यवेशयं, नेतरदपश्यम् ।
पार्श्वे विवलितकैस्सा
गायन्त्यासीद्धि किन्नरीगीतिम् ॥ ६ ॥

---

*कीट्स - नामकस्याङ्ग्लकवेः 'La Belle Dame Sans Merci' इति ख्यातस्य खण्डकाव्यस्यानुवादोऽयम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कन्दं स्वादु ददौ मे
गिरिमधु फलचित्रसरसपाकांश्च ।
चित्रगिरा स्फुटमवदत्
'सत्यं त्वां कामयेऽह'मिति ॥ ७ ॥

निजगह्वरमनयन्मां
तत्र व्यलपच्च दीर्घनिःश्वसितैः ।
अधरार्पणैरमुद्रय-
मुद्भ्रान्ते लोचने तस्याः ॥ ८ ॥

तल्लालनेन सुप्तः
तत्राहं स्वप्नमेकमद्राक्षम् ।
शिशिरे दुर्गनितम्बे
धिक् ! चरमः स्वप्न आसीन् मे ॥ ९ ॥

पाण्डून्नृपान् नृपसुतान्
योधान् सर्वानपश्यमापाण्डून् ।
ते चुक्रुशुः — 'भवन्तं
निर्दयदेवी वशे धत्ते' ॥ १० ॥

घोरोद्बोधनदीर्घ-
व्यात्तं क्षामं च तन्मुखमपश्यम् ।
बुद्धस्ततोऽस्मि शिशिरे
स्वमपश्यं दुर्गकटकेऽत्र ॥ ११ ॥

अत एवात्र वसामि
प्रतिभ्रमन्नेककः पाण्डुः ।
यद्यपि नडिनी म्लाना
न च गायति कोऽपि विहगोऽत्र ॥ १२ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## शालिगोप्त्री*

हरिहर त्रिवेदी

प्रेक्षस्वैनां शिखरिकटकावासिनीं शालिगोप्त्रीं
क्षेत्रोत्संगे विजनविपिनोपान्तभागेऽद्वितीयाम् ।
भावावेशप्रकटितरसं गीतमुच्चारयन्ती-
मद्रिद्रोणीमतनुगहनां पूरयन्तीं स्वरौघैः ॥ १ ॥

लूनं लूनं परिणतफलं सस्यमेकाकिनीयं
गानासक्ता स्वकरयुगलेनाञ्जसा सञ्चिनोति ।
रागेणास्याः सततममृतस्यन्दिनाऽऽकृष्यमाणः
तिष्ठात्रैव व्रज लघुपदन्यासमग्रेऽथवा त्वम् ॥ २ ॥

यात्राखिन्नान् पथिकनिवहान् सैकतेषु प्रविष्टान्
नैवं फुल्लावनिरुहतले ह्लादयेत् बुल्बुलोऽपि ।
नाप्यस्मिन्वा कुसुमसमये काकली कोकिलीया
दूरादेशात् स्तिमितजलधेः पारमुत्तीर्य याता ॥ ३ ॥

शोकाक्रान्तं किमपि विगतं दूरतो विप्रकृष्टं
वृत्तः कश्चित्समर उत वा स्यन्दतेऽस्या हि गीते ? ।
आहोस्वित्तन्मृदुतररवं वेद्यवस्तुप्रकीर्णं
व्याधिं हानिं रुजमपगतां भाविनीं वा व्यनक्ति ? ॥ ४ ॥

यो वा को वा भवतु विषयो, गानमस्याः कुमार्या-
स्तत्संवत्रेऽपरिणतमिव ध्वानयत्सानुदेशम् ।
कार्ये सक्ता, श्लथभरतनुं स्वे लवित्रेऽथवेयं
हित्वाभीक्ष्णं निभृतनिभृते गायने बद्धरागा ॥ ५ ॥

शृण्वन् शृण्वन् श्रवणमधुरं गीतमस्या मुहूर्तं
हर्षोत्कर्षात्कथमपि पुरो गन्तुमासं समर्थः ।
तस्या गानं श्रुतिपथबहिर्भूतमत्राद्रिशृङ्गे
चित्ते त्वेतत्सुचिरमभवत् केवलं ध्यायतो मे ॥ ६ ॥

---

*विल्लियं वेड्स्वोर्थ्-नामकस्य आङ्ग्लकवेः 'The Solitary Reaper' त्याख्यस्य खण्डकाव्यस्यानुवादोऽयम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## निकषोपलः

### संस्कृतपत्रिकाणां नेहरूस्मारकविशिष्टाङ्काः

संस्कृतरत्नाकरः, अखिलभारतीयसाहित्यसंमेलनेन प्रकाशितः १०३ए, कमलानगरम्, नवदेहली । १५-८-१९६४.

शारदा, पूना । आगस्ट्-अक्टोबर् १९६४.

भारती, जयपुरम् । १५. २, नवम्बर् १९६४.

अमृतलता, पारडी । १. ३. नवम्बर् १९६४.

उपरि निर्दिष्टाभिः पञ्चभिः पत्रिकाभिः नचिरात् कीर्तिशेषतां गतानां भारतमातुः प्रेष्ठपुत्राणां स्वतन्त्रभारतप्रथमप्रधानमन्त्रिणां श्रीजवाहरलालनेहरू-महाशयानाम् अनुभावपरिमलिता एकत्र, स्मृतिपवित्रिता अन्यत्र, वियोगास्रार्द्रा अपरत्र विशिष्टाः अङ्काः प्रकाशिताः ।

एतासु प्रथमं निर्दिष्टायां पत्रिकायां संस्कृतभाषामधिकृत्य यदुक्तं नेहरू-महाशयैस्तद् आमुखे मुद्रितम् । ततः अद्यत्वे प्रधानमन्त्रि-पदवीमलङ्कुर्वद्भिः नेहरूशिष्यभूतैः लालबहदूर्-महाशयैः प्रस्तावनोक्तिः । तदनन्तरं गद्यपद्यात्मका अञ्जलिबन्धरूपाः ६५ प्रबन्धा नेहरूविषयका दत्ताः । नेहरूचित्राणि च योजितानि । बहूनि नेहरू-वचनजातानि संकलय्य समर्पितानि । लेखकेषु मुख्याः राष्ट्रपतिः डा. एस्. राधाकृष्णन्, मुन्शी, काट्जू, अशोकमेटा, सेठ् गोविन्ददासः, केस्कर्, भक्तदर्शनः, अन्ये स्वदेशीया विदेशीयाश्च जननेतारः, काणेप्रभृतयः विद्यावन्तश्च । बृहत्प्रमाणा चेयं सञ्चिका ।

विपुले विचित्रकार्याकुले नेहरूजीविते तत्तद्व्यतिकरप्रदर्शकैरनेकैश्चित्रैः पूर्णः 'शारदा'पत्रिकाया नेहरू-अङ्कः । अत्रापि तमधिकृत्य तन्मृतिकाले विश्वनेतृभिर्विदेशीयैः प्रधानपुरुषैर्यद्यदुक्तं तदप्युद्धृतम् ।

एवमेव जयपुरात्प्रकाश्यमानाया 'भारत्या' नेहरूस्मारिका सञ्चिका, यत्र तस्य महापुरुषस्य अमरत्वापादकानि विश्वशान्त्युद्यमादीनि कार्याणि पद्यबन्धैः गद्यबन्धैश्च वर्णितानि विविधैर्लेखकैः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

'अमृतलता'-नाम्नी नूतना पत्रिका संस्कृतसेवा-वैदिकप्रचार-धुरन्धरैः सातवलेकरमहोदयैः स्वकीयस्वाध्यायमण्डलद्वारा नचिरादारब्धा । तस्याः तृतीयोऽङ्कः नेहूरूश्रद्धाञ्जलिरूपेण संपादितः । अत्र राष्ट्रपति-संपूर्णानन्द-श्रीप्रकाश-गोल्वल्कर् - प्रभृतिभिः, अन्यैः पण्डितैर्लेखकैश्च अनुताप आविष्कृतः, नेहूरूगुणातिशया वर्णिताः, स्वदेश-समुन्नतये विश्वशान्त्यै च तेन कृता सेवा बहुधा गीता ॥

## अन्ये विशेषाङ्काः

पत्रिकान्तरैः विषयान्तराण्यवलम्ब्य केचन विशिष्टाङ्काः प्रकाशिताः । 'गुरुकुलपत्रिकायाः' १९३-तमो विष्ण्वङ्कतया विनिर्गतः । अत्र संस्कृतविभागे पञ्चदश निबन्धाः विष्णुतत्त्वं, विशिष्य वैदिकं विचारयन्त उपन्यस्ताः । 'भारत्याः विपुलः कोऽपि विशिष्टाङ्कः (१५-६-७) आयुर्वेदविषयकः प्राप्तः । प्रसिद्धानाम् आयुर्वेदपारीणानां भिषगाचार्याणां श्रीजयरामदासस्वामिनामभिनन्दनग्रन्थरूपेण च निष्पन्नोऽयमङ्कः । तेषां जीवितपरिचयमारभ्य आयुर्वेदीया नानाविषयाः तत्तद्रोगस्वरूपादिका बहुभिर्वैद्यविद्वद्भिः परिशीलिताः सञ्चिकाया अस्या गौरवं पोषयन्ति ।

'संस्कृतरत्नाकरेण' शास्त्रिसम्माननार्थः विशिष्टाङ्कः यः प्रकटितः स समीचीनः प्रकाशते, यतः लाल्बहदूर्-महाशयः चिरात् अखिलभारतीय-संस्कृतसाहित्यसंमेलनेन सह स्वसंस्कृतप्रेम्णा संबद्धः । भारतद्वितीयप्रधान-मन्त्रिणां सत्कारार्थं प्रवृत्ता सञ्चिकेयं सम्यक् सन्दृब्धा बहुभिः लाल्बहदूर्-चित्रैः, तदीयलेखभाषणोद्धारैः, तदीयगुणोत्कीर्तनैश्च ॥

## नूतनाः पत्रिकाः

'अमृतलता' उपरि परिचायिता । अन्याश्च नवतया प्रकाशिताः पत्रिकाः काश्चन प्राप्ताः, या दृष्ट्वा समुच्छ्वसिति मानसं, यत्संस्कृतोत्साहः न भग्नः, किन्तु नवोत्थानेनात्मानमनवरतं कृतार्थयन् विजृम्भत एवेति । जब्बल्पुरात् 'ऋतम्भरा'-नाम्नी पत्रिका (४२९, पश्चिमनिमाड्गञ्ज्); 'ऋतम्भरम्'नाम

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पत्रिकान्तरं बृहद्-गुजरात-संस्कृतपरिषदः त्रैमासिकम् (अहमदाबाद्-६); पुण्यपत्तनस्थ-एस्.पि. कलाशालाच्छात्रैस्संपाद्यमाना संस्कृतादिनानाभाषामयी 'परशुरामीयाख्या'; भारतीयविद्याभवनात् मुम्बईतः समुन्मेषं प्राप्ता 'संवित्'-नाम्नी च। आसु परशुरामीयाख्या संस्कृतेन सह भाषान्तराण्यपि उपयुङ्क्ते। संविदभिधा विषयवैविध्येन संपादनसौन्दर्येण च अग्रगण्यतया समुल्लसति। सांप्रदायिकानि आधुनिकानि गद्यमयानि पद्यमयानि वार्तारूपाणि, कविसृष्टिं रूपाणि-इत्थं विविधानि विषयजातानि आसु व्यवह्रियमाणानि पुराण्यां वाण्य-कमपि नूतनं प्राणं जीवं च आदधते॥

## महाजनसंस्कृतकलाशालायाः सुवर्णमहोत्सवदीपिका

म. ज. सं. कलाशाला, पेरडाला, निर्चल् पोस्ट्, कुम्बूलामार्गः, कासर्गोड्, केरलाः। १९६३.

क्रि. १९१५-वत्सरे श्रीखण्डिगे ईश्वरभट्टाभिधैः स्थापितेयं कलाशाला संस्कृतविद्यायाः दक्षिणकन्नडप्रान्ते जीवातुभूता विराजते। अस्याः सुवर्ण-महोत्सवः १९६३-तमे वर्षे समभूत्, यदा प्रकाशितेयं सञ्चिका विद्या-स्थानस्यास्य वृत्तान्तनिवेदिका। रमणीयरीत्या संपादिता, बहुचित्रमण्डिता च॥

## जवाहरज्योतिः

हिन्दीप्रचारिणीसमित्या (छिन्दवाड़ा-म. प्र.) संकलय्य प्रकाशितम्।

अत्र यशःकायान् नेहरूमहाशयानधिकृत्य चत्वारः पद्यबन्धाः, तावन्तो गद्यबन्धाः, एकांकमल्पं नाटकमेकं, तस्य महात्मनो वचनानि च विंशतिपत्रमिते लघुनि पुस्तकेऽस्मिन् दृश्यन्ते॥

## श्रीनेहरूनिर्वाणकुसुमाञ्जलिः

रचयिता जगन्नाथः शास्त्री, डी. ए. वी. हयर् सेकण्डरी स्कूल्, रैणावरी, श्रीनगरम्।

एकविंशतिः शोकावेदिकाः नेहरूवियोगप्रेरिताः श्लोका अत्र समर्पिताः॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## श्रीरामदासगीता

एम्. रामकृष्णभट्टेन सन्दृब्धा । आनन्दाश्रमः, कासर्गोड्, दक्षिणापथः । रू. २.

श्री एम्. रा. भट्टस्य कवितोत्साहः प्रायो महात्मनामाध्यात्मिकमनुभावं मृगयते । अनेन पूर्वं श्रीरामकृष्णसहस्रनामस्तोत्रम्, शिवानन्दविलासः इत्यादिकाः कृतयो रचिताः । अस्मिन् ग्रन्थे अन्यस्य महापुरुषस्य उपदेशान् 'गीता'-नामकेन प्रसिद्धेन ग्रन्थप्रस्थानेन सङ्गृह्णाति । पूज्यपादाः रामदासमहात्मानः दक्षिणकन्नडदेशे प्रतिष्ठिताश्रमाः बहूनामन्तर्मुखानां भारतीयानां विदेशीयानां च गुरव आसन् । प्रत्येकं 'योग' इति निर्दिष्टाः चतुर्दशाध्यायाः अत्र निवेशिताः, ये ईश्वरं, सद्दर्शनं, गुरुं, सत्सङ्गं, श्रद्धां, शमं, प्रेम, भगवन्नाम, ध्यानं, प्रपत्तिं, तत्त्वसमन्वयं च परामृशन्ति । सरला शैली । आङ्ग्लानुवादसहिताः श्लोकाः ॥

## सूर्योदयः

(योगदर्शनाङ्कः) । ग्रन्थकर्ता-गोविन्दनरहरि वैजापुरकरः, एम्. ए., वेदान्तन्यायसाहित्याचार्यः । प्राप्तिस्थानम्- भारतधर्ममहामण्डलम्, नगत् गंज, वाराणसी ॥

सूर्योदयग्रन्थमालायाः भारतधर्ममहामण्डलेन प्रकाश्यमानायाः द्विचत्वारिंशत्तमवर्षाङ्कः योगदर्शनस्य भगवत्पतञ्जलिप्रणीतयोगसूत्रजालरूपस्य व्याख्यारूपः । अस्मिन् ग्रन्थे व्यासभाष्यतत्त्ववैशारद्यादिप्राचीनग्रन्थप्रतिपाद्यविषयाः नवीनशैल्या विस्तरेण प्रतिपाद्यन्ते । योगदर्शनं जीवेश्वरभेदं जीवनानात्वं चोररीकृत्य प्रवृत्तम् । अत एव शारीरकभाष्ये 'द्वैतिनो हि ते साङ्ख्याः योगाश्च' इति भगवत्पादैरुक्तम् । परन्तु यत्र विषये वेदविरोधो नास्ति तत्र ग्राह्यत्वमेव इति तत्रैव सूचितम् । अयं तु ग्रन्थकृत् योगदर्शनमेवाद्वैतानुगुण्येन निनीषति, यदाह 'परन्तु योगशास्त्रस्य एकोऽद्वितीयश्च पुरुषविशेषः ।' (पु. ३) इति । अन्ते च "कैवल्यावस्थामिमामधिगत्य अल्पज्ञानवान् जीवः सर्वज्ञपरमपुरुष-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

साक्षात्कारेण पुरुषे परमे विलीयते" इति (२५२)। न हि योगशास्त्रकाराः मोक्षे जीवलयमिच्छन्ति। अत्र च प्रामादिकाः विषयाशुद्धयः काश्चन प्रदर्श्यन्ते— (१) "भगवतः सूर्यस्य निस्सरणास्तङ्गमनस्वीकृतिः विकल्पज्ञानं, यतः वस्तुतः सूर्यो न निस्सरति नैव चास्तमेति पृथिवीगतिवशादेवं भाति" (पु. ६३-४)। इदं भ्रमज्ञानमेव न विकल्पः। (२) निर्विघ्नपरिसमाप्तिरूपमङ्गलार्थम् अथशब्दप्रयोगः (पु. १)। मङ्गलं समाप्तिफलकं न तु समाप्तिरूपम्। (३) अनुमानलक्षणं कस्यचिद्वस्तुनः पूर्वत एव ज्ञाने विद्यमाने, सति च तल्लक्षणज्ञाने वस्तुदर्शन-राहित्येऽपि तल्लक्षणज्ञानादेव तद्वस्तुसत्ताज्ञानमनुमानम्। (पु. ६) नहि व्याप्तिज्ञानं विना तल्लक्षणज्ञानमात्रादनुमितिः। शब्दाश्च 'तामसिक' 'राजसिक'-इत्यादयः विचारणीयाः॥ (एस्. सु. शास्त्री)

## शुद्धशाङ्करप्रक्रियाभास्करः

कर्ता-सच्चिदानन्देन्द्रसरस्वती। प्राप्तिस्थानम्-अध्यात्मप्रकाशकार्यालयः, होले नरसपूर् पोस्ट्, मैसूर्।

ग्रन्थोऽयं 'मूलाविद्यानिरास'-ग्रन्थकर्तृभिः श्रीसच्चिदानन्देन्द्रयतिभिः प्रणीतः। एते स्वामिनः पञ्चपादिका-विवरण-भामती-विवेकचूडामण्यादि-ग्रन्थानादरेण "श्रीशङ्कराचार्याणां मायाऽपरनाम्नी मूलाविद्या नाभिप्रेता, भ्रमज्ञानमेव भाष्याभिप्रेताऽविद्या, मूलाज्ञानं भाष्यसम्मतमिति वदन्तः साम्प्रदायिकाः भाष्यार्थानभिज्ञाः' इति स्वीये मूलाविद्यानिरासे प्रतिपादयन्ति। प्राचीनानां प्रक्रिया अशुद्धेति मन्वानाः स्वयं 'शुद्धशाङ्करप्रक्रियानामकं ग्रन्थं व्यरचयन्। अत एव ग्रन्थनाम्नि प्राचीनानां प्रक्रियायाः व्यावर्तनाय शुद्धेति पदं योजयन्ति। अस्य ग्रन्थस्य षष्ठसप्तमपरिच्छेदद्वयात्मकोऽयं ग्रन्थः। तत्र षष्ठपरिच्छेदे द्वैतविशिष्टाद्वैतप्रक्रियापेक्षया अद्वैतप्रक्रियायाः उत्कर्षं श्रुत्यनुसारितां विचारसहत्वं च प्रतिपादयन्ति। स्वोक्तिदार्ढ्यार्थं तत्र तत्र भाष्यवाक्यान्युदाहरन्ति। सप्तमे शाङ्करदर्शनं बौद्धदर्शनमेव प्रच्छन्नमिति वदतां मतान्तरीयाणाम् आधुनिकानां च केषाञ्चिदभिप्रायाननूद्य बौद्धग्रन्थोदाहरणेन

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदीयप्रक्रियाः आविष्कृत्य तत्प्रक्रियाम् अद्वैतप्रक्रिया न कलयापि स्पृशतीति स्पष्टीकुर्वन्ति । प्राचीनानाम् एतद्ग्रन्थप्रतिपाद्यविषयेषु न विवादः ।

(एस्. सु. शास्त्री)

## चतुस्सूत्री

(ब्रह्मसूत्रभाष्यालोचनम्) कर्ता-एम. वि. उपाध्यायः । प्राप्तिस्थानम् डभोइया पोल, वाडी, बंडौदा, गुजरात् ।

अयं ग्रन्थः श्रीशङ्कराचार्यरामानुजाचार्यवल्लभाचार्याणां ब्रह्मसूत्रभाष्याणि खण्डयित्वा नव्यया रीत्या ब्रह्मसूत्राणां व्याख्यानात्मकः । तत्र अथातो ब्रह्मजिज्ञासेत्यत्र अथशब्दः साङ्ख्ययोगदर्शनपठनानन्तर्यपरः । व्यासेन योगभाष्यं कृत्वैव ब्रह्मसूत्रप्रणयनात् योगशास्त्रानुसार्येवार्थः ब्रह्मसूत्राणामङ्गीकार्यः प्रकृतिपुरुषविवेकज्ञानादेव मोक्ष इति साङ्ख्ययोगपक्षः । तदनुसृत्यात्रापि ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति व्याख्येयम् । प्रकृतिपुरुषौ च ब्रह्मशब्दार्थः, द्वितीयसूत्रे यतः इति च प्रकृतिपुरुषोभयपरम् । याभ्यां उपादानानिमित्ताभ्यां जगतो जन्मादयः तद्ब्रह्मेत्यर्थः । अयं ग्रन्थकारः साङ्ख्यमतमेवात्र सूत्रेषूपनिबध्यते इत्यभिप्रैति । परं तु 'ईक्षतेर्नाशब्दम्, एतेन योगः प्रत्युक्तः' इत्यादीनि कथमर्थं व्याख्यास्यतीनि न जानीमहे । सर्वथा नव्योऽयं प्रकारः ॥

(एस्. सु. शास्त्री)

**महाभारते काव्यांशाः** (Elements of Poetry in the Mahābhārata).

रचयिता-राम करण शर्मा । प्रकाशकः—यूणिवर्सिटि आफ् कलिफोर्णिया, अमेरिका । मूल्यं डालर् - ५ ।

महाभारतस्यादिपर्व वनपर्व भीष्मपर्व च निरीक्ष्य तत्रत्यालङ्कारान् सुसूक्ष्मं विशकलय्य च आङ्ग्लभाषायां रचितोऽयं गवेषणप्रबन्धः पण्डितानां च सविशेषमादरमर्हति । अलङ्कारा एवात्र सविस्तरं निरूपिताः, तेषु च प्राधान्यमुपमायाः । उपमानतया व्यासेन स्वीकृतानां वस्तूनां विषयविभागश्चात्र सम्यक् प्रपञ्चितः ॥

(के. कु. राजा)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शतकसप्तकम्

(संस्कृतानुवादः) अनुवादकः ति. गु. वरदाचार्यः एम्. ए. श्रीनरसिंहसंस्कृतकलाशालायाः आन्ध्रजातीयकलाशालायाश्च भूतपूर्वाध्यक्षः, चिट्टिगूडूर, मछलीपत्तनम् । रू. १-५०.

अस्मिन् पुस्तके अन्तर्गतानि सप्त शतकानि नाम्ना-सुमतिशतकम् १. भास्करशतकम् २. श्रीकालहस्तीश्वरशतकम् ३. श्रीदाशरथिशतकम् ४. वेमनशतकम् ५. श्रीकृष्णशतकम् ६. श्रीनरसिंहशतकम् ७. इति ।

एतेषां मूलग्रन्थाः प्राचीनाः आन्ध्राक्षरमुद्रिताः प्रचारे वर्तमानाश्च । तेषां सप्तानामपि संस्कृतभाषायां विवर्तोऽयम् अतिललितया सरण्या विरचितः श्री. वरदाचार्यैः मुद्रितश्च । यद्यप्यनुवादग्रन्थोऽयमथापि स्वतन्त्रग्रन्थ इवैव पाठकानामुत्साहं जनयति ।

ईदृशा अनुवादाः शतकान्तराणां गद्यकाव्यानां वा अल्पीयसामल्यन्तमावश्यका एवाद्यत्वे पुनः संस्कृतभाषाभिवृद्धये ॥ (अ. मु. श्री.)

स्तुतिपुष्पोपहारः (मुक्तकस्तुतिमञ्जर्याख्यानुबन्धेन सहितः)

श्रीमहालिङ्गशास्त्रिणा विरचितः, साहित्यचन्द्रशाला, तिरुवालङ्गाडु (तञ्जावूर् डिस्ट्रिक्ट्, मद्रास् स्टेट्) । रू. ४.

इदमुपहारकर्ता प्रसिद्धः कविः । तदा तदा विरचितानां पद्यानामेकत्रावस्थानं पठितॄणामुत्साहमभिवर्धयेदिति एवंरीत्या परिष्कारः कविनैव कृत इति महानयमुपकारः, पद्यानामवतरणकालः कविनैवानेन प्रत्येकं संमुद्य प्रकाशितश्चात्रैव संयुक्तः । किञ्च संस्कृतप्रतिभायामस्य कवेः कृतिः तदा तदा प्रकटितैवेति विदन्त्येव वाचकाः । अत्र विद्यमानाः स्तुतयः—



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीविघ्नेश्वरवृत्तमालास्तवः, बृन्दावनाष्टकम्,
भावनिष्यन्दः, कुवलयाञ्जलिः,
शारदास्तुतिः, श्रीनटेशनवार्यास्तवः,
श्रीकमलाप्रपत्तिपञ्चाशत्, श्रीमीनाक्षीशतकम्,
श्रीत्यागराजनवरत्नमालिका, श्रीमायादेवीस्तुतिः,
दशावतारस्तोत्रम्, मुक्तकस्तुतिमञ्जरी,
भयहरणगोपालविंशतिः, (अ. मु. श्री.)

## स्तोत्राणि

### श्रीगणेशपञ्चरत्नादि

जेमिनिमुद्रणालयः, कुम्भकोणम्। ५० न. पै.

गणेशभक्तानां तत्पूजाकारिणामुपयुक्तोऽयं ग्रन्थः। अत्र गणेशपञ्चरत्नभुजङ्गस्तोत्रे, गणेशव्रतपूजार्चनादि च संस्कृतभाषया, संस्कृतलिप्या द्रमिडलिप्या च द्रमिडानुवादेन सह च दत्तानि। अन्यच्च, गणेशमाहात्म्यं, स्यमन्तकोपाख्यानं च द्रमिडभाषया उपन्यस्ते॥

### श्रीकामाक्षीनामत्रिंशत्

श्रीलक्ष्मीकान्तशर्मणा विरचितम्। आडुतुरै पेरुमाल् कोविल्, मद्रास् स्टेट्। ३० न. पै.

न केवलं काञ्चीपुरीनायिकां कामाक्षीं वर्णयत्स्तोत्रद्वयं, किन्तु काञ्चीविराजमानानां श्रीचन्द्रशेखरेन्द्रसरस्वतीनां स्तुतिपञ्चकं च मुद्रितमत्र।

### जयाशाशारदापञ्चस्तवी

रचयिता जगन्नाथ रिवू शास्त्री, श्रीनगरम्।

रचयितास्याः पञ्चस्तव्याः सञ्चिकायामस्यामेव कृतपरिचयः। अस्मिन् लघुग्रन्थे तद्रचितानि पञ्च स्तोत्राणि मुद्रितानि—श्यामास्तोत्रम्, भावोपहारस्तोत्रम्, त्रिपदास्तोत्रम्, पञ्चोपचारस्तोत्रम्, नवदुर्गास्तोत्रं च। सर्वं देवीविषयकमेव॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## श्रीसुब्रह्मण्यकर्णामृतम्

श्रीगोपालकृष्णविरचितम् । शक्तिविलासवैद्यशाला, करूर्, त्रिशिरःपुरी जिल्ला ।

११६—श्लोकघटितोऽयं सुरपुष्पमालास्तोत्रापरपर्यायः कुमारविषयकस्तुतिनिबन्धः । विविधैः वृत्तैः भावगर्भैः प्रासाद्यलङ्काराश्चितैश्च श्लोकै राजते । रचयित्रा तत्र तत्र टिप्पणी च दत्ता ॥

## सङ्गीतसुधातरङ्गिणी ।

रचयिता मधुसूदनदत्तवाजपेयी । ज्योतिःप्रकाशनम्, १३, कालिका गली, वाराणसी । ३० न. पै.

प्रायः स्तोत्रध्यानाद्युपयोगी रचनाकलापोऽयं गानार्थं रागनिर्देशपूर्वमुपनिबद्धः । यद्यपि शब्दशुद्धिविषये शिथिला तथापि गीतानुरोधेन सरला शैली । नेहरू-गान्धि-स्वातन्त्र्यादिविषयकाणि कतिचन पद्यान्यप्यन्तर्भूतानि ।

## नन्दचरितम्

कर्ता—शिरोमणि-सन्निधानं सूर्यनारायणशास्त्री, ४४, झीरा, सिकन्दराबाद्,, प्र. ।

सुविदितोऽयं ग्रन्थकर्ता, यस्य कृतयः प्रतिभायां समालोचिताः । अस्यायं नूतनः प्रबन्धः नन्दचरितं नाम । द्रमिडशैवसमये त्रिषष्टिनायनारिति ख्यातेषु शिवभक्तेषु अन्त्यजातिभवो नन्दनामा कश्चित् चिदम्बरनटेश्वरदर्शननित्योत्सुकः । तस्य चरित्रं वर्णयत्ययं लघुनिबन्धः सरलैः १२४-उपजातिपद्यैः ॥

## भर्तृदानम्

प्रणेता स एव ।

इदं च लघुकाव्यं मुक्कु - तिम्मननाम्ना कृष्णदेवरायास्थानकविना विरचितं पारिजातहरणनामकाव्यकथाम्, केनचिदज्ञातनामादिकेन कविना विरचिततुलसीमहिमनामकान्ध्रगेयकथां चाधारीकृत्य निर्मितम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदभगवता उपहारीकृतं पारिजातपुष्पमधिकृत्य रुष्टया सत्यभामया श्रीकृष्णं प्रति दर्शितकोपप्रकारः श्रीकृष्णेन कृतस्तदनुनयप्रकारश्च सम्यगभिवर्णितः काव्यपठितॄणां मनांस्यावर्जयति ।

कथान्ते तुलसीदलेन हरितोलनं रुक्मिणीसमर्थितम् अतीव चमत्कृतिमावहति ॥

किञ्च, स्वस्मिन् कृतापराधायै स्वमहिष्यै क्रुध्यन् श्रीकृष्णदेवरायः तद्रोष्टीं परिहरंश्च कञ्चित्कालमवर्तत, तत्समाधानविधानार्थं मुक्कु-तिम्मनाम्ना तदीयास्थानकविना विरचितं पारिजातहरणकाव्यमिति अत्र कथापरिचये विद्यमानोंऽशः "काव्यं यशसेऽर्थकृते" इति मम्मटभट्टसूक्तिं स्मारयति ॥

(अ. मु. श्री.)

"उत्तिष्ठत जागृत"

कर्ता मुनिश्रीबुद्धमल्लः । अणुव्रतसमितिः, १५३२, चन्द्रावल्रोड्, सब्जीमण्डी, दिल्ली-६ ।

अणुव्रतसमितिप्रतिष्ठापयितुराचार्यतुलसेः शिष्यः मुनिश्रीबुद्धमल्लः । संस्कृतप्रतिभायाः उपक्रमसञ्चिकायां युवजनमनःप्रबोधका उपदेशास्तदीयाः केचन उत्तेजकवाग्गुम्फैस्संदृब्धाः प्रकाशिताः । ते अन्ये चोपदेशाः ७१-संख्याका अत्र संकलय्य मुद्रिताः । विषया उदात्ताः, संक्षिप्तं भावनिबिडं च प्रतिपादनम् ॥

"चिन्तनाश्च चिदुन्मेषाः"

श्री-अरविन्दः । अरविन्दाश्रमः पाण्डिचेरि । रू. २.

अरविन्दयोगिनां भावनाः आङ्ग्लभाषायामाविर्भूताः संस्कृतेऽनूदिताः पूर्वं प्रतिभायां काश्चन प्रकाशिताः । ता अन्याश्च तादृश्यः अद्य पुस्तकरूपेण दत्ताः । वामपत्रेषु आङ्ग्लमूलं, दक्षिणपत्रेषु संस्कृतानुवादश्च मुद्रिते । मुद्रणमतीव मनोहरम् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## रूपकसमीक्षा

श्रीवेङ्कटेश्वरविश्वविद्यालयः, तिरुप्पदि । रू. ४.

श्रीवेङ्कटेश्वरविश्वविद्यालयसंस्कृतविभागे प्रतिवर्षं समीक्षासमितय आयोज्यन्ते यत्र विषयमेकमवलम्ब्य नानादृष्टिकोणेभ्यः परिशीलनानि प्रवर्त्यन्ते । प्रथमं कालिदाससमीक्षा प्रचलिता, यदीयाः निबन्धाः अत्र प्रतिभायां समालोचिताः । अत्र रूपकमधिकृत्य द्वादश आङ्ग्लभाषामया निबन्धाः समीक्षासमित्यां पठिता मुद्रिताः । सम्पादकेन यथा स्वभूमिकायामुक्तं तथा नात्र कश्चन अपूर्वो विषयः उपन्यस्तः । तथापि कलाशालासु संस्कृताध्यापकानां मध्ये ईदृशाः समीक्षात्मका उद्यमाः प्रचाल्यमानाः कमपि समुत्साहं विचारप्रावण्यं च वर्धयन्ति । वर्धापनीयोऽयं कार्यक्रमः ॥

## रुद्रैकादशिनी महारुद्रातिरुद्राणां वसोर्धारायाश्च फलश्रुतिः

श्रीसोमसुन्दरदीक्षितेन सङ्कलिता । वाणीविलासमुद्रालयः, पालूघाट् ।

आस्तिकानामनुष्ठानपराणामुकाराय सम्पादितोऽयं ग्रन्थः । अत्र संस्कृतमूलश्लोका द्रमिडानुवादेन दत्ताः । 'एकादशरुद्र'-'अतिरुद्र'-इत्यादिनामभिः प्रसिद्धा या शतरुद्रीयावृत्तिः, तस्याः फलश्रुतिः, कार्यक्रमः, नमकचमकहोमक्रमपट्टिका, रुद्राध्यायध्यानश्लोकाश्चात्र दृश्यन्ते ॥

## ब्रह्मर्षिदैवरातः

स्वाध्यायमण्डलम् (Study Circle), गोकर्णम्, उत्तरकर्णाटकम्, मैसूर् (लोकशिक्षण ट्रस्ट्, २, रेसिडेन्सि रोड्, बङ्गलूर् -२५) ।

संस्कृते, वेदे, अध्यात्मसाधने च निष्णाता 'ब्रह्मर्षिदैवरात' इति सुप्रसिद्धाः महाशयाः कीर्तिशेषाणां काव्यकण्ठ-गणपतिशास्त्रिणां शिष्याः, राष्ट्रपति-राजेन्द्रप्रसादादीनां परमादरपात्रभूताः गोकर्णे ब्रह्मचर्ययोगाश्रमस्य प्रतिष्ठापकाः, प्राचीनार्वाचीनवासनासफलितबहूद्यमविशेषाः, संस्कृतभाषणविरचनेषु निष्णाताश्च । एतेषां कृतिषु वेदार्थकल्पलतिका, छन्दोदर्शनं चोदाहरणमर्हतः । अस्मिन् पुस्तके आङ्ग्लभागे एतेषां चरित्रं, संस्कृतभागे स्थालीपुलाकनीत्या एतेषां कृतिभ्यः केचन अंशाश्च दृश्यन्ते । पूर्णतया कृतीनामेतासां प्रकाशनं दिदृक्षुः सहृदयलोकः नूनं समुत्सुको वर्तते ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

**इन्द्रयज्ञः**

रचयिता ब्रह्मर्षिर्दैवरातः । प्राप्तिस्थानं तदेव ।

गुरुवासिष्ठमुन्युपदिष्टः वैदिक इन्द्राराधनमन्त्रकल्पोऽयं सभूमिकः शिष्यैः दैवरातशर्मभिः व्याख्यातः । इन्द्रदेवतातत्त्वमत्र सूक्ष्मेक्षिकया विवृतम् ॥

**सुरभारतीसन्देशः**

श्रीवासुदेवद्विवेदी, संस्कृतप्रचारपुस्तकमाला-संपादकः, टेढ़ीनीम्, वाराणसी । रू. १-५०.

गैर्वाण्या वाण्या अद्य विद्यमानां परिस्थितिं तदभिमानिनां सर्वेषामपि संन्निधौ विनिवेद्य तदुद्धारार्थं पुनः प्रयत्नः ईदृक् कार्यः इयान् कार्यः इति विविच्य निर्णीय सन्देशरूपतया विरचितोऽयं ग्रन्थः मुद्रितश्च सर्वेषां प्रेक्षणाय प्रेषणाय च सज्जीकृतः ।

अयमत्यन्तम् आवश्यकः प्रचारः समये समवतीर्णः सर्वानपि उद्बोध्य स्वप्रयत्नं सफलयेदिति विश्वसिमः । अत्र विद्यमानानि पञ्च प्रकरणानिः

१. संस्कृतव्यवहारविषयकं प्रथमं प्रकरणम्, तत्र सन्देशाः पञ्च ।
२. संस्कृतप्रचारविषयकम् प्रकरणम्, तत्र चत्वारः सन्देशाः ।
३. अध्ययनाध्यापनविषयकं प्रकणरम्, तत्र एकादश सन्देशाः ।
४. देशसमाजसेवाविषयकं प्रकरणम्, तत्र त्रयोदश सन्देशाः ।
५. विचारव्यवहारविषयकं प्रकरणम्, तत्र त्रयोदश सन्देशाः ।

अत्र विद्यमानाः सर्वेऽपि सन्देशाः सरलसरलैः अनुष्टुप्श्लोकैरेव निर्मिता अतिसुखमवगमयन्त्यर्थं विवक्षितम् ।

किञ्च अयं सन्देशः यद्यपि सम्पादकेन विलिखितः, अथापि स्वयं सुरभारत्या स्वमुखेनैव स्वहृदयशल्यभूतां न्यूनतां सर्वान् श्रावयतीत्येवमभिसन्धिः । अयं चाभिसन्धिः एतत्सन्देशपाठकान् सत्यापयेदित्येवात्रत्या वाक्यसरणिः । वाक्शैल्यामत्र बहवः प्रशंसार्हा गुणाः । सर्वथा अभिनन्दनीयोऽयं लेखकः ॥

(अ. मु. श्री)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## मिलिन्दमित्रम्

कर्ता—वनमाली भारद्वाजः । हिन्दीप्रचारसभा, सदर्, मथुरा ।

अस्मिन् षष्टिपत्रात्मके सञ्चये बहूनि खण्डकाव्यानि नानानवीनपुराण-विषयकाणि दत्तानि । षड्ऋतुवर्णनानि, सन्ध्याप्रभातादिवर्णनानि, सुभाषितानि च दृश्यन्ते । विशिष्योदाहरणार्हाः श्लोकाः धूमपानं, सुरापानं, तथा राज्यालयेषु उपचीयमानानि 'फैल्', नोट्स्' इति ख्यातानि पत्राणि इत्याद्याधुनिकप्रपञ्चसंस्कृतिस्पर्शिनः । सन्ति मनोग्राहिणो भावाः, शैली च सरला, किन्तु नानावृत्तैर्गुम्फितेऽस्मिन् ग्रन्थे बहुशो वृत्तभङ्गपङ्गवः श्लोकाः कष्टं चरन्ति ॥

## द्वैतं काव्यम्

लेखकः—श्रीद्विजेन्द्रलालशर्म-पुरकायस्थः । आर्. आर्. कालेज्, अल्वार् ।

इदं विरहोत्कण्ठाप्रेरितं खण्डकाव्यम्, मेघदूत-ऋतुसंहार-वासना-वासितं, यत्र वियुक्तौ नायिकानायकौ पर्यायशः प्रति-ऋतु स्वावस्थां निवेदयतः । अस्मिन्नपि काव्ये वृत्तभङ्गदोषाः सन्ति ।

## रूपकाणि

## आदिकाव्योदयम्

कर्ता—य. महालिङ्गशास्त्री. १९६३ । रू. ६.

यथा नाम्ना सूचितं, तथात्र आदिकाव्यस्य वाल्मीकीयस्य प्रादुर्भाव-वृत्तान्तः, तस्यार्वाचीनसंस्कृतसाहित्योपरि प्रभावः, तथा लोके प्रवचने, गाने, पुस्तनाट्यादिकलास्वपि तस्यानुप्रवेशः इत्यादिकं वस्तु प्रतिपादितं रूपकविधया । वाल्मीकेरेव मूलश्लोका बहव उपयुक्ताः । अन्तर्नाटकमपि घटितम् । नूतनया प्रेक्षया प्राचीनमपि वस्तु समुज्ज्वलितमत्र विराजते ॥

## विक्रान्तभारतम्

कर्ता—डा० बि. आर्. शास्त्री, ओस्मानिया यूनिवर्सिटि, १-१-३३६-९३, विवेकनगरम्, हैदराबाद्-२०, आ. प्र. । रू. ४-८०.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रचयितास्य रूपकस्य सञ्चिकायामस्यां परिचायितः । १४ दृश्यैः सन्दृब्धमिदं भारतदेशस्य प्राक्तनमितिहासवृत्तान्तमेकं विषयीकरोति । उपक्रमदृश्ये विदेशीयचीन-आक्रमणवार्तां प्रस्तुत्य पुरा अलक्सान्द्रेण ग्रेकचक्रवर्तिना यद्भारताक्रमणं कर्तुं यतितं, यच्च चाणक्यमतिसहकृतेन चन्द्रगुप्तेन मौर्यसाम्राज्यं स्थापितं, तत्कथा सर्वात्रायोजिता । श्लोकैस्सह कतिचिद् गीतान्यपि योजितानि । आकाशवाण्यामपि प्रयुक्तमिदं रूपकमिति निर्दिष्टम् । ऐतिहासिकरूपकप्रणयनमिदमवश्यमभिनन्दनीयम् ॥

## नवमालिका

विश्वेश्वरपाण्डेयप्रणीता । मालवमयूरकार्यालयः, मन्दसोर् म. प्र. ।

सुविदितोऽयं कविः अष्टादशशत्या आदिमभागे अल्मोरास्थाने बभूव । तद्ग्रंथा अद्यापि परिदृश्यन्ते तत्रैव । अनेकप्रबन्धनिर्माणेन स्वकौशलं प्रकाश्य चतुस्त्रिंश एव वयसि लोकान्तरमगात् । तस्य कृतयः— अलङ्कारकर्णाभरणम, अलङ्कारमुक्तावली, काव्यलीला, काव्यरत्नम्, रसचन्द्रिका, मन्दारमञ्जरी च । व्याख्याश्च काश्चित् भानुदत्त-रसमञ्जरी-नैषधीयचरितादीनाम् । तत्र बहव एतेषु ग्रन्थेषु काश्यां मुम्बईकाव्य-मालायां च मुद्रिताः । अष्टाध्यायीविवरणरूपो वैयाकरणसुधानिधिश्चास्यैव कृतिः । आहत्य विंशतिग्रन्था निर्मितास्तेन । तेष्वन्यतमेयं नवमालिका ।

अङ्कचतुष्टयपरिमितेयं नाटिका । अत्र प्रतिपाद्या कथा अवन्तीदेश-महाराजविजयसेनान्तःपुरे इयं नवमालिका केनाप्यपदेशेनान्तःप्रविष्टा क्रमेण राजवल्लभा बभूवेति ।

तत्र तत्र कथासंयोजनादिकमनुरूपमेव । पद्यगद्यरचनासरणिस्सरला सुखावबोधा च । अथापि एकमेवादर्शमाधारीकृत्य मुद्रितेयं नाटिका प्रतिपद्यगद्यं विद्यमानमक्षरत्रुटिभूयस्त्वं मुद्रणोपजनिताशुद्धिसंवलितं समुदितार्थावबोधबाधकं सत् पठितॄणामुत्साहं प्रतिबध्नाति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मद्रास्-राजकीयहस्तलिखितकोशागारे अस्या नाटिकाया एकैव मातृका उपलभ्यते, यामाधारीकृत्यैव सम्पादितमिदं मुद्रणम्। यदि आदर्शान्तरं शुद्धम् उपलभ्येत, तदा द्वितीयवारमुद्रणेन सर्वं समञ्जसं भवेदिति प्रतीक्ष्यते ॥

(अ. मु. श्री.)

रणश्रीरङ्गः

रचयिता—श्री. भि. वेलणकरः। गीर्वाणसुधाप्रकाशनम्, झावबा वाडी, मुंबई २१। रू. ५.

रचयितुरस्य कृतयः पूर्वं प्रतिभायामालोचिताः। पुस्तकेऽस्मिन् त्रीणि खण्डरूपकाणि सन्ति। प्रथमं कालिन्दी नाम त्र्यङ्कं रूपकं, ततः कैलासकम्प इति त्र्यङ्कमन्यत्, ततश्च स्वातन्त्र्यलक्ष्मीरिति तृतीयं त्र्यङ्कम्। कालिन्द्याम् उत्तरभारतभूः, गङ्गायमुने, मगधभूः, वङ्गभूः, समुद्र इत्याद्याः पात्रविशेषाः, भौगोलिकसमाधिमाश्रित्य च प्रवृत्तं रूपकम्। कैलासकम्पे अन्यापदेश-विधया देवासुरपरमेश्वरगणेशादिवृत्तान्तद्वारा अद्यतनचीनाक्रमणसमाधिः प्रस्तुता। तृतीये रूपके साक्षादेव ऐतिहासिकं वस्तु, प्रथमस्वातन्त्र्य-युद्धललामभूताया झान्सीराज्ञ्याः वीरापदानं प्रतिपादितम्। सर्वत्र गीतानि योजितानि। एषु द्वे देहल्यामाकाशवाणीद्वारा श्राविते। द्वितीयस्याङ्ग्लानुवादोऽपि दत्तः। श्लाघनीयसमुत्साहस्य रूपककर्तुरस्य उपचीयमानां सिद्धिमाशंसामहे ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## OUR CONTRIBUTORS

अस्यां सञ्चिकायां नूतनतया दृश्यमाना लेखकाः—

Harischandra Renapurakar, Govt. College, Gulburga, Mysore State.

हरिश्चन्द्रः रेणापुरकरः, शासकीयमहाविद्यालयः, गुल्बर्गा, मैसूर् राज्यम् ।

Kasinatha Raghunatha Vaisampayana, Kavya-Purana-Tirtha, Sahityaratna, 197, Kaviwada, Delhi Darwaza, Ahmednagar.

काशीनाथ रघुनाथ वैशम्पायनः, काव्यपुराणतीर्थः, साहित्यरत्नम्, १९७, कविवाट, देहली दर्वाझा, अहमद्नगर् ।

Dr. B. R. Sastri, Reader in Sanskrit, Osmania University, Hyderabad, Dn. A volume of his poems Manimanjari was noticed in Pratibha IV. 1.

डा० बि. आर्. शास्त्री, रीडर्, संस्कृतविभागः, ओस्मानिय यूनिवर्सिटि, हैदराबाद्; अस्य मणिमञ्जरी नाम खण्डकाव्यकदम्बकं प्रतिभायां ४. १. सञ्चिकायामालोचितम् ।

Jagannatha Sastri, Teacher, D. A. V. Higher Secondary School, Rainavari, Srinagar, J.& K.

जगन्नाथः शास्त्री, अध्यापकः, डि. ए. वि. हैयर् सेकण्डरि स्कूल्, श्रीनगर् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भारतस्य सांस्कृतिक-साहित्यिकोन्नयने राष्ट्र-प्रतिष्ठायाः ऐक्यस्य च संस्थापने परमाग्रहशीलस्य सर्वोत्कृष्टभारतीयभाषाकृतिप्रणयने प्रतिवर्ष-मेकलक्षमुद्रा-पुरस्कारप्रदानव्रतिनः

## भारतीय ज्ञानपीठ

### संस्थानस्य संस्कृतग्रन्थावलीयं संग्राह्या

सिद्धिविनिश्चय टीका (भागद्वयम्) ३०. ००: हरिवंशः १६. ००: न्यायविनिश्चयविवरणम् (भागद्वयम्) ३०. ००: सर्वार्थसिद्धिः १२. ००: तत्त्वार्थराजवार्तिकम् २४. ००: आदिपुराणम् (भागद्वयम्) २०. ००: पद्मपुराणम् (भागत्रयम्) ३०. ००: उत्तरपुराणम् १०. ००: मदनपराजयम् ८. ००: जीवन्धरचम्पूः ८. ००: भद्रबाहु-संहिता ८. ००: जैनेन्द्रमहावृत्तिः १५. ००: तत्त्वार्थवृत्तिः १६. ००: जिनसहस्रनाम ४. ००: पुराणसार-संग्रहः (भागद्वयम्) ४. ००: रत्नमंजूषा २. ००: केवलज्ञानप्रश्नचूडामणिः ४. ००: नाममाला (सभाष्या) ३. ५०: व्रततिथिनिर्णयः ३. ००: कर्मप्रकृतिः ६. ००: भोजचरित्रम् ८. ००: सत्यशासनपरीक्षा ५. ००:

शाकटायनव्याकरण-उपासकाध्ययन-जैनशिलालेखसंग्रहाः वर्षेऽस्मिन् प्रकाश्याः सन्ति ।

प्रधान-कार्यालयः- ९ अलीपुर पार्क प्लेस्, कलकत्ता २७
प्रकाशन-कार्यालयः- दुर्गाकुण्ड रोड्, वाराणसी-५
विक्रय-केन्द्रम्- ३६२०।२१ नेताजी सुभाष मार्ग, दिल्ली-६

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# मोतीलाल बनारसीदास,

बेंग्लोरोड, जवाहरनगर दिल्ली ७ | नेपालीखपड़ा वाराणसी | बांकीपुर पटना

## अस्याः संस्कृतग्रन्थप्रकाशनसंस्थायाः

## अपूर्वाणि प्रकाशनानि

१ शब्दकल्पद्रुमः—५ भागात्मकः मू. १९४-७५

२ चित्रनिबन्धावलिः—पं. रघुनाथशास्त्री सं. वि. वि.—मू० १०)

३ ध्वन्यालोकः—लोचनेन तथा भाषानुवादेन च संवलितः (भागद्वये) डा. रामसागरत्रिपाठी मू० २५)

४ नाट्यशास्त्रम्-हिन्दी-अनुवादोपेतम्, प्रथमभागः १-७ अध्यायानाम् ले. डा. रघुवंश. मू० १५)

५ शंकरग्रन्थावली (ईशादिदशोपनिषदः, ब्रह्मसूत्रम्, भगवद्गीता) भागत्रये. मू० ११-७५.

६ संस्कृताङ्गलकोशः—सस्कृताद् आङ्गले (१) आङ्गलात् संस्कृते च(२) ले० सर् मोनियर विलियंस् मू० ८०. ३६ मात्रम्

७ आप्टेकोशः—आंगलात् संस्कृते १. संस्कृतात् आंगले २. मू० ४) एवं ६)

८ रूपमण्डनम्—डा० बलराम श्रीवास्तवः मू० ६)

९ पालिमहाव्याकरणम्—भिक्षुजगदीशकाश्यपः मू० १०)

१० संस्कृतसाहित्य का इतिहास—कीथकृत हिन्दी अनुवादकर्ता डा० मंगलदेवशास्त्री मू० २५)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# साहित्य-अकादेमी-परिषदा प्रकाशिताः संस्कृतग्रन्थाः

## कालिदासग्रन्थाः—

बहुमातृकापरिशोधनपूर्वं नूतनतया सम्पादिताः सोपोद्घाताः सटिप्पणाः

१. मेघदूतम्—सु. कु. दे.—विशिष्टं संपुटीकरणम्—
$ 1-50, 10 Sh. 6 d. Rs. 5. 00;
साधारणम्—Rs. 2-50.

२. विक्रमोर्वशीयम्—ह. दा. वेलणकरः—वि.सं. $ 3-00, 21 Sh. Rs. 8-00; सा. Rs 6.

३. कुमारसम्भवः—सूर्यकान्तः—वि.सं. $ 5-00, 37 Sh., Rs. 12-50; सा. Rs. 10. 00.

### मुद्यमाणानि अथवा सम्पाद्यमानानि

४. अभिज्ञानशाकुन्तलम्—श्री कृ. बेल्वेल्करः

५. मालविकाग्निमित्रम्—के. ए. एस्. अय्यर्

६. रघुवंशः—वे. राघवः

७. ऋतुसंहारः—पि. एम्. लाड् —वे. राघवः

## कोशावलिः—

१. पुराणेतिहाससंग्रहः—सु. कु. दे—रा. च. हस्ता—वि. सं.
$ 4-00, 25 Sh., Rs. 10-00 ; सा. Rs. 7-50.

२. बौद्धसंग्रहः—नलिनाक्षदत्तः—वि. सं. $ 4-00, 25 Sh., Rs. 10-00; सा. Rs. 7-50.

३. अभिलेखसंग्रहः—ब. च. छाब्रा
वि. सं. Rs. 8-50, सा. Rs. 7-00

### अन्यत् प्रकाशनम्

४. अशोकावदानम्—सु. कु. मुखोपाध्यायः
वि. सं. $ 8-00, 36 Sh., Rs. 18.

### मुद्यमाणा अथवा सम्पाद्यमानाः

५. वैदिकसंग्रहः—वि. ब. शास्त्री

६. काव्यनाटकसंग्रहः—१ भागः—वा. श. अग्रवालः

७. ,, २ ,, —वे. राघवः

८. जैनसंग्रहः—ही. ला. जैनः

९. सुभाषितसंग्रहः—वे. राघवः—के. ए. एस्. अय्यर्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# 'संस्कृतप्रतिभा'

वदन्ती विविधां वाचमेका भारतसाहिती ।
द्राविड्यामथ वङ्ग्यां वा भाल्येको भारतो गुणः ॥

समानं मूलमेतस्याः सम्प्रदायाः समास्तथा ।
वासनाः प्रेरका भावा बाह्या आभ्यन्तराः समाः ॥

एकैव भारती संविद् अध्यात्मगुणवासिता ।
ऐकात्म्यं नयति ह्येता विचित्रप्रसरा गिरः ॥

मधुच्छन्दा रवीन्द्रश्च बुद्धो गान्धिश्च यज्जगौ ।
तस्य भाषा मनाग् भिन्ना परिभाषा न भिद्यते ॥

देशतः कालतः प्राप्तचित्रप्रसरशालिनः ।
साहित्यस्यास्य दृश्येते बीजमैक्यं च संस्कृते ॥

अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतब्रह्म राजते ॥

मनुं व्यासं च वाल्मीकिं कालिदासं च शङ्करम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन् मतदेशिकान् ॥

उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥

धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥

सम्पादकः

वे. राघवः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# संस्कृत प्रतिभा

# SAMSKRITA PRATIBHA

पञ्चम उन्मेषः
द्वितीयो विलासः
१९६५

साहित्य अकादेमी, नवदेहली

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

**Samskrita Pratibha**, a Half-yearly Journal

Editor: Dr. V. Raghavan

*Annual Subscription*: Rs. 4, 14 *s*. or $ 2 (inclusive of postage)

Single copy: Rs. 2 (inclusive of postage)

Send your literary contributions to the Editor

Send your subscriptions and advertisements to the Secretary, Sahitya Akademi, Rabindra Bhavan, 35, Ferozeshah Road, New Delhi-1.

Advertisement Rates

| | | |
|---|---|---|
| Inside Full page: | General Rs. 100; | for Books Rs. 50. |
| Inside Half page: | General Rs. 50; | for Books Rs. 25. |
| 3rd Cover: | General Rs. 150; | for Books Rs. 75. |
| 4th Cover: | General Rs. 200; | for Books Rs. 100. |

Mechanical Data
Size: Demy Octavo ($8\frac{1}{2}'' \times 5\frac{1}{2}''$)
Print Area: $7'' \times 4''$
Line Measure: 24-ems

Edited and published by Dr. V. Raghavan for Sahitya Akademi (35, Feroze Shah Road, New Delhi), at 7, Sri Krishnapuram Street, Royapettah, Madras-14; and printed by N. Ramaratnam at the M.L.J. Press Private Ltd., Madras-4

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# सं स्कृ त प्र ति भा

# SAMSKRITA PRATIBHA

पञ्चम उन्मेषः
द्वितीयो विलासः
१९६५

साहित्य अकादेमी, नवदेहली

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

साहित्य

# संस्कृतप्रतिभा

पञ्चम उन्मेषः द्वितीयो विलासः

१९६५

साहित्य-अकादेमी, नवदेहली

विषयानुक्रमणिका—

१. सम्पादकीयम्—वे. राघवः

खण्डकाव्यानि—

२. भूरि वन्दे वसन्तम्—चि. द्वा. देशमुखः
३. गीतजवाहरम्—रामकिशोर मिश्रः
४. श्रीमन्नेहरूश्रद्धाञ्जलिः—अ. वि. कार्णे
५. भारतम्, गान्धिः, नेहरूश्च—टि. ए. सरस्वती
६. अत्यन्तकामोऽन्तकः—बहादुरचन्द्रश्चापोत्कटः
७. ज्ञानवल्ली—हरिदत्त पालीवालः "निर्भयः"
८. "अहो अकरुणाः खलु ईश्वराः"—माधव देशपाण्डे
९. कजली (गज़ल)—शिवप्रसादो भारद्वाजः
१०. अन्यापदेशपरिशिष्टम्—य. महालिङ्गशास्त्री
११. भारतशतकम्—राम कैलास पाण्डेयः
१२. मुक्तकाञ्जलिः—दि. द. बहुलीकरः
१३. भोः कवे!—वे. राघवः
१४. कविः, ज्ञानी, ऋषिः—वे. राघवः

गद्यबन्धौ—

१५. वृक्षाः—विद्युल्लेखा वाघ
१६. "ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः"—अशोकः अकलूजकरः

रूपके—

१७. कालिदासमहोत्साहं नाम नाटकम्—हरि रामचन्द्र दिवेकरः
१८. सैरन्ध्री नाम प्रेक्षणकम्—देवकी मेनोन्

अनुवादाः—

१९. श्रीकुलशेखरसूरेर्भगवन्निद्राप्रार्थनरूपा गाथाः-टि. एस्. श्रीनिवासाचार्य
२०. श्रीकैरविण्यां पार्थसारथिदर्शनविषया गाथाः—अ. मु. श्रीनिवासाचार्यः
२१. शरणगीतानि—टि. जि. सिद्धप्पाराध्यः
२२. श्रीतुकारामगाथाः—एस. एल. तम्बे

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

२३. श्रीकबीर-अनुवादः—च. रा. तम्बे
२४. मधुगाथा—वे. राघवः
२५. सम्मोदवीचिः—हरिहर त्रिवेदी
२६. स्वर्णपुष्पाणि— ,, ,,
२७. अन्धकुमारः—एल्. जे. खरे
२८. 'तस्या वीरपती रणाङ्गणहतो नीतो यदा मन्दिरम्'—एल्. जे. खरे
२९. मञ्जरीः प्रति—एल्. जे. खरे

**निकषोपलः (पुस्तकविमर्शः)—**

वेदलावण्यम् (भागद्वयात्मकम्), गायत्रीमन्त्राक्षराणामृषिच्छन्दआदयः, वेदभाष्यकारों का आलोचनात्मक अध्ययन, ऋग्वेद के ऋषि और उनका दर्शन और सन्देश, सूर्यदैवज्ञपण्डितविरचितं वेदमन्त्रादीनां भाष्यम्, रावणभाष्यम्, (एतत्सर्वं—डा० सुधीरकुमारगुप्तः); सुगलार्थमाला (नारायणद्विजवरः); विमर्शामृतम् (श्रीपूर्णानन्दस्वामिभारती); श्रीमन्मरुच्छास्त्रसारसङ्ग्रहः, सद्भक्तिर्दर्पणं च (ची. रघुनाथाचार्य); परतत्त्वदिग्दर्शनपरीक्षा (श्री अण्णङ्गराचार्यः); १३-संस्कृतस्तोत्रग्रन्थाः (श्री. पि. कृष्णमूर्तिः); संस्कृताध्यापनन् (श्री. के. रामवर्मराजः); गीतजवाहरम् (रामकिशोरमिश्रः); शान्तिदूतस्मरणिका (प्रबोधकुमारः); भारतवैजयन्ती यात्रा च (ए. वि. कृष्णवारियर्); केनोपनिषद् (डा० सीतानाथगोस्वामी); महालक्ष्मीस्तुतिमाला (सि. मुत्तुकुमारसामिमुदलियार्); श्रीसुन्दरविनायकनित्योत्सवपद्धतिः, देवतापञ्चकस्तुतिश्च (श्रीसुन्दरेशशर्मा); श्रीशास्तुः सुप्रभातम्, श्रीहरिहरपुत्राक्षरमाला (श्रीस्वामिशास्त्री); उदाहरणानि (श्रीभाष्यं विजयसारथिः); सारस्वतशतकं सटीकम् (श्रीश्रीजीवन्यायतीर्थः); कवितोदयचन्द्रिका (डा० गि. वे. सीतापतिः); कृष्णाभ्युदयं नाम प्रेक्षणकम् (श्रीलोकनाथभट्टः); श्रीरामराज्यं जननायकम् (वि. यस्. रङ्गनाथाचार्यः); आपाशास्त्रिसाहित्यसमीक्षा (अशोकः अकलूजकरः); मलमासनिर्णयः सटिप्पणः (श्री दरभारी झा); विचारत्रयी (श्रीसोमसुन्दरदीक्षितः); सूत्रार्थः (पि. एस्. सुब्बरामभट्टः); सुसंहतभारतम् (पुल्लेल रामचन्द्रुडु); मुकुन्दकोषः—लिङ्गानुशासनवर्गः (मुकुन्दशर्मा); सन्ध्या ('जि'—श्रीकृष्णशर्मा च); कृदन्तरूपमाला (मद्रास् संस्कृतविद्यासमितिः); द्युतिश्रुतिवाहिनी (राधाकृष्णमुदलियार्); सांमनस्यम् (बृहद्गुजरातसंस्कृतपरिषद्) देवभाषा (नारायण कृष्ण सेनगुप्तः); कण्टकाञ्जलिः (के. यम्. अर्जुनवाडकरः).

**लेखकपरिचयः**

**'संस्कृतप्रतिभा'—सम्पादकः (तुरीयावरणपृष्ठे)**

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## सम्पादकीयम् —

बहुभाषाविदामाचार्य-विनोबा भावे-महाशयायानामस्ति संस्कृते न केवलमनुरागः, किन्तु समीचीनं ज्ञानमपि। वर्तमाने संवत्सरे, पूर्व्येषु मासेषु, यदा राष्ट्रभाषाप्रश्नप्रयुक्तो झञ्झावातः दक्षिणभारते विततनानाविधनाशकरं प्रक्षोभमुदपादयत्, तदानीं खिन्नमानसैरेतैः भारतीयभाषासमस्यायां स्वपाण्डित्येन आचारेण निष्पक्षपातितया च समाधानं दातुं पूर्णमधिकारं बिभ्रद्भिः पत्रिकासु शुभोदर्कसदाशयपूर्णः सन्देश एष प्रकाशितः, यस्य संस्कृतानुवादमधोदत्तं पठित्वा संस्कृतानुशीलिनशीलाः अन्ये विद्यावन्तो नेतृमुख्याश्च नूनमभिनन्दिष्यन्ति, भाषाकोलाहलशान्तिमार्गं चास्मिन्ननपायं द्रक्ष्यन्ति—

"यदाहं पाठशालायामपठं, तदा आङ्ग्लभाषाद्वारा शिक्षणं प्रावर्तत। तच्च कृत्रिममासीत्। प्रत्युत अप्यस्ति कापि भाषा, या सहस्रवर्षप्राचीना, यस्याः पदानि साक्षात्स्वार्थेष्वेवाद्यापि व्यवह्रियन्ते? तथा हि पश्यत ऋग्वेदस्य प्रथमं मन्त्रम्—"अग्निमीले पुरोहितं, यज्ञस्य देवमृत्विजं, होतारं रत्नधातमम्" इति। अत्रत्यानि अग्निः, पुरोहितः, यज्ञः, देवः, रत्नमिति पदानि स्वार्थेष्वेवाद्यापि आधुनिकभारतीयभाषासु प्रयुज्यन्ते। सहस्रशः संस्कृतपदानि, अग्नि-वायु-पवन-पृथ्वी-चन्द्र-सूर्य-बुद्धि-अहङ्कारप्रभृतीनि यथापूर्वमनुस्यूततया उपयुज्यन्ते। गीतायां महाभारते च यानि पदानि तेषु बहूनि व्यवहारे संप्रत्यपि सन्तीति विस्मयावहमिदम्। कस्य भाषान्तरस्य एतादृशी प्राचीना, परम्परागता शब्दसंपदस्तीति वक्तुं शक्यम्?

अस्त्येवंगुणा भारते भाषा, या अधुनातनी यद्यपि पुराणी। यथा ग्रेक्-भाषा लातिन्-भाषा वा तथा न मृतभाषा संस्कृतभाषा भवति, किन्तु जीवन्ती भाषा। केषुचन विषयेषु अद्यतनभाषापेक्षया जीववत्तरं संस्कृतम्; नूतनवैज्ञानिकपारिभाषिकशब्दोपकल्पने, या वा का वा आधुनिकभाषा भवतु, तस्याः संस्कृतोपयोगोऽनिवार्यः। संस्कृतस्याङ्ग्लवाण्यामनुवादो दुष्करः। * *

केरलीयशङ्कराचार्यस्य, द्राविडरामानुजाचार्यस्य, कार्णाटमध्वाचार्यस्य, तैलङ्गवल्लभाचार्यस्य प्रातिस्विकभाषा भिन्नाः, किन्तु तेषामभिप्रायाः निखिलेऽपि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भारते प्रसृताः । कथम् ? तदानींतनीं भाषां संस्कृतं ते सहायतया जगृहुः । तत एव तेषां ग्रन्था यथा दक्षिणापथे तथा उत्तरापथे च सुतरां पठ्यन्ते । * * स्वीयाशयानां संस्कृतमेव प्रकाशकं चक्रुस्ते, संस्कृतं च तदानीं राष्ट्रभाषा बभूव । यद्यपि संस्कृतं न सामान्यजनताया भाषा बभूव, तथापि संस्कृतिद्वारा ये जनानां परस्परं संबन्धाः समन्वयाश्च बभूवुः, ते संस्कृतद्वारा बभूवुः । तत एव ते संस्कृतं स्वीचक्रुः । * * *

बहवः पृच्छन्ति मां 'किमर्थमद्य संस्कृतं न राष्ट्रभाषीक्रियते' इति । तेभ्यो ममोर्जितमुत्तरम् 'बाढं, कर्तव्यम्' इति । * * संस्कृतं तु लघूकरिष्यते; यतस्तस्याः सुबन्ततिङन्तव्यवस्था जटिलाः । संस्कृतस्यायं प्रधानो गुणः, यत् सा मूलभूता भाषा । सा च बहुधा मूलभाषा, यतस्तस्या मूलभूतादेकस्मात्पदाद् बहूनि पदानि निष्पादयितुं निरूपयितुं च शक्यन्ते । * * "

* * *

विद्यामन्त्रिविभागस्य व्ययप्रक्रियायाः लोकसभायामभ्युपगमं प्रार्थयमानेन विद्यामन्त्रिणा छागलामहाशयेन सदस्यप्रश्नोत्तरप्रसङ्गे उक्तम्—'संस्कृत-बहिष्कारो नाभिप्रेतः । सर्वभाषाणां मूलभाषा हि सा' इति । आह च सः 'चतुर्थयोजनायां संस्कृतविद्यार्थं २४५-लक्षपरिमितं धनं व्ययीकरिष्यते' इति ।

ज्ञायते च प्रधानमन्त्रिभिः श्री ला. ब. शास्त्रिमहोदयैः संस्कृताभि-वृद्ध्यर्थं यथोचितं किमपि कर्तव्यम्' इति निर्देशः कृत इति । तदनुसारं च मन्त्रिविभागेषु कार्यपर्यवेक्षकैः संभूय 'पाठशालासु मातृभाषया सह "संयुक्तप्रक्रियासंविधान (composite course) मर्यादया भाषात्रयसंविधाने (Three language formula) संस्कृतमपि क्रोडीकरणीयम्' इति निरणायीति श्रूयते ।

सर्वामेव शिक्षाप्रणालीमामूलचूडं पुनः परिशील्य अपेक्षितन्यूनातिरेक-समीकरणं यथा स्यात् तथा उपदेष्टुं शिक्षायोगः (Education

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Commission) नूतनः कोऽपि आयोजितः। आसन् अनतिव्यवधानमेव शिक्षायोगाः भाषायोगाश्च,—विश्वविद्यालयविषयः, मध्यमपाठशालाविषयः, हिन्दीविषयः, संस्कृतविषयश्चेति चत्वारः। तेषामेष पञ्चमः सर्वंकषविचारव्यापृतः किं कथयिष्यति संस्कृतविषये इति न केवलं महता सन्देहेन, किन्तु बलवत्या भीत्या च व्याकुलितः सर्वः संस्कृतलोकः।

आङ्ग्लगद्यसाहित्ये सुप्रसिद्धेन डिकेन्स्-नामकेन सृष्टेषु पात्रेषु 'मिकाबर्' इति कश्चन सुविदितः, यः प्रतिपदमनिष्टेऽपि वातावरणे शुभोन्मुखं किञ्चिदापतिष्यति इति निरन्तरप्रत्याशया जीवितं निनाय। मन्ये, न वयं संस्कृतोत्सुकाः मिकाबरात् सुदूरवर्तिन इति।

*　　*　　*

द्रमिडदेशे प्रसिद्धा आढ्या ब्राह्मणेतराध्यक्षाधिष्ठिताः शैवमठाः सन्ति, यैः शिवालयधर्मकार्यं, शैवसमयपालनप्रचारणकार्यं च तत्तत् क्रियते। शैवसमयदीक्षिता बहवो गुरवः, शैवसिद्धान्ते द्रमिडभाषया ग्रन्थकर्तारश्च एतेषां मठानामधिपतिषु गण्यन्ते। शैवसिद्धान्तस्य संस्कृतसमन्वयोऽपि भूयसा वर्तते, संस्कृतवैदुष्यमपि शैवदर्शनानुसारिभिरपेक्ष्यते। 'तिरुप्पनन्दाल्' इति य एतेषु मठेषु प्रसिद्धो मठः, तमद्यालङ्कुर्वद्भिः श्री-अरुल्-नन्दि-तम्बिरान्-स्वामिभिः निजां संस्कृते पक्षपातितां व्यञ्जयद्भिः श्रीरामेश्वरक्षेत्रे तिरुनेल्वेलि-क्षेत्रे च पर्वतवर्धनी-कान्तिमती-अम्बिकादिव्यनामाङ्कितयोः बालिकानाम् उच्चतर-पाठशालयोः प्रत्येकं रू. २०,००० मूलनिधित्वेन दत्तं, यद्वृद्ध्या प्रतिपाठशालं बालिकानां संस्कृताध्यापनार्थं संस्कृतपण्डितः निरन्तरं नियोज्य परिपालयितव्य इति। संस्कृतमरुभूमितां क्रमशो जग्मुषि द्रमिडप्रदेशे पत्रिकासु प्रकाशिता वार्तेयं वृष्टिधारेव उत्कण्ठमानान् संस्कृतचातकान् प्रहर्षयिष्यति।

*　　*　　*

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaán Kosha

श्रूयते च मन्त्रिसभाया निर्णयान्तरम्- यद् भाविन्यां योजनायां यद्यपि वाराणसीय-दरभङ्गा-विश्वविद्यालयातिरेकेण अन्ये संस्कृतविश्वविद्यालयाः अन्येषु प्रान्तेषु न स्थापयितुमनुमन्तुं च शक्यन्ते, तथापि यत् तिरुप्पतिक्षेत्रे केन्द्रीयं संस्कृतविद्यापीठं स्थापितं, तदभिवर्धनं सर्वप्रकारकं कर्तुं यद्यदपेक्ष्यते, तत्तद् विधास्यत इति । हृदयाह्लादिनी वार्तैषा ; आशास्महे च कार्यमार्गे तैस्तैर्विलम्बैः तैस्तैरात्ययिकैर्युद्धादिसंकटैश्च अप्रतिहता भृशं फलेग्रहितामालम्बिष्यत इति ।

* * *

केन्द्रीय-संस्कृत-समितिः तृतीयवारं नूतना आयोजिता शासितृभिः । समितेरद्य जम्मू-काश्मीरराज्यपालाः डा० श्री. कर्णसिंहमहाशया अध्यक्षत्वेन नियुक्ताः । जम्बूस्थरघुनाथमन्दिरसंस्कृतपाठशाला-हस्तलिखितमातृकाशाला-काश्मीर-ग्रन्थमाला-इत्यादिद्वारा तैः, तद्राजवंशपूर्वपुरुषैश्च संस्कृतपरिपोषो महान् कृतः । साहित्ये, दर्शने, अलङ्कारे, तन्त्रागमयोः काश्मीरदेशेन संस्कृतार्थे किं किं न कृतम् ? किं बहुना, स हि प्रान्तान्तरापेक्षया शारदादेश इति अस्माकं मनस्सु सदा सभक्तिस्फूर्ति आवर्तते । यथा भाविषु वर्षेषु केन्द्रीयसंस्कृतसमितिकार्यप्रकाराः इतोऽपि बहुतरं प्रतायमानाः फलवन्तश्च भविष्यन्ति, तथा सा शारदा देवी काश्मीरपुरवासिनी अनुगृह्णातु ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# भूरि वन्दे वसन्तम्

चि. द्वा. देशमुखः

तुहिनतिमिरतान्तं शीतशैथिल्यशान्तं
जगदखिलमदृश्यैः प्राणितैः प्राणयन्तम् ।
स्तिमितनियतिगर्भान्मोचयन्तं वनान्तं
प्रणयमुकुलबन्धुं भूरि वन्दे वसन्तम् ॥ १ ॥

चरणचरणचारुप्रस्फुरत्कोरकस्य
विविधसुमविकासोद्भासिताशामुखस्य ।
नवकिसलयरागाध्मातविश्वात्मनश्च
मधुरुचिरविजेतुः स्वागतं यत्र तत्र ॥ २ ॥

कतिपयजनितानां जङ्गमाजङ्गमानां
स्फुरति हृदि नवीनस्यायुरोघस्य रंहः ।
तदनुसरणशीलस्तत्तदुत्सर्गयोग्यो
मुखरयति दिगन्तान् ब्रह्मनादः पृथिव्याम् ॥ ३ ॥

प्रत्यग्रसंसृतिमहाकरणीयलग्नाः
पारावताश्चटकबुल्बुलसारिकाश्च ।
आरामसद्म परितो व्रततीषु गुल्मे-
ष्वारावमादधत इष्टिगतं नु मन्त्रम् ॥ ४ ॥

तेषां पुरोधस इव स्थलमुन्नतं च
पुंस्कोकिलोऽत्वरितगीः समलङ्करोति ।
स्वाण्डानि यावदितरद्विजनीडमध्ये
स्वस्थात्मना निभृतवाग् गृहिणी निधत्ते ॥ ५ ॥

सम्पन्नकार्यपिकयुग्ममुपैति तूर्णं
स्वायातमाधवमरुत्तरलान् रसालान् ।
सौरभ्यशास्त्रनिपुणाः प्रथमं मिलिन्दा
गुञ्जन्ति यत्र मधुरं स्फुटमञ्जरीषु ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रसालताम्राङ्कुरमञ्जरीचयं
स्वसौरभेण प्रथिताढ्यतोदयम् ।
सुमोद्गतं निम्बतरोः सुगन्धि चा-
वलोक्य चाघ्राय जनः प्रसीदति ॥ ७ ॥

अन्वाम्रमुन्मेषपराः सुमद्रुमा
अशोकमन्दारविहारचम्पकाः ।
युगच्छदा लोहितनीलपाटला
वनस्थलीषूज्ज्वलितासु किंशुकाः ॥ ८ ॥

वसन्तसाम्राज्यजयध्वजेरितो
यथा न वायुः प्रमदः प्रकीर्त्यते ।
तथा ततो गुल्मलतादिषूत्सवो
नवप्रसूनैर्हृतलोकलोचनः ॥ ९ ॥

दिगन्तरासम्भृतपुष्पवीरुधः
प्रसूनगुल्मा गगनातिशायिनः ।
अलौकिकाकारसुमैः सुरञ्जनै-
र्विमोहयन्त्यक्षियुगं सुगन्धयः ॥ १० ॥

गिरिप्रदेशे नवशाद्वलान्तरां
प्रसूनसम्पत्तिमथैन्द्रकार्मुकीम् ।
विलोक्य कश्मीरतमालभूमिषु
त्विषेव दृङ् निर्निमिषा विमुह्यति ॥ ११ ॥

किंशुकांशुकपिशङ्गमध्यमा
नातिचण्डमिहिरांशुकञ्चुका ।
अश्मराशिपरिवेशदन्तुरा
गन्तुरन्तरहरा वनस्थली ॥ १२ ॥

वाटिकासु धनिमन्त्रिणामुदे-
त्युल्बणेन्द्रधनुषोऽप्यसंतुला ।
पुष्पराजिरनुविद्धशाद्वला
याचकालिसहिताहिताञ्जलिः ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भारतस्य नगरेषु संकुला
व्यापृता जनपदे च सस्यदे ।
तत्प्रजा विरमति क्षणमात्रं
निम्बचूततरुमूलनिषण्णा ॥ १४ ॥

मन्थरे हि सरतो दिनरात्री
द्रागपैति तरणेः करमान्द्यम् ।
चैत्र एति च कदुष्णमारुतो
माधवीं विटपमूर्ध्नि चालयन् ॥ १५ ॥

उपवने पवनाहितशर्करं
नवरसालफलं च समश्नुते ।
लकुचमात्मकुचद्वयबन्धुरं
पुरवधूरवधूतहिमामया ॥ १६ ॥

अहिमदक्षिणमारुतपायिनी
ह्युपचितावयवा वनरा यथा ।
तरणितापमितेः समभेधते
विलय एति वसन्त उदातपः ॥ १७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## गीतजवाहरम्

राम किशोर मिश्रः

॥ एतद्दुःखं बहु हृदये मे मया त्वमत्र कदापि न दृष्टः ॥

(१)

पुस्तकेष्वधीतं ते चरितम्
कर्मगतं ते ज्ञानमधिगतम् ।
मधुराकृतीनि चित्राण्यपि ते
दृष्टान्ययं तु विषयः क्लिष्टः ।
साक्षान्मया त्वमत्र न दृष्टः ॥

(२)

समाचारपत्रैस्त्वं ज्ञातः,
मोतीलालगृहे त्वं जातः ।
मानवधर्मप्रवर्तक ! पण्डित !
तद्विषये न मया त्वं पृष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(३)

स्वरूपराणीपुत्र ! जवाहर !
त्वामाह्वयति, एहि, तव देशः ।
त्वमेव योग्यः प्रधानमन्त्री,
देशे ज्ञातस्तथा च दिष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(४)

पश्य, विजयलक्ष्मीं विलपन्तीम्,
समाश्वासय तामद्य दुहितरम् ।
त्वमश्रूणि कृष्णाया अप्यथ
प्रोञ्छिष्यसि नो, किं स्वर्विष्टः ?
मया त्वमत्र कदापि न दृष्टः ॥

(५)

किमिन्दिराया न बाष्पशक्ति-
र्यया भवेरागन्तुं नालम् ।
न वा शक्तिरासीत्तद्रक्ते,
न ते यया कायः सन्तुष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(६)

विवशो भूत्वा त्वमद्य तत् किम्
कमलामन्त्रणमग्रहीरहो !
येन स्वर्गतोऽप्सरोभिरिष्टः
कामं कामरूप आश्लिष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(७)

कदापि न त्वं द्रष्टुमैच्छः
सर्वानस्मानश्रु मुञ्चतः ।
पुनरेतत्कथमद्य क्रन्दनैः
कृपालुहृदयस्त्वं न स्पृष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(८)

आव्रज मे प्रिय! प्रधानमन्त्रिन् !
त्वामाह्वयति जन्मभूरेषा ।
पश्य, त्वदीयो देशः कृष्टः,
यत्र दयालुर्देवो वृष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(९)

सोरोंनगरं कदापि न त्वम्
शूकरक्षेत्रमिहागतः सखे !
येन मादृशैस्त्वदीयमित्रै-
रर्थाभावान्नो त्वं दृष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(१०)

निकषा हरिगढं समागतस्त्वम्,
तस्माद् दृक्पथमागतो न मे ।
परं तव स्मृत्याऽद्य मार्गयन्,
त्वामहमिह विह्वल आकृष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(११)

जिगमिषतापि मया हि देहलीम्,
दुर्दैवान्नतु कालो लब्धः ।
तदधन्यः स्यान्न कोऽपि मादृक्,
येन त्वमत्र न दृग्भ्यामिष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

(१२)

एहि भारतं लाल जवाहर !
पश्य, त्वमत्र मानवैरिष्टः ।
भगवानिव भारत-निर्माता,
धन्यास्ते यैर्लोकैर्दृष्टः ।
मया त्वमत्र कदापि न दृष्टः ॥

॥ एतद्दुःखं बहु हृदये मे मया त्वमत्र कदापि न दृष्टः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## श्रीमन्नेहूरूश्रद्धाञ्जलिः

अ. वि, कार्णे

श्रीमद्विद्वद्द्विजवरकुले पूतविख्यातवंशे
जातः पुत्रो जनपदहिते दत्तदृष्टिर्नरेन्द्रः ।
देशोद्धारे कृतमतिलयो मोतिलालस्य सूनुः
राष्ट्रोद्धारार्पिततनुमना नेहुवंशप्रदीपः ॥ १ ॥

नानाभाषाध्ययनपटुतां यातवान्पण्डितोऽसौ
प्रज्ञा तस्य प्रभवति तथा ज्ञानविज्ञानशास्त्रे ।
खण्डे खण्डे निखिलजगतो बन्धुभावं वितन्वन्
प्रोच्चैर्गर्जन्प्रचलति नभोमण्डले मेघ एव ॥ २ ॥

तत्प्रासादे सह नु रमते पद्मया शारदा सा
त्यक्त्वा चैवं विधिविरचितं वैरभावं सहर्षा ।
रूपाढ्या सा सुभगकमला तस्य कान्ता गुणाढ्या
केषां नैषा ननु गुणवती कामिनी कौतुकाय ॥ ३ ॥

बालैः सार्धं वदति हसति प्रायशो दीर्घकालं
बालोद्यानं भवति रुचये श्रान्तचित्तस्य तस्य ।
आलोक्यामुं सदयहृदयं नेहुरूपं स विष्णुं
रन्तुं काङ्क्षत्यथ नवयुगे किं पुनर्बालकृष्णः ॥ ४ ॥

नेता राष्ट्रस्य च नरवरो नेहुरत्नप्रदीपो
भर्ता भाग्यच्युतजनगणानामसौ दुःखहर्ता ।
आयुः कालं गमयति चिरं मानवोत्कर्षहेतोः
स्वार्थे कामो न हि न हि कदा लोकसेवावृतानाम् ॥ ५ ॥

धन्यो धीमान्धवलसुयशोभाजनं भारतेऽसौ
तेजोराशिस्तपति भुवने तेजसा भानुरेव ।
नक्षत्राणामपि च निचये तारकाणां गणेऽसौ
विद्वद्रत्नं विलसति जगन्मण्डले खे शशीव ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शश्वत् शान्तिं विकसितमतिं विश्ववात्सल्यवृत्तिं
धीरोदात्तो वितरति नवोत्पन्नराष्ट्रेषु तेषु ।
अव्याजैस्तैर्जयति जनतामानसं हृद्यशब्दैः
प्रेमार्द्रा सा स्फुटहृदयगीः किं न दत्तेऽत्र लोके ॥ ७ ॥

स्वर्गं याते प्रमुखसचिवे भारतस्यास्य तस्मिन्
शोकच्छायातिमिरपटलैरावृतेयं धरित्री ।
तत्प्राणान्ते वमति गगनं कज्जलं कज्जलं किं
शोकग्रस्तं पतति भुवनं शोकसिन्धौ समग्रम् ॥ ८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# भारतम्, गान्धिः, नेहरुश्च

टि. ए. सरस्वती

अस्ति क्षोण्यां हिमशिखरिणा गुप्तकौवेरसोमा
शेषे भागे जलनिधिवृता भारतक्षेत्रभूमिः ।
धीरोदात्तैः कुशलमतिभी राजभिः पालिता या
रेजे पूर्वं मधुघृतमयी स्वप्रजाक्षेमदात्री ॥ १ ॥

यस्याः पुत्रैर्निपुणनिपुणैः निर्मितैः शिल्पिसङ्घै-
श्चेतोहारैरतुलसुषमैरर्थजातैः सहैव ।
अब्धीन् तीर्त्वा प्रजवितरिभिस्तत्क्रयप्राप्तवित्तै-
र्जन्मस्थानं द्विगुणितसुखं देवकाम्यं व्यधायि ॥ २ ॥

एवं भूत्या चिरपरिवृता यत्प्रजा नैव जाताः
मूल्येऽध्यात्मे विमुखमतयः किंच तद्दर्शनानि ।
चीनाजप्पान्प्रभृतिषु तथा पश्चिमासु क्षितीषु
प्राप्तामासन् द्रुततरमहो व्याप्तिमन्यैरलभ्याम् ॥ ३ ॥

काले याते महति सुखतो भारतीयस्य नष्टा
राष्ट्रक्षेमप्रियसहचरी बुद्धिरेकत्वरूपा ।
दासीभूता तदनु कदनैः कातरा मातृभूमि-
र्वैदेशीयैः सकलवसुभिर्वञ्चिता दीनदीना ॥ ४ ॥

दूरीकर्तुं विविधविकृतीरक्षमा भारतीयाः
मोहाभिख्ये गहनविपिने भ्रान्तमार्गा विचेरुः ।
अन्ते शेषैः सुकृतशकलैः प्रादुरासीन्महात्मा
गान्धिर्नेता विवशजनताप्राणदाता महर्षिः ॥ ५ ॥

कृत्वा लोकान् विगलितभयान् हेतिहीने रणेऽसौ
जित्वा शत्रोर्हृदयमदयं जन्मभूमिं स्वतन्त्राम् ।
दृष्ट्वा धीरो बहुजनमतः स्वर्गतिं प्राप शिष्यान्
मत्वा शेषे भरणविषये बद्धसर्वात्मशक्तीन् ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दिष्ट्यैवासीन्महितमहिमा नेहुवंशे प्रसूतो
धीरः शिष्यो जवहर इति ख्यातसार्थाभिधानः ।
नानारूपानभिमतगुणान् कान्तगम्भीरभावान्
बिभ्राणो यः सकलभुवनैरर्चितो मानितश्च ॥ ७ ॥

पाश्चात्यैर्यः स्वरुचिसरणौ शिक्षितो बाल्यकाले
स्वात्मस्यूतां भरतधरणीसंस्कृतिं नैव मुञ्चन् ।
धारायुग्मं मनसि निवहन् तीर्थभूतो धरित्र्यां
स्थाने वृत्तस्तपनतनयागङ्गयोर्योगतुल्यः ॥ ८ ॥

तेनैवासौ सकलवसुधां भावयन् स्वस्य गेहं
सर्वान् लोकानतनुबलवत् स्नेहपाशेन बद्ध्वा ।
संख्यातीतान् वशमगमयत् वश्यवाणीविलासैः
श्रोतॄंश्चित्रं सुहृदयवशात् मन्त्रमुग्धानिव स्वान् ॥ ९ ॥

अस्मान् दुःखार्णवपरिगतानाशु कृत्वा गतोऽसौ
मिश्रीकृत्य प्रियतरकणैः जन्मभूमेः स्वभस्म ।
तत्प्रारब्धे भरतधरणीसेवने स्वार्थहीनै-
र्लभैर्हित्वा कपटमखिलं तर्पणीयस्तदात्मा ॥ १० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## अत्यन्तकामोऽन्तकः

बहादुरचन्द्रश्चापोत्कटः

घुण इव काष्ठं शनकैरलक्ष्यमाणः सदास्ति भुञ्जानः ।
रूपाढ्यानां रूपं धूर्तानामग्रणीः कालः ॥ १ ॥

कालोऽस्ति कामुकानां सर्वेषामेव मूर्धन्यः ।
आसृष्टेः सौन्दर्यं निरन्तरं हन्त यो भुङ्क्ते ॥ २ ॥

भुञ्जानस्य निरन्तरं त्रिभुवने सौन्दर्यमा जन्मनो
निर्वेदो न परिश्रमो न न पुनर्यस्यास्ति तृप्तिः क्वचित् ।
कामी कामवतां स एव नितरामत्यन्तकामोऽन्तकः
ये रूपाग्निशिखापतङ्गशलभाः किंकामिनस्ते वयम् ॥ ३ ॥

रूपयौवनकान्तीनां कालो वै पश्यतोहरः ।
अस्य निग्राहको लोके न भूतो न भविष्यति ॥ ४ ॥

यान् रक्तानधरान् क्रमेण नितरां पीतानिवालोकसे
गण्डान् पाटलपाटलानपि तथा यान् वीक्षसे चूषितात् ।
पीनान् यांश्च पयोधरान् अनुपदं निश्च्योतितान् वीक्षसे
कालेनैव दुरात्मनाभिसरता भुक्तोज्झितास्ते ध्रुवम् ॥ ५ ॥

रम्याणां हन्त रूपाणि कालेनानेन कामिना ।
प्रकामं भुज्यमानानि विक्रियन्ते दिने दिने ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# ज्ञानवल्ली

डा. हरिदत्त पालीवालः "निर्भयः"

गच्छामि, गच्छ विदितस्वसमस्ततत्त्व!
तत् त्वं तु वेत्थ, न पदं विपदास्पदस्य ।
मा मुञ्च यत्नमपि चेद्विफलः स भूयो
विश्वेशपाददयया सफलोऽपि भूयात् ॥ १ ॥

कालोऽपसर्पति न सर्पति कार्यभारः
किञ्चैष ऋध्यति न चर्ध्यति जीवनं मे ।
तच्चापि लुप्यति न शाम्यति मे दुराशा
बद्धो यया जगति नर्तनमाचरामि ॥ २ ॥

संसारसारमभिलष्यसि चेन्मनस्त्वं
पूर्वं विलोकय सखे जगतः प्रपञ्चम् ।
कोऽयं विविच्य रचितो ह्रियते च केन
लीला च कास्य किमदश्च सृजा नियुक्तम् ॥ ३ ॥

किं जन्मना न विदितं स्वरहस्यरूपं
तेनापि किं नु विदितेन यदि प्रलिप्तः ।
तस्माद्विहाय जगतः सकला दुराशा
यत्नं विधेहि विमलात्मविलोकनाय ॥ ४ ॥

किमर्थमाप्तं नरजन्म चिन्त्यताम्
भवाटवीषु भ्रमता शरीरिणा ।
अमृष्टदेहाप्तिफलो नराधमः
करोति यत्तन्न हि शान्तिकारणम् ॥ ५ ॥

असंख्यजन्मार्जितपापसंचयो-
द्भवात्कुसंस्कारसमूहकारणात् ।
असंख्यदेहेषु गतः परिष्क्रिया-
मवाप्य चासीदति जन्म मानुषम् ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदापि विद्युच्चलजीवितो नरो-
ऽभिमानतो दारधनादितत्परः ।
अमूल्यरत्नं समयं जहाति हा
न वेद चात्मानमृतापि भावि वा ॥ ७ ॥

शिशुत्वकाले किल केलितत्परः
प्रियानुरागी ललिते तु यौवने ।
जरानुलिप्तो विकलः कलाहतः
क्षमो न कर्तव्यविधौ नरो भवेत् ॥ ८ ॥

रे चित्त किं न भजसे तमनन्यरूप-
मात्मानमेकमविकारमचिन्त्यरूपम् ।
भिन्नं यतः किमपि नास्ति समस्तरूपं
यस्य स्मरन्ति मुनयः सततं स्वरूपम् ॥ ९ ॥

जानासि यद्रमणमात्मसुखस्य बीजं
तन्निश्चितं परिणतावतिदुःखहेतुः ।
तेजो विनाशयति सत्त्वविनाशकारि
तत्त्वं जहासि न हि तत् क गतो विचारः ॥ १० ॥

रामे रमस्व रमणं यदि वाञ्छसि त्व-
मर्थं विचार्य विनिमुच्य समस्ततृष्णाम् ।
यद्दृष्टिगोचर इहास्ति हि सर्वमेव
मायाकृतं तदपकर्षति बन्धनाय ॥ ११ ॥

आसक्तिरेव विषयेषु कठोरपाशो
बद्धो दृढं पुनरयं न भवान्तरेषु ।
नैकासु योनिषु पतन्नपि धीविहीनो
निर्मुच्यते न विवशो हतबोधनोऽसौ ॥ १२ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

देहे जरामुपगते श्लथतां गतेषु
सर्वेन्द्रियेषु विषया यदि नैव सेव्याः ।
ज्ञानं तदाजनि किमप्यथ तन्न मोक्तुं
सम्यक्क्षमं विषयवासदुरासपाशात् ॥ १३ ॥

देहे करोष्यभिमतिं नु किमस्ति तत्र
मेदोऽस्थिरक्तकफमूत्रपुरीषवर्जम् ।
नो दृश्यते किमपि तत् त्वमु यत्र धत्से
मोहाभिमानमथ भङ्गुरमेककाले ॥ १४ ॥

येनेन्द्रियप्रसृतमत्तमहाहयानां
वेगं निहत्य वशमागमिताः प्रसह्य ।
इन्द्रोऽपि तेन विजितः स मुनिः स योगी
तेनास्ति कोऽपि न समः स विदन्महीयान् ॥ १५ ॥

भूमिर्भुवं जलमिदं जलमभ्युपैति
तेजः स्वमम्बरमिदं गगनं शरीरात् ।
प्राणोऽनिलं धियि मनो मनसीन्द्रियाणि
धीरात्मनीति सह नान्यदनेन याति ॥ १६ ॥

आशाः समस्ता मनसो विकल्पा-
स्ताभिर्युतो याति भवान्तराणि ।
आशाविहीनः सुकृती प्रबुद्धो
न कल्पते नाम पुनर्भवाय ॥ १७ ॥

पुण्येऽपि पापेऽपि निवृत्तवृत्ति-
र्मित्रेष्वमित्रेष्वपि तुल्यदृष्टिः ।
आत्मीयमेतत्परकीयमेत-
देतां मतिं चित्तपटान्निरस्येत् ॥ १८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भुक्तिं यदीच्छसि सखे भज राममेकं
कामान् विहाय सकलान् गतभेदबुद्धिः ।
तत्सोऽहमस्मि न च मत्किमपीह भिन्नं
विद्धानिति प्रयत एष्यसि सत् स्वरूपम् ॥ १९ ॥

प्राप्ते च तस्मिन्न हि कापि वाञ्छा
सर्वेष्वहं मय्यपि सर्व एव ।
आनन्दरूपोऽतितरां प्रशान्तो
निर्लेपभावोऽनुविकाशमानः ॥ २० ॥

यथा समुद्रे न हि बिन्दुरीक्ष्यते
क्षते घटे तद् गगनं न लक्ष्यते ।
तथा गतो ब्रह्मपदं भवाभवा-
दलक्ष्यरूपोऽपुनरागमाय ॥ २१ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# "अहो अकरुणाः खलु ईश्वराः!"

माधव देशपाण्डे

मुग्धो वायुर्वियति विचरन् मत्ततां संविधत्ते
दीना मेघा गलितविभवा दैन्यमुद्भावयन्ति ।
निर्विण्णेयं जनयति शुचं निश्चला वृक्षराजिः
क्लान्तश्चन्द्रो मनसि तनुते मन्दतां वीतकान्तिः ॥ १ ॥

दीनं चित्तं विलयमयते शोकसारे गभीरे
मान्द्यं सृष्टेर्विशति हृदयं पूर्वनिर्भिन्नबन्धम् ।
चेतोवीणां क्वणयतितरां शल्यमन्तर्निगूढम्
भावोद्वेगात् सृजति नयनं किञ्चिदुष्णं प्रवाहम् ॥ २ ॥

दृष्ट्वा नूत्नां परमसुषमां सृष्टिमेतां वसन्ते
चूतोद्भेदे मधुमदरसं मञ्जरीणां निपीय ।
सम्भ्रान्तेन स्फुरितरुचिना नैकवारं मयासीत्
कष्टं ! मुग्धं !—मनसि लिखितम् 'जीवितं कान्तमेव' ॥ ३ ॥

काञ्चित् प्रीतां विदितहृदयां वीक्ष्य माङ्गल्यमूर्तिं
शून्ये चित्ते मम समुदितो नूतनः कोऽपि रागः ।
मय्युद्भिन्नं नयनसुभगं भावमापीय हर्षात्
सानन्दं मे हृदयमतनोत् नन्दिता सा नितान्तम् ॥ ४ ॥

भावाक्रान्तं भुवनमखिलं भावरूपं ममाभूत्
तावत् जाता परुषमनसः पद्मयोनेरसूया ।
सञ्जातो मे मनसि रुचिरो नूतनो योऽनुरागः
कौटिल्यं तत् पुनरिह विधेरुत्थितं तं निहन्तुम् ॥ ५ ॥

कष्टम् !—'कान्तं जगद्' इति—गदन् मर्मरो निर्झरीणां
ग्रीष्मापाये स्वतनुविरहादन्यथावृत्तिरेव ।
काले रम्यो नवमधुरिमा यत्फलानां, स चूतः
शाखाशेषः शिशिरसमये शीर्यते मन्दभाग्यः ॥ ६ ॥

वैक्लव्यं नः प्रणयिमनसां दारुणं तत् चिकीर्षोः
दुष्टं चित्तं तव हतविधे ! दूयते किं न तीव्रम् ।
कष्टम् ! प्रेम्णो गहनगहना किं गतिर्निष्ठुरान्ता
नान्यः पन्थाः ! कथमकरुणा ईश्वराः ! हन्त ! हन्त !! ॥ ७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## कज्जली (गज़ल)

शिवप्रसादो भारद्वाजः

त्रियामे ! याति यामोऽवेक्षसे कस्याऽऽगतं बाले ?
प्रियः करते शुभे ! त्वं वीक्षसे यस्याऽऽगतं बाले ?
शशी द्वारे चिरादास्ते प्रसादार्थं तव श्रीमान्
अतः प्रेयानसौ कोऽवेक्षसे यस्याऽऽगतं बाले ?
इदं नीलाम्बरं चित्रं तथा रत्नावली तारा ।
सुसज्जा किं तदर्थेऽवेक्षसे यस्याऽऽगतं बाले ?
किमर्थं कोपने ! मुक्तं तमिस्रं केशपाशोऽयम् ।
शठो यातोऽन्यतः किं वीक्षसे यस्याऽऽगतं बाले ?
सखी ते कौमुदी मूका दधाना दीपितामुल्काम् ।
विचेतुं किं गता तं वीक्षसे यस्याऽऽगतं बाले ?
सुखं निद्रारसे मग्नं तमिस्रं केश-पाशोऽयम् ।
विनिद्रा त्वं वराकी वीक्षसे कस्याऽऽगतं बाले ?
किमर्थं शोभने ! श्यामं मुखं, ते मानसं दूनम् ?
अलज्जः को गतस्त्वं वीक्षसे यस्याऽऽगतं बाले ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# अन्यापदेशपरिशिष्टम्

य. महालिङ्गशास्त्री

सरसि न भवदन्यो राजहंसास्ति मान्य-
स्तव न सदृशमेवं क्लिष्टधर्मस्वनैष्ण्यम् ।
खलमतिरयमल्पः पश्य दर्पाद्रकोट-
स्त्वयि भवति नृपीयन् बाधते मीनलोकम् ॥ १ ॥

दर्पोद्रिक्तो दम्भवृत्तिर्बकोटः
सासूयस्त्वय्यस्त्ववज्ञाकरालः ।
सुन्दर्यस्त्वां शिक्षितुं यानलीलां
संसेवन्ते किं न हंसावतंस ॥ २ ॥

साटोपमारटति चञ्चति मौकलीन्द्रः
स्तोकोच्छ्रितिप्लुतिरपि द्युचरावलीषु ।
मूर्खस्य तस्य मुखरस्य दुरुद्धुरस्य
को नाम लालनरसः क इवोपरोद्धा ॥ ३ ॥

मित्रस्योदयशंसिनि त्वयि धृतोल्लासामिमां पद्मिनीं
मुग्धस्मेरदृशं किमाविलयसि प्रत्यूष दीर्घीभवन् ।
येन त्वत्प्रतिबोधितैर्मधुकरैरस्या निपीतोऽधरः
शीलं स्वच्छमिवाहृतः परिमलो वैभातिकैश्चानिलैः ॥ ४ ॥

वाताशनस्य तव नास्त्युपभोगलेशो
रम्येषु वस्तुषु तथाप्यतिदुर्जनोऽसि ।
यच्चन्दनेषु निधिमौलिषु केतकीषु
तिष्ठन् फणीन्द्र निरुणत्सि तदाजिहीर्षून् ॥ ५ ॥

भर्तुश्चण्डकरानुवर्तनदशानिम्नस्य बंभ्रम्यतः
प्रायो दुर्घटगाढसंगमरसास्वादोत्सुका यामिनी ।
यावद्ध्वान्तशुचं विधूय रुरुचे पक्षे सिते पुष्कले
तावत्प्रादुरभून्निरुद्धगगनाभोगा च कादम्बिनी ॥ ६ ॥


CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भृङ्गान्नाद्रियते मधूनि ददती कादम्बगोष्ठीरसै-
नैवापह्रियते न सौरभभरादाने मनाग्रज्यति ।
किंचोन्मुद्रणविस्मृतस्मितमुखी वीतोत्सवा पद्मिनी
तीव्रं धारयति व्रतं दिनकरो यावत्पुनर्दृश्यते ॥ ७ ॥

दृष्टादृष्टचरा ह्रियेव ललिता या पूर्वमस्थाद्गृहे
सैषा दीपशिखा न यावदरुणो दृग्गोचरादत्यगात् ।
तावद्द्वारमुपेयुषी विलसति स्वैरं पतङ्गान् बहून्
कान्त्या विभ्रमयन्त्युदारविहृतिः सर्वत्र संदृश्यते ॥ ८ ॥

आरब्धानिलपारणैः विषधरैः स्थानं स्वमावेष्टितं
त्यक्त्वा निष्पतितः पथि प्रतिहतः पृथ्वीभृतां शृङ्गकैः ।
विद्विष्टो वियुताङ्गनाभिरभितः पीतश्च वातायनैः
स्थाने जर्जर एष यात्युपवने मान्द्यं मरुद्दक्षिणः ॥ ९ ॥

कालज्ञासि न शारिकेऽतिमुखरे केकिन् कृतं ताण्डवैः
आलापैरलमन्यपुष्ट विरम द्रागेव मन्दानिल ।
कामं कामिमनोविनोदकुशलाः सन्त्येव वस्ते गुणाः
किंतु प्रोषितभर्तृकापरिजनः खेलां न वो मृष्यति ॥ १० ॥

दुष्टं वा कलिलं जलं यदभितः कुल्यामुखेनाथवा
गूढं भूविवरैः प्रविश्य सुमते केदारमापूरयत् ।
तेन प्रक्षरता न भाव्यमिह तद्बध्नीहि सेतुं दृढं
यद्यन्तः कलमोदयो यदि बहिः केदारविस्फोटनम् ॥ ११ ॥

वर्धिष्णुप्रचलोर्मिमालतुमुलस्याप्राप्तपारस्य च
क्षारस्याम्बुनिधेरलक्षितगृहीतैकान्तसारो घनः ।
दूरे व्योम्नि समुन्नतो निरवधौ स्फारीभवन्नात्मना
स्वादु स्वादु पयः प्रवर्षति जगज्जीवातुसिद्धौषधम् ॥ १२ ॥

सीतावृत्त्युपलम्भनर्मसुहृदे संग्रामरङ्गे महा-
योधायोचितमन्त्रमन्त्रिसदसे काले च वाहाय ते ।
भ्रातुर्जीवितदायिने गुणवते यस्मै स्वमाशंकते
कार्तज्ञ्यं प्रति दुर्विधं रघुपतिः धन्यस्स वातात्मजः ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आसारस्य नभस्यविभ्रमभृतो लोके प्रवृत्ते रये
नैयत्येन समभ्युदेति तटभूः संरोधिनी पार्श्वयोः ।
आचाब्धेरनुगामिनी लघु निपीड्याध्वन्यवस्थापनी
किंचौद्धत्यनिवारणी प्रतिनवोन्मेषश्रिया हारिणी ॥ १४ ॥

वंशश्यामदलोदरेषु पतिता हैमाः प्रगे बिन्दवः
शर्वर्यां तुहिनांशुसंभृतलसत्तेजोभ्रमापादकाः ।
भ्राजन्ते विहितोदयस्य तरणेः हस्तावमर्शात्क्षणं
लीयन्तेऽनुपदं कियच्चिरमतस्तिष्ठत्यमीषां स्मृतिः ॥ १५ ॥

क्रुद्धाशीविषरुद्धकोटरशतप्रक्षुण्णहृद्गर्दभ-
ध्वानोद्विग्नतया विशीर्णकरणं धत्तूरदुर्लक्षणम् ।
उन्मीलन्मधुसंपदि क्षितितले जीवामि कुड्यं कुतः
किं नोदेष्यति मत्कथास्मृतिहरो हा हन्त धाराधरः ॥ १६ ॥

प्रावृड्दुःश्रवगर्जितैः प्रतिभया सन्तर्जयामास नः
सन्तापग्लपितं व्यधत्त भुवनं ग्रीष्मो दुरूष्मोद्धतः ।
सर्वस्यापचितिं ततो द्रुमनदीमुख्यस्य चक्रे शरत्
हेमन्तोऽपकरोति न स्फुटमहो लोकः किमस्राविलः ॥ १७ ॥

केनोप्तोऽसि किमीहसे परपरिष्कारैरुपस्कार्यतां
सुस्फीतः स्नुहिपादप त्वमभितो रोहन्नलं पुष्यसि ।
नित्यं प्रत्यनुपालिताऽपि पुरुषैः प्रागेव पुष्पोद्गमा-
त्प्रम्लायन्त्यनिलैरियं क तव भोः क्षुद्रा लता माधवी ॥ १८ ॥

सद्वृक्षादहमङ्गिनो विदलितत्यक्तो वहन् काष्ठतां
शुष्यामि स्फुटितोदरे क्षितितले त्वग्दाहदग्धः शुचौ ।
यावद्रश्चनभृन्न कश्चन मया सस्वार्थकस्तावता
मामाप्लावय वर्षवारिविधृतं द्रागम्ब कादम्बिनि ॥ १९ ॥

किमीप्सामो देवैरुपनतविषत्रासविधुरै-
स्तृषोपेतैर्याते नयनपथमद्धाऽमृतघटे ।
स एवैकोऽस्माभिः स्तुतिनतिभिरीड्यः पशुपति-
र्द्रुतं येन क्ष्वेलः स्वयममृतकल्पः कबलितः ॥ २० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भित्त्वा बन्धनचारकं व्यपगतो वैराग्यलक्ष्मान्वितं
कश्चिद्वर्ष्म वहन् निवर्तनकथादूरान्तरे वर्त्मनि ।
यातः क्वापि शुनीसरोषभषणैः क्वाप्यर्यकाणां हसैः
क्वापि क्रुद्धदुरीश्वरव्यतिकरैर्दीर्घा दिशो धावति ॥ २१ ॥

रथ्यामारुतलोलचीवररुरुत्सोद्दामकेलीक्रमः
श्वा यः शौर्यमदं बिभर्ति रमयन् पिण्डप्रदं साक्षिणम् ।
सोऽयं प्रस्तरघृष्टमुष्टिमुपलभ्याभ्यागतं भिक्षुकं
जङ्घाभ्यन्तरलीनवालवलयो दीनं दिशो धावति ॥ २२ ॥

[1]"मेत्तूर"वारिनिरोधमन्वणुपयः सह्यात्मजायास्त्वयि
प्रायो न क्षरति क्रमेण पुलिनान्यारूढगुल्मानि ते ।
भ्रातः [2]"कोल्लट", कार्श्यभागपि भवानद्यापि कोणे क्वचि-
द्वेणीं बिभ्रदपामहो तु महिमा ! नावैव सन्तीर्यते ॥ २३ ॥

सूर्याचन्द्रमसौ पुरा तिरयितुं सोत्सेकमुत्सोढवान्
यः कष्टं घटभूनिशुम्भनिकृतो नीचैः स्थितिं लम्भितः ।
राजद्राजतशैलशेखरललद्गौरीशहीर, प्रभो
तस्मिन्न प्रवणो गुणैर्यदि भवान् विन्ध्योऽस्मि वन्ध्यः पुनः ॥ २४ ॥

हंसः सारसचक्रसाह्वयबकप्रायैरुपेतः खगै-
र्नीत्वर्तूनपि कांश्चिदच्छति रसाद्भूयः सरो मानसम् ।
यत्र स्वोचितसंसदुन्मदमिलत्केलीकलः काङ्क्षति
स्वर्णाम्भोरुहसूत्रिकाकबलनं स्वच्छे तुषाराम्भसि ॥ २५ ॥

अन्तेवसंस्तव वसन्त इहास्मि भृङ्गी-
सङ्गीतसौरभसुखानिलपारिणाह्यः ।
यावन्न फाल्गुनतुषारपटीमपास्य-
न्निन्त्सेऽर्यमन् अनुमतोऽस्तु कथं जनोऽयम् ॥ २६ ॥

---

१. Mettur Dam.

२. The river Coleroon, Kollida in Tamil.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यत्ते शरत्समय, विश्वसिता वसामः
पद्माकरे त्वमथ चेन्निविवृत्सुरारात् ।
काले तुषारपरुषे क इवाभ्युपायः
किं वर्तनं भवतु नः क्व नु वा व्रजामः ॥ २७ ॥

नामी विभ्रमिणो विकासिषु रसादभ्यस्तयाच्चागिरो
नैवामी धृतताण्डवा जलभृतो दृष्ट्वोन्नतान् दुर्दिने ।
नास्माकं कवलार्थमेकचरणस्थित्या जडोपासनं
त्वं चेद्यास्यसि कोटरे पुनरमी लीयामहे माधव ॥ २८ ॥

संडीनप्रतिडीनडीनडयनप्रोड्डीनपश्चात्पुर-
स्तिर्यग्डीनविलोमडीनविकटव्याडीनमुख्यान् क्रमान् ।
अभ्यासात्परिबिभ्रतः क्व नु वयं काका वराकाः पुनः
कामी पक्षविधूननेऽप्यलसका वैण्कुठवाहाः खगाः ॥ २९ ॥

संशुष्ककीकसखटत्कृतिसव्रणान्त-
स्तालुस्रवद्रुधिरलेहनतृप्तिभाजः ।
कौलेयकस्य कतमा वयमम्बुजिन्याः
पाथः सुगन्धि करपूरितमापिबन्तः ॥ ३० ॥

यन्मानुष्यविडम्बनं प्रहसनं चेष्टास्वरूपादिभिः
किञ्चिद्यश्च विलोपकर्म विदधद्व्याहन्ति यन्नान् शतम् ।
शाखावास्तु तदेव वास्तु परिपोष्यांसे धृतं लालयन्
वीरो वष्टि विलक्षणं व्यतिकरं कस्तत्पुरः प्रक्ष्यति ॥ ३१ ॥

गङ्गाजलचिरमज्जन-
शुद्धिं गर्वेण वर्णयत्युपले ।
अवकररुद्धो मणिरथ
कमुदञ्चयतु प्रभावं स्वम् ॥ ३२ ॥

रोहन्ति निर्भरममी स्नुहिभूरुहस्ता-
नुत्सृज्य दूरमपसर्पति सर्पभीत्या ।
लोको निहन्ति चरणैर्नवशाद्वलानि
निर्व्याजमार्दवगुणानि पथि स्थितानि ॥ ३३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सरित्सु सलिलोद्गमाः पुलिनवालुकाखानिता-
स्तुषारलवमौक्तिकद्रवमनोहराः शीतलाः ।
भवन्ति तृषितैः सुखं जगति सेव्यमाना जनैः
प्रपातपरुषा झरा न खलु भूरि संराविणः ॥ ३४ ॥

अयि मातः शार्दूली
गौरपि पिबतो जलं किलैकत्र ।
न मुनिर्नाश्रमदेशः
किं भो गोचर्मधारिणी व्याघ्री ॥ ३५ ॥

असावसृक्पायिषु किं न गण्यते
न किं गरुत्मानुचितः पतत्रिणाम् ।
विचक्षणः किं न निशासु गायन-
स्तथापि तुच्छो मशकस्तु दंशकः ॥ ३६ ॥

उत्क्षिप्याङ्घ्रिमिहाश्मनस्तर शनैरुन्मोचयोर्वोर्लिताः
संदंशान् विधुनीहि गात्रचलनैर्गुल्मान्तरं मा विश ।
हा कष्टं परिहृत्य किं विचरसि स्वं स्थानमव्याकुलं
कूलेऽस्मिन् तृणगूढकूपकुहरे धेनो कुतस्ते रुचिः ॥ ३७ ॥

गीताचार्यकृताधिरोपणधराश्रीपारिजातान्वयं
कस्त्वां वेद वने फलैः किसलयैः पर्णैः प्रसूनैश्च वा ।
भ्रान्ता नागरिका न दारुणि पुनश्छिन्दन्ति यद्दारुणा-
स्तद्भाग्येन सखे न खेदय धियं स्वर्गच्युतिं चिन्तयन् ॥ ३८ ॥

यद्वक्त्रं मलिनीकरोति च तिरोधत्ते यदीयं महो
यामुद्वेलशुचं करोति दलयत्याशां च यत्प्राणने ।
जीमूतो गगनांशुमालिजनतासस्याङ्कुराणामहो
तेषामेष पराभवोर्जितधिया कालेन दत्ताभयः ॥ ३९ ॥

क्षुद्रस्वार्थाः श्येनाः मौकलयो जातिमात्रविश्वासाः ।
आगरुडादा च बकात् सरसीमत्स्यार्थमुद्यतद्रोहाः ॥
कः क्षीरनीरभेत्तरि मानससरसीविहर्तरि श्लाघाम ।
जतुकाकौशिकमशकप्राये ध्यायेद्विहङ्गसमुदाये ॥ ४० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वर्णं न प्रतियोजयिष्यसि विधास्यस्येव नो मार्दवं
स्रक्ष्यस्यत्र न सौष्ठवं परिमलं न प्रेरयिष्यस्यपि ।
आरामे यदि रोपितः सुमनसां लब्ध्यै लतापोतको
वाटीप, प्रतिपालयास्य समयं कृत्वाऽद्भिरासेचनम् ॥ ४१ ॥

गाम्भीर्यं मम जानते कति बतेत्यब्धिर्गतः क्षारता-
मश्मैवाभवदद्रिराडपि मदौन्नत्योन्मुखः को न्विति ।
भूमानं मम जातु वेत्स्यति क इत्याधान्नभः श्यामतां
लोकं विस्मृतशासनं प्रति शुचा पुस्फोट देवोऽष्टधा ॥ ४२ ॥

हंसानां विरलेऽन्वये विगलितः पश्चान्मरालो युवा
नाप्यैर्नाटविकैश्च वा खगकुलैर्नैवापि वैहायसैः ।
कैश्चित्प्राप गुणानुमानविमुखैर्भूयोऽपि भूयो भ्रमन्
पक्षित्वेन विभावनामपि कुतस्तस्याभिजात्योचिताम् ॥ ४३ ॥

कूटस्थैर्गलरेखया तनुरुचा गत्या विनत्या शिरो-
रत्नेनोन्नटनेन वा फणभृति स्नेहं निबध्नासि किम् ।
जिह्वे द्वे चपले विषं मुखबिले दंष्ट्राकरालेऽनलं
क्रोधे पश्यसि नास्य मृत्युरयि भो मृत्युस्तवासौ पुरः ॥ ४४ ॥

आलिङ्गन् शललीं वराहयुवतिं चुम्बन् रिरंसन् शुनीं
शार्दूलीमभिलापयन्नुपनयन् शय्यां भुजङ्गाङ्गनाम् ।
सर्वात्मन् कथमीश्वर त्वमखिलप्राणिप्रमाणे स्थितः
शृङ्गारानुविधानकर्मठतया बीभत्समासेवसे ॥ ४५ ॥

प्रत्यङ्मरुद्भवशादतिमात्रचित्त-
धाटीवलत्तृणरजोवदमी न हार्याः ।
वृक्षावलीव न च बाहुशिरोऽभिनीति-
व्यक्तानुवृत्तिशरणा वयमद्रिकूटाः ॥ ४६ ॥

क्षुद्रेष्वश्मसु काञ्चनाविरलितप्रान्तेषु नारीनर-
ग्रीवावक्त्रकराधिरोहणललल्लीलालवालम्बिषु ।
धूलीधूसरितः पदा च निहतो यस्यापि कस्यापि वा
सद्रत्न त्वमुपैषि मानसरुजाशान्तिं हि रत्नत्वतः ॥ ४७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मीं कस्यचिदप्सरोगणमथाप्यन्यस्य कल्पद्रुमान्
कस्यापि प्रददौ स दुग्धनिधिरित्यास्तां वृथैषा कथा ।
क्षारैरेव कदम्बुभिः प्रतिभयैर्यादोभिरन्तर्धृत-
ज्वालः सिन्धुपतिर्हलाहलगृहं प्रत्येतुमर्होऽस्ति नः ॥ ४८ ॥

वारान् षड्दश दारिकान्नकबलोच्छिष्टैरुपच्छन्दितो
रथ्याश्वा गृहदेहलीमथ विशन्नन्तश्च भक्ताशया ।
उद्विग्नैर्गृहमेधिभिर्बहुतिथं धिग्धिग्धिगित्युद्गतै-
रास्फोटैर्लगुडैः कवाटघटनैः कष्टं विनिष्कास्यते ॥ ४९ ॥

वातोऽसौ पवते हितः किल ममेत्यासं क्षणं विस्मितः
कष्टं भोश्चपलेन तत्कृतमहो सन्तापसन्दीपनम् ।
येनाधूतवरांशुकान्तमवशाल्लग्नं हतप्रान्तरे
गुल्मे कण्टकिनि क्षमोऽस्मि न चिरादादातुमप्रक्षतम् ॥ ५० ॥

( अनुवर्ति )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# भारतशतकम्

राम कैलास पाण्डेयः

आरुह्य भूतेशगिरेर्ललाटं
भणत्ययं लोकललामदेशः ।
सपत्नवक्षः प्रविदार्य पुत्राः
कीर्तिध्वजं दर्शयत प्रफुल्लम् ॥ १ ॥

हर्षावहो नो मनसो विचारो
दन्दह्यते हृद्गतभावना च ।
कथं सुता मे विरहय्य पूतां
प्रवृत्तिमन्धे तमसि भ्रमन्ति ॥ २ ॥

आकार्य पुत्राञ्जनको यथा हि
तनोत्युदारां मधुराञ्च शिक्षाम् ।
तथैव भूयिष्ठमुदे प्रजानां
तनोम्यहं गौरववृत्तवल्लीम् ॥ ३ ॥

शकुन्तला यं नयनाभिरामं
हृद्यञ्च नव्यं सुषुवे कुमारम् ।
योऽजीगणत्केसरिबालदन्ताँ-
स्तस्मादवाप्तोऽस्मि भुवि प्रतिष्ठाम् ॥ ४ ॥

तत्याज राज्यं कलहायमानं
ययावरण्यं रघुवंशरत्नम् ।
कालुष्यमूलं प्रसभं विपाट्य
हत्वा दशास्यं मुमुदे चिराय ॥ ५ ॥

रिङ्गत्तरङ्गं जलधिं सहेल-
मुल्लङ्घ्य बभ्राज सुवर्णपुर्याम् ।
जघान रक्षांसि ददाह लङ्कां
ध्रुवं कपीशो रिपुराशिकालः ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

क्रौञ्चस्य कारुण्यरसान्वितां गां
निशम्य शोकार्णवतामवाप ।
रामायणं यश्च चकार काव्यं
नासौ मनःप्राघुणकीकृतः किम् ॥ ७ ॥

बभाण गीतां सरसां गभीरां
जघान योऽरींश्छलनामुपेत्य ।
वृन्दावने राधिकया सहैव
विहर्तुकामो मम कृष्ण आसीत् ॥ ८ ॥

गाण्डीवबाहू रणकाण्डशौण्डः
करालकालान्तकृदाहवे यः ।
जिगाय बाह्यानपि चक्रसङ्घान्
स शक्रपुत्रो विहसंश्चकास्ति ॥ ९ ॥

व्यासर्षिणा या ननृते मयूरी
वाणी महाभारतनाम्नि कुञ्जे ।
साऽद्यापि चेतांसि विमोहयन्ती
रसं स्रवन्ती नितरां विभाति ॥ १० ॥

उट्टङ्कितानि प्रथितानि सन्ति
पुराणपृष्ठे कनकाक्षराणि ।
रहस्यविद्यालपितानि नूनं
समुल्लसन्तीह मयोद्धृतानि ॥ ११ ॥

जज्वाल बौद्धाग्निरहो मदीये
रम्ये प्रदेशे द्युतिदीपिताशः ।
चीनादिदेशेषु गताः स्फुलिङ्गा
दिवानिशं स्वप्रभया ज्वलन्ति ॥ १२ ॥

प्रधार्य विश्वं व्यसने निमग्नं
धर्मं महान्तं ललितं च तेने ।
बुद्धो महामोहतमो विभिद्य
ज्ञानोदधौ मज्जनमेव कृत्वा ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चीनौकसः सिंहलदेशजाश्च
ब्रह्मप्रजा बौद्धरता जना ये ।
मत्तो विचारं परिपोषयन्तो
ममैव धर्मं परिपालयन्ति ॥ १४ ॥

नैजं मतं ये बहुमन्यमाना
मतं मदीयं परिवर्जयन्ति ।
चिरप्ररूढं हरिचन्दनं ते
छित्त्वा मुधा निम्बतरुं श्रयन्ते ॥ १५ ॥

धक्ष्यन्समस्तं किल नन्दवंशं
क्रोधार्चिषा नीतिविदां वरिष्ठः ।
चाणक्यनामा जनताहिताय
मुराप्रसूतिं वरयाञ्चकार ॥ १६ ॥

विपप्रथे वेपथुरन्तराये
जाते मदीये खलु चन्द्रगुप्ते ।
अजस्रमास्फालितदुर्मुखानां
तदस्त्रजालैर्व्यथिते शरीरे ॥ १७ ॥

दोधूयते यस्य यशःपताका
संसारसौधे महसा ज्वलन्ती ।
असावशोकः करुणावतारो
भूमिं मदीयां समलञ्चकार ॥ १८ ॥

जित्वा कलिङ्गं न तथा क्षितीशो
यथा नु बुद्धौ मनसा ननन्द ।
मनोऽनुकूलानि हि चेष्टितानि
प्रमोदकारीणि सदा भवन्ति ॥ १९ ॥

जिह्वाग्रभाजः खलु संप्रतीमे
नृपाः कियन्तो विलसन्ति विश्वे ।
प्रश्ने समुद्गच्छति पद्मयोनेऽ-
शोकं विशोकं नु वदिष्यसि त्वम् ॥ २० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुधाद्रवार्द्रीकृतकाव्यसूक्ती-
रास्वाद्य पाश्चात्यमनीषिवर्गः ।
भृशं तुतोषात्मनि कालिदासं
कलाधरं चाकलयाञ्चकार ॥ २१ ॥

तत्पाणिनेः सूत्रपरम्पराया
विधाननैपुण्यमहो विचिन्त्य ।
आश्चर्यचर्याञ्चित एव लोकः
संशीतिमार्गं सहसा प्रयाति ॥ २२ ॥

आनन्दवृद्ध्यै मनसश्च तृप्त्यै
प्राप्त्यै कलाधर्मनयालयस्य ।
प्राचीनकालस्य दशां मदीयां
जनास्समालोकयतायि यूयम् ॥ २३ ॥

योगीन्द्रयोगासनचाकचक्यै-
श्चक्षूंषि लोकस्य भयान्वितानि ।
शरीरिणामार्तरवानुसारं
पत्राणि वृक्षैरपि पातितानि ॥ २४ ॥

आच्छादयन्तः ककुभो मुखानि
पस्फायिरे खेऽध्वरवेश्मधूमाः ।
प्रीताश्च कामं जलदा नदन्त-
श्चकाशिरेऽलं जलदानशीलाः ॥ २५ ॥

लये पटुत्वं दधती शुकाल-
र्जगाद मन्त्रान्स्वरतः पठन्ती ।
अनाविलं घोषमुदीरयन्त्यः
कीराङ्गनाश्श्लोकचयं च पेठुः ॥ २६ ॥

साहित्यमुच्चैरधरे दधाना
श्रुतिं मुखे व्याकरणं च मूर्ध्नि ।
शास्त्रं दृशोर्ब्रह्म मनोनिधाने
गीर्वाणवाणीललना रराज ॥ २७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कीर्तिं नवां रम्यमयं च चित्र-
मनल्पदृष्टिं स्वविधीद्धबुद्धिम् ।
अरीनवन्तं च हि मां विभाव्य
विश्वं मदीयं शरणं चकाङ्क्ष ॥ २८ ॥

विस्तारयामास दिने दिने मे
दिव्यामनन्तामनघां च विद्याम् ।
सुखं पठँस्तक्षशिलामठाट्टे
विद्यार्थिसार्थो धृतधर्मदण्डः ॥ २९ ॥

वृक्षालवाले सलिलं सलीलं
पपौ मृगः कातरतां विहाय ।
तडिन्निभं सिंहसटासमूहं
स्वशुण्डया कर्षयति स्म नागः ॥ ३० ॥

चिक्रीड चक्षुःश्रवसादरेण
समं प्रहृष्टो नकुलो वनान्ते ।
स्वहस्तलूनानि फलानि मन्ये
ददौ कपिः सोत्कतया जनेभ्यः ॥ ३१ ॥

अनोकहानां मृदुपल्लवानां
हिमानिलैर्लब्धसुखा प्रजा मे ।
घ्रात्वा सुगन्धं कुसुमोदराणा-
मवाप्तकामा हृदि रज्यते स्म ॥ ३२ ॥

कदापि सद्धर्मजुषो नरोऽकं
प्रपेदिरे नाल्पितपापपुञ्जाः ।
अनिह्नुवाना अवदातकर्म
जग्मुर्विभुं हंसमनन्यभावाः ॥ ३३ ॥

शिवप्रियः पञ्चशरेऽनुरक्तो
विधौ च लुब्धः खलु सैंहिकेयः ।
सभारतो भारत एव भूत्वा
लोकः सरामो न विराम आसीत् ॥ ३४ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न केवलं केशवभक्तिरज्ज्वा
नारं स्वकीयां मतिमाबबन्ध ।
परं मृडप्रेमपयोधिपूरे
निमज्जयामास मनो जनौघः ॥ ३५ ॥

विकस्वरैः स्वस्मयजैर्निनादै-
रास्फोटयन्दिक्करिकर्णरन्ध्रम् ।
रणाङ्गणे कालकृपाणकृत्यै-
र्द्विषो निकृन्तंश्च जहास वीरः ॥ ३६ ॥

मधु क्वणन्तीममृतं क्षरन्ती-
मनन्तशातानि च सङ्किरन्तीम् ।
वीणां बभासे खलु वादयन्ती
महार्हहर्म्याङ्कगता महेला ॥ ३७ ॥

नदीशमालारसनापरीतो-
द्यानद्रुदुर्गच्छविभिश्च कान्ता ।
सशाद्वला मे विपुलामलेला
लक्ष्मीमपूर्वां बिभराम्बभूव ॥ ३८ ॥

यस्या गुहायास्तिमिरं प्रचण्डं
न शेकतुस्सूर्यविधू विभेत्तुम् ।
तस्यास्सचित्रास्तदिदं विजेतुं
शेकुर्दृषन्निर्मितभित्तयोऽपि ॥ ३९ ॥

परार्ध्यरूपाण्यतिपेशलानि
चित्राणि निर्माय मनोहराणि ।
स्रष्टुः कलालाघवमेव मोघं
चकार शङ्के किल चित्रकारः ॥ ४० ॥

साहित्यसङ्गीतकलाविलासै-
रुद्भासितं गुप्तयुगं प्रसिद्धम् ।
समाययौ स्वर्णयुगस्य नाम्ना-
ऽञ्जसा यदैतिह्यविदो वदन्ति ॥ ४१ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

समुद्रगुप्तोच्चरितप्रकर्षं
समाससंयुक्तपदैर्लिखन्ती ।
राराजतेऽद्यापि जयप्रशस्तिः
प्रकृष्टयागे नगरे प्रयागे ॥ ४२ ॥

निजौजसा राजकमेव दृप्तं
समुद्रगुप्तो विदलय्य युद्धे ।
राज्यं न जग्राह परन्तु कीर्तिं
कीर्त्या हि लुब्धाः सुनृपा भवन्ति ॥ ४३ ॥

क्षीराब्धिडिण्डीरसितं यशो यो
लेभे प्रहृत्य प्रबलं शकेशम् ।
स चन्द्रगुप्तोऽभिनवैः प्रकाशैः
ध्वान्तं समस्तं प्रचयं क्षिणोति ॥ ४४ ॥

निधाय बुद्धिं प्रतिभाप्रबुद्धे
बुद्धे हरन्दुःखभरं जनस्य ।
बलं विवृण्वन्नरिचक्रवाले
हर्षो जगाहे नृपतिः प्रहर्षम् ॥ ४५ ॥

धर्मध्वजं स्थापयितुं स्वकीयं
भूतिं मदीयां प्रति साभ्यसूयः ।
अनेकशो मे शुचिभूमिपृष्ठे
वैदेशिकानां निवहः पपात ॥ ४६ ॥

परैः कृतं दुष्कृतमाधिमेव
नो केवलं मे द्विगुणीकरोति ।
परन्तु हृद्यं हृदयं विषाक्तं
विधाय कायं कबलीकरोति ॥ ४७ ॥

हा हा गजन्यो यवनोऽतिमूढः
स्वसेनया मे द्रविणं विलुण्ठ्य ।
मुमोच नापि स्वमदावलेपा-
त्सुवर्णमूर्तीः त्रिदशालयस्थाः ॥ ४८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ध्यात्वेतिहासस्य घृणास्पदं मे
चेखिद्यते तं मन एव कालम् ।
नष्टानि यस्मिन् रिपुचेष्टितेन
पुराणशास्त्रस्मृतिपुस्तकानि ॥ ४९ ॥

धर्मं विचारं च नयप्रचारं
शिक्षाप्रणालीं च यतो बबाधे ।
अतो निशानाथसमे स्वराज्ये
कलङ्कपङ्को यवनप्रवेशः ॥ ५० ॥

नार्योऽप्यनेकाश्श्रुतिशास्त्रविज्ञा
अपांसुला धर्मकथासु रक्ताः ।
खिन्नाननाः दुःखदशासु नापि
संख्येऽग्रगण्याश्च पुरा बभूवुः ॥ ५१ ॥

( अनुवर्ति )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## मुक्तकाञ्जलिः

श्री दि. द. बहुलीकरः

ये केचिद्वसुधां सुधोपमरसैराह्लादयन्ति स्वयं
यत्नस्तान् प्रति नीरदानिव भवेद्व्यर्थोऽयमुच्चैः स्थितान् ।
सद्वृक्षा इव तोयमल्पमपि ये गृह्णन्ति बालार्पितं
संलापं नभसा च ये विदधते तेभ्योऽयमस्त्वञ्जलिः ॥ १ ॥

एवं तत्र सुखाशनं क्व विपिने स्वातन्त्र्यमत्र क्व त-
च्छ्रेयः किं नु ममैतयोरिति मनोदोलाधिरूढः शुकः ।
भुङ्क्तेऽत्रापि फलानि पञ्जरगतां यष्टिं श्रयन्नेकत-
स्तिष्ठत्युन्नतकन्धरश्च पवनैः स्पृष्टो वनोत्कोऽन्यतः ॥ २ ॥

अन्तर्गण्डकि संस्मरन्नभिभवांस्तान् मत्स्यकूर्मादितः
पश्यन् संनतमस्तकान् युतकरानत्रार्थिनश्चाधुना ।
शीर्ष्णो द्रागवतार्य पुष्पनिचयं भक्तार्पितं गद्गदः
शालग्राम इति स्म वक्ति यदिदं तद्देव्यवस्थेऽस्तु ते ॥ ३ ॥

पूर्वं चात्मविसृष्टमङ्गकवचं हृत्वा द्विजच्छद्मना
प्रच्छन्नं भुवि चागिलद् रणमुखे दैवं रथाङ्गं बलात् ।
"स्वायत्तं निजपौरुषं यदि तव क्वैतद् गतं साम्प्रतं ?"
दैवेनेति विडम्बितोऽङ्गनृपतिः स्वोक्तं पुनः स्मारितः ॥ ४ ॥

जानीमो न वयं सुखं स्वपिति वा नैवाथवा श्रद्धया
श्रद्धालुः सुलभाश्रुभिस्त्वहरहर्नेत्रे प्रमार्ष्टुं क्षमः ।
नैवाश्रद्धजनाक्षिपक्ष्मपटले निद्रापि सन्तिष्ठते
कष्टं ! नापि तदीयदर्शनपथो बाष्पाम्बुभिर्मृज्यते ॥ ५ ॥

वैरूप्यं प्रतिभागतं किमिति यो नित्योपहासास्पदं
तिष्ठन् केलिवनान्तिकेऽपि च सदा प्राप्नोषि यः कण्टकान् ।
धन्वाध्वक्रमणे क्रमेलक नृभिस्त्वं सोऽधुना स्मर्यसे
साकं गच्छसि तादृशैरवहितं रक्षोदरस्थं जलम् ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भ्रातर्वारिकणार्थमुन्नतमुखो धिक्, चातक, प्रेक्षसे
मन्ये नीतिरियं कदापि भवता नालोकिता लौकिकी ।
पश्यैतन्नयवेदिसारसबकैराविष्कृतं पाटवं
येनैवं विहरन्ति नित्यविनतग्रीवाश्चिरं वारिषु ॥ ७ ॥

"न त्वं मामपि नाम यद्गणयसे दृप्ते, तदेतत्फलं
प्राप्नोषी"ति शपन्मुनिर्मुनिसुताभाग्यानि धक्ष्यन्नितः ।
तिष्ठत्यत्र शकुन्तलानवहिता नाप्यालयः संनिधौ
जानीते न च कोऽपि शापवचनं, तन्मुक्त्युपायं कुतः ॥ ८ ॥

निर्घोषः शिवचापभङ्गजनितो द्यावापृथिव्योश्चर-
न्नुच्चैर्घोषयतीव डिण्डिमरवो यद्भार्गवोऽस्तं गतः ।
स्वीकृत्याभिभवं स्वविक्रममिव स्वांशात्पुरीवर्तिनः
शीतोष्णाश्रुभिराकुलो भृगुपतिर्माहेन्द्रमार्गं श्रितः ॥ ९ ॥

कश्चिन्मज्जति वारिषु स्थलधिया निःशङ्कमङ्घ्रिं क्षिपन्
कश्चित्तोयभिया सशङ्कचरणः सोपानतो भ्रंशते ।
मायित्वं प्रवयःपितामहकरादेतत्क सम्भाव्यते
सृष्टिं कोऽपि मयो व्यधाद् विदुरिमां मायेति तस्माद्बुधाः ॥ १० ॥

भूमौ स्वाद्भुतकर्मनिर्वृतमनाः शेते मुनिः स्वाश्रमे
यत्नो वासवकुण्ठितो द्युगमने बृन्दारकैर्हस्यते ।
तिष्ठन्सानुशयस्त्रिशङ्कुरुभयभ्रष्टोऽन्तरा रोदसी
स्वर्गं निन्दति कौशिकं च शपते सेर्ष्यं धरां वीक्षते ॥ ११ ॥

मेघैरावृतमम्बरं क्षितितलं श्यामं प्रनष्टा दिशः
पङ्केनाकुलितं वनं कटु रटत्येतच्च भेकोकुलम् ।
ईदृग्दुर्दिनकाल एव शिखिनां कस्मात्स नृत्योत्सवो
(नूनं)तैरचिरांशुदर्शमचिरात्तन्नृत्यमभ्यस्यते ॥ १२ ॥

केचित्ते वसुदेवमन्दिरधियः कारागृहं प्रापिता
अन्ये केऽपि यशोदया युतकरा बद्धाश्च दाम्नोदरे ।
व्याधिव्याधशरव्यताधिगमिता कैरप्युपद्वारकं
तृष्णे, कृष्णचरित्रमावहसि किं त्वल्लम्पटोद्वेगिनि ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एते प्राञ्जलयः पुरोऽस्य सहसा बध्नन्ति मुष्टिं रुषा
स्रग्भाराश्च पुरस्कृता झटिति किं लोष्टाश्मभावं गताः ।
सर्वे तेऽपि त एव सोऽपि न परः कस्मात्त्ववस्थान्तरं
केनाप्यत्र नरो दुरोदर इव प्रायोऽक्षवत्क्षिप्यते ॥ १४ ॥

कांश्चित्प्रापयतेऽनिशं क्षितिभृतां सामर्षतेवापदं
कांश्चिद्धावयते हयानिव कशाघातिः स्फुटद्वक्षसः ।
कांश्चिच्चालयतेऽतिवत्सलतया मातेव धृत्वा करं
रथ्यैका प्रतियात्रिकं पृथगहो, रूपान्तरैर्जृम्भते ॥ १५ ॥

श्रीरेषा मदकारिणी भगवतो विष्णोः प्रिया मे स्वसा
देवेन्द्रो बहु मन्यते मदमुचामग्रेसरं भ्रातरम् ।
सर्वं चैव मदोत्कटस्य वशगं कृत्वेति वाभ्यन्तरे
ध्मातोऽप्यत्र स शङ्क एव कुरुते कष्टेन भिक्षाटनम् ॥ १६ ॥

"एषा गर्ह्यते सुतापरिभवक्लिष्टा धरा कम्पिता
वैदेहीं जहतोऽद्य भीतमिव किं धर्मासनं वेपते" ।
इत्थं चेतसि चिन्तयन् प्रतिपदं बाष्पाकुलत्वात्स्खलन्
प्राकाश्ये विषमां निनिन्द पदवीं सौंहासनीं भूपतिः ॥ १७ ॥

वैदेहीं पुरतो वने च युगपत्पश्यन्मनश्चक्षुषा
शृण्वंस्तानि वचोऽमृतानि च समं तत्क्रन्दितैः कानने ।
पाणिभ्यामपिधाय कर्णनयनं वामां स्मृतिं दूषयन्
रामः शृङ्खलयेव बद्धचरणो गच्छत्यगच्छन्निव ॥ १८ ॥

अर्थं संस्मरणानुमेयमधुना स्वप्ने समासादितं
मूढो याति दिवापि शून्यमनसा नष्टं विचिन्वन्निव ।
कश्चिन्मूढतरो विकल्पनिगडैः कष्टं पदं न्यस्य ते
मा गाद्धस्तगतः कथञ्चिदिति च भ्रान्त्या वृथाऽऽयस्यति ॥ १९ ॥

दत्त्वा ते निजयौवनं चिरमगात्पुत्रोऽपि ते वार्द्धकं
रुष्टा चाश्रमलङ्घनाद्वसुमती भूपं नवं वाञ्छति ।
भूयो भूय इति प्रजाभिरनुरुध्यान्त्यं व्रतं स्मारितः
कष्टं याति ययातिराश्रमपदं प्रासादबद्धेक्षणः ॥ २० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"सोदर्ये"ति शिवालये पशुपतावाभाषिते नन्दिना
"भुङ्क्ष्वौद्धत्यफलं शिला भव जडे" त्याकर्णिता शापवाक् ।
उक्षा मीलितलोचनो विहसतीवैतत्स नीचैर्वदन्
"ग्रावा लब्धमहापदो विधिवशाद् ग्रावाणमास्कन्दति" ॥ २१ ॥

ये नः शासति भक्तिमार्गमपि तान् धाष्टर्यादिव ब्रूमहे
भक्तिश्चेत्स्तुतिरेव चञ्चलफला, सा दूरतस्तिष्ठतु ।
यद्येते द्वितयेऽपि तुष्टमनसो मर्त्याः सुराश्च स्तवैः
किं तेषां वदतान्तरं, न च कथं रोषेऽपि ते स्युः समाः ॥ २२ ॥

ग्रावंश्चेत्तव चेतनागुणकणो नैतत्सहस्वाधुना
स्वस्मिन्धूर्तजनैस्तथाज्ञनिवहैर्देवत्वमारोपितम् ।
कष्टा स्रङ्निगडैर्न केवलमसौ बन्दिस्थितिर्मन्दिरे
मिथ्यागौरवतोऽर्थवञ्चकपदं स्वात्मापि तु प्राप्यते ॥ २३ ॥

"पन्था नैव तवैष," "गच्छ परतो", "मार्गान्तरं श्रीयता"—
मेवं क्षिप्तनिवर्तितः प्रतिपथं सोऽन्धो यथा कन्दुकः ।
अश्रौषीद्वचनं "नने"ति बहुशोऽयासीत्पुनश्चत्वरं
यत्रासीच्च पुरास्ति तत्र कतिधा गत्वापि सर्वा दिशः ॥ २४ ॥

अन्वेष्टुं शाश्वतार्थान् समधिगतवरो यः स्वयात्राप्रवृत्तो
भूयो भूयः स चिन्तामणिविचयपरो वञ्चितो ग्रावखण्डैः ।
दर्शं दर्शं च कालं तरलमतितरां नैव पश्यन्निवैति
पाराशर्योऽधुनैवं स्ववरपरिणतौ शापशङ्कां दधाति ॥ २५ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भोः कवे!

डा० वे. राघवः

वंशोऽसि यत्सुषिरवेशनकार्मणेन
रथ्यावृथाट्यपवमानपृथग्जनोऽयम् ।
निष्पन्दिताहि कृतमेघ-मुदश्रु-वर्षम्
उद्धर्षितद्रु बत राग-महत्त्वमेति ॥ १ ॥

चन्द्रोऽसि यं समनुविश्य विनिस्सरन्तः
चण्डद्युतेर्भुवनघस्मरभानवोऽमी ।
सौधाङ्कुरन्ति, विकिरन्ति हिमं, मनांसि
दुग्धाब्धिलोललहरीषु च लालयन्ति ॥ २ ॥

चिन्तामणिस्त्वमसि केवलसङ्गतस्त्वं
कालायसं विपरिवर्तयसि क्षणेन ।
विश्वादृताभरणहेमतया, ततोऽपि
दिग्वीचिलं परिमलं च तनोषि तत्र ॥ ३ ॥

त्वं सुन्दरी किसलयारुणकोमलस्य
पादस्य ते ललितताडनलीलयायम् ।
स्थाणुः प्रणृत्यति महेन मरन्दतिम्य-
दुत्सौरभप्रविकसत्प्रसवाट्टहासः ॥ ४ ॥

त्वन्मायया सुरभिलानि मुखानि पुष्पा-
ण्युन्मील्य सन्दधति काकलिवैदुषीं च ।
त्वां वीक्ष्य शर्करिलभूषु शरत्सरित्सा
साहित्यभङ्गिभिरुपांशु करोति गोष्ठीम् ॥ ५ ॥

साम्राज्यमेतदयि तेऽत्र कदा लभेय
त्वय्येव गन्धपवने शयितस्सदा स्याम् ।
पद्माटवीषु तव, ते शशिमण्डलेषु
माद्यन्मनाः बत चरिष्णुरहर्निशं स्याम? ॥ ६ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# कविः, ज्ञानी, ऋषिः

डा० वे. राघवः

रथ्याचरजनौघेन व्रजन्नप्यव्रजन्निव ।
वितर्दिकायामासीन इव रथ्यां स पश्यति ॥ १ ॥

वहन्नपि स्वयं नद्याः प्रवाहेणावहन्निव ।
असौ तिष्ठन्निव तटे भाति स्रोतो निरूपयन् ॥ २ ॥

इह पृथ्व्यास्तलेऽधस्तात् सह सर्वैश्चरन्नपि ।
शिखरादिव सौधस्य पृथिवीं पर्यवेक्षते ॥ ३ ॥

मूर्तीकृत्याप्यरूपाणि धृत्वामलकवत् करे ।
असौ परीक्षते ध्यायन् सत्तां दत्वाऽसतामपि ॥ ४ ॥

भवन्तं विषयं भावितुल्यं संकृष्य पश्यति ।
भवत्कृत्य च भूतानि समाकर्षति दृक्पुरः ॥ ५ ॥

मुक्ताफलानि कीर्णानि यत्र लोकोऽवलोकते ।
तत्रासौ वीक्षते सूत्रं सूत्रितां मालिकामपि ॥ ६ ॥

असौ सूच्येव दोषेण तथाऽलक्ष्म्या च विध्यते ।
वह्निनेव गुणेनासौ लक्ष्म्या च बत दीप्यते ॥ ७ ॥

तस्यैव वर्तते प्रेक्षा चेतस्तस्यैव वर्तते ।
प्रेक्षावांश्च सचेताश्च कविर्ज्ञानी ऋषिश्च सः ॥ ८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## वृक्षाः

### विद्यल्लेखा वाध

अवसिता मन्त्रसंस्कृतिः । अवतीर्णा चेयं यन्त्रसंस्कृतिः । यन्त्रारूढाः सततं पुरः प्रधावन्तः वयं न लभामहे क्षणमपि निश्चलं स्थातुं, प्रतिपलं नवनवैः विलासैः नेत्रनिर्वाणं जनयन्तीं प्रकृतिम् अवलोकयितुम् । साङ्ख्यानां पुरुष इव दृक्शक्तिसम्पन्ना अपि उदासीना अकर्तारो ननु वयम् । प्रकृतिसङ्गीतं तु रसिकनिरपेक्षं सन्ततं प्रवृत्तम् । प्रकृतिवैतालिकाश्च वृक्षाः सखेदम् आक्रोशन्ति—"ऊर्ध्वबाहुर्विरौम्येष न च कश्चित् शृणोति माम् ।"

न पुनरहं शक्नोमि गृहमवलम्बितुम् । यदा यदा आकर्णयामि आवाहनं वृक्षाणां, तदा तदा मन्त्रमुग्धा इव अहं सकलमपि उत्सृज्य वृक्षं वृक्षम् उपैमि, प्रकामं तम् अवलोकयामि, तेन सह आलपामि च ।

वृक्षेषु अपि पिण्डे पिण्डे भिन्ना एव आकृतिः प्रकृतिश्च । प्रतिवृक्षं नव एव पर्णवर्णः, अप्रतिमश्च सुमसम्भरः । इयं श्वेतचम्पकयष्टिः, प्राप्ते निदाघसमये, पञ्चाग्निसाधनम् आचरन्तीव पार्वती, सितकुसुमैः प्रज्वलति । किंशुकश्चायं जीर्णारण्ये प्रदीप्ताः पावकशिखा एव उत्तमाङ्गे धारयन् रक्तांशुरिव प्रतिभाति । इतः प्रत्यवयवं काञ्चनालङ्करणैः विभूषितः लक्ष्मीधर इव अयं पीतपुष्पैः विराजमानः काञ्चनतरुः, इतश्च आरक्तपल्लवकरान् नर्तयन्ती किशोरी रक्तपर्णी ।

न केवलं पुष्पाणि, अपि तु फलानि अपि वृक्षान् अलङ्कुर्वन्ति । फलभारेण नतमस्तकाः वृक्षाः ज्ञानभारेण विनयनम्राः विदग्धाश्च सुजन-सरणीमनुसरन्ति । यद्यपि पत्रं पुष्पं फलं च इति एतत् सर्वं वृक्षाणां भूषार्थमेव, तथापि निष्पर्णानाम् अपि शाखिनां पुष्णाति एव किमपि अव्याजमनोहरत्वम् । नीलाकाशफलके शाखामात्रेण एव विराजमानं करुण-सुभगं रेखाचित्रं हि तत् । सर्वसङ्गपरित्यक्तं विरक्तं मुण्डकमेव अनुकरोति एतादृशः निष्पर्णतरुः । तमवलोक्य कोऽपि व्याहरेत्—"शुष्कं काष्ठं तिष्ठत्यग्रे!" तदन्यश्च ब्रूयात—"नीरसतरुरिह विलसति पुरतः!" एक एव वृक्षः विविधान् भावान् हृदि जनयितुम् ईश्वरः । अहं च स्मरामि एतादृशं वृक्षं विलोक्य, मखजेन अकिञ्चनत्वेन विराजमानं राजानं रघुं वा, याचकैः परिशोषितं सार्थवाहं चारुदत्तं वा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्यात् कामपि जीवनावस्थामुपारूढः वृक्षः, सः मम स्नेहभाजनमेव जायते। करकिसलयं विधूय बालतरुः आह्वयति माम्। गगनगामी शाखी दुर्दमनीयां महत्वाकाङ्क्षां मद्-हृदये समुत्पादयति। निष्पक्षिकं कोटरं स्कन्धे वहन् शुष्कवृक्षः स्मारयति माम अवितथं विद्वद्वचनं—"कृशे कस्यास्ति सौहृदम्?" परं छिन्नोऽपि पुनर्जायमानः तरुः निर्विण्णम् अपि चित्तं पुनः सोत्साहं सम्पादयति। यत्रस्थानां पतत्रिणां पाठशालाकोलाहलः दूरादपि कर्णपथम् आयाति, सोऽयं पिप्पलः पुनरपि प्रबोधयति स्मृतिशेषाणि शैशवदिनानि। तथा च तिमिरावगुण्ठिते संसारे, सुप्तेषु सर्वेषु, यदा पश्यामि कमपि निष्कम्पवृक्षं, तत्क्षणम् एव हृदि प्रस्फुरति काचन अनिर्वचनीया शान्तिः, विश्रब्धं भवति मानसम्।

मन्ये मनुजस्य हृदि स्थितं प्रसुप्तं तत्त्वचिन्तकं वृक्षा एव प्रबोधयन्ति, तं च मुखरीकुर्वन्ति। प्रतिपर्णं लिखितं प्रकृतिसन्देशं प्रत्यक्षीकृत्य पुरा कस्यापि क्रान्तदर्शिनः जीवनानुभवः श्लोकत्वम् आगत इति प्रथितमेव। धन्या खलु सा पुराणकवेः सूक्ष्मदर्शिता या अश्वत्थवृक्षे संसारतरोः प्रतिबिम्बं पश्यन्ती उवाच—

"ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।"

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"ममैव जन्मान्तरपातकानां
विपाकविस्फूर्जथुरप्रसह्यः"

अशोकः अकलूजकरः

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः ॥

न जाने कीदृशं तत् दिनम् आसीत् । तस्मिन् हि दुर्दिने आलस्य-प्रियस्य साङ्ख्यस्य पुरुषः "आराम हराम है" इति नेहरूक्तेः किञ्चित् कर्म कर्तुम् उद्यतः, प्राचीनैः संस्कृतकविभिः प्रत्येकं स्त्री तन्वी श्यामा शिखरिदशना नास्ति इति ज्ञातं, मीमांसकेन वेदे हुम्फडादिमन्त्रे कस्मिंश्चित् रेफांशे आनर्थक्यम् अस्ति इति उक्तं, नैयायिकः पर्वतगते अग्नौ न पतितः, अहं च संस्कृतनाटकविषयिणीं भाषणमालाम् आयोजयितुं प्रवृत्तः ।

वस्तुतः अहं नाम अतीव सरलः जनः । कर्तव्यं कर्म कर्तव्यम्, अन्यत् न लक्ष्यम् इति एव मे जीवितसूत्रम् । गते वार्षिके स्नेहसंमिलने[1] सत्याम् अपि कन्यानाम् उपस्थितौ, अहं नाटकानि एव द्रष्टुं गतः । अद्य यावत् कदापि नास्ति मया नगरमार्गे दक्षिणेन पार्श्वेन चलितम् । तथा च महा-विद्यालयीने अपि गते वर्षचतुष्टये न अहं स्वसमीपतः गच्छन्तीम् अपि सुन्दरीं लक्षितवान्, किमङ्ग पुनः परेण पदपथेन[2] गच्छन्तीम्? संक्षेपतः अहम् एकः सरलतमः जनः । निखिले अपि महाविद्यालयपङ्के अहम् एव एकं निष्कलङ्कं पङ्कजम् ।

किन्तु केन खलु पिशाचेन अहं तदा आविष्टः, न जाने । मया आत्मनः भाषणायोजकत्वं निश्चितम् इति तावत् सुनिश्चितम् । अयं वा, कः प्रमादः अत्र मया चरितः? रघुपतिः अपि विनाशकाले विपरीतां बुद्धिम् अदर्शयत् । का तर्हि कथा मादृशस्य अपतेः ?

अतीव कोमलबुद्धयः भवन्तः पुरुषपुङ्गवाः । तस्मात् न इदानीं भवदुत्कण्ठाम् अति श्रामयामि । यथा वृत्तं तथा कथयामि । इत्थं हि तत् सर्वं संवृत्तम् ।

---

१. Annual social gathering.

२. Foot-path.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पिशाचावेशवशात् वा, विपरीतबुद्धिवशात् वा (विपरीतबुद्धि-पिशाचवशात् वा) स्वीकृतभाषणायोजकत्वः अयं जनः संमतिलाभार्थं प्रथमं स्वमहाविद्यालयस्थान् प्राध्यापकान् द्रष्टुं प्रष्टुं च गतः। प्राध्यापक-वर्याः तदानीं प्राध्यापकप्रकोष्ठस्य[३] अन्तः कॉफीं[४] पिबन्तः, "अद्य कॉफीकर्त्री सेवकेन चहायां[५] कॉफी मिश्रिता, उत कॉपयां चहा" इति मीमांसमानाः स्वसहकारिभिः (यया तर्कितम्) उच्चैः विवादं कुर्वाणाः आसन्। कॉफीपाना-नन्तरं ते बहिः आगताः। अहं तेषां समीपं गतः, उक्तवान् च "गुरुवर्याः, संस्कृतनाटकविषयिणी काचन भाषणमाला अस्माकं महाविद्यालये घटताम् इति अस्ति मे कश्चित् कल्पः। भवन्तः अत्र किं मन्यन्ते?"

"नैव सम्प्रति दृश्यते स्वतन्त्रं चिन्तनं प्राध्यापकानाम्। केवलं द्वित्राः एव प्राध्यापकाः यत् अध्ययनार्थं नियुक्तेषु ग्रन्थेषु न दृश्यते तत् प्रतिपादयन्ति। अन्ये पुनः केवलम् अन्यैः लिखितं रटन्ति। गुणैः चहा कॉफीतः गरीयसी इति एव वदन्ति।"

"परं गुरुवर्याः, अपि अस्माकं महाविद्यालये घटताम् इयं संस्कृत-नाटकविषयिणी भाषणमाला?"

केन मूर्खेण कथितं चहायां कॉफ्या अपेक्षया स्वल्पं टॅनिन्द्रव्यं वर्तते इति। अहं तु चहा एव टॅनिन्पूर्णा, कॉफी तु केवलं टॅनिन्स्पृष्टा एव वदामि।"

"किन्तु गुरुवर्याः, अपि आयोजनीया अस्माभिः इयं सरसा भाषणमाला?"

---

३. Common Room for Professors.

४. केचन आङ्ग्लभाषाशब्दाः इदानीं संस्कृते दुर्निवारप्रवेशाः। तेषां हि समीचीनः उच्चारः भवतु इति कृत्वा देवनागरीलिप्याम् अपि स्वल्पं परिवर्तनम् आवश्यकम्। अत्र ॲ-ऑ-इत्यादिस्वरसमावेशः अनया एव बुद्ध्या कृतः। सा एव लिपिः श्रेष्ठा या सूचनीयभाषागतान् अधिकतमान् ध्वनीन् द्योतयति।

५. महाराष्ट्रे 'Tea' इत्यस्य पर्यायी शब्दः 'चहा' इति उपयुज्यते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"भाषणमाला ? हां, हां ! [६]अवश्यम् आयोजनीया, अवश्यम् आयोजनीया । अद्यापि न सन्ति केनापि आहूताः वक्तृवर्याः रसान् अधिकृत्य वक्तुम् । वयं तत् कुर्मः । अस्यां भाषणमालायां मधुरादीन् आश्रित्य प्रत्येकम् एकम् इति षड् भाषणानि, 'कॉफीचहयोः वास्तवी रुचिः, तयोः च तुलना' इति च एकम्, इति सप्त भाषणानि भवेयुः । गच्छ । आयोजय वक्तॄन् ।"

"गुरुवर्याः, क्षम्यताम् । मद्वचने किञ्चित् भ्रान्ताः भवन्तः । न अहम् अन्नरसविषयिणी भाषणमाला आयोजनीया इति वदामि । संस्कृत-नाटकविषयिणी सुरसा भाषणमाला भवतु इति मे अभिप्रायः ।"

"अरे तेन किम् ? भवतु 'संस्कृतनाटकगताः षड् रसाः' इति भाषणमालाविषयः ।"

"परं गुरुवर्याः, तथा कृते प्रत्येकं भाषणं केवलं पञ्चसु एव निमिषेषु समाप्तिं यायात् । यावत् ज्ञातसमयमाहात्म्याः (?) अस्माकं श्रोतारः सभागृहं प्रविशन्ति तावत् एव भाषितृमहोदयैः कॉफीपानप्रसङ्गः प्राप्नुयात् । न वर्तते संस्कृतनाटकेषु विदूषकभाषणेषु अपि अन्नरसविषयिणी सविस्तरा चर्चा ।"

"भवतु । यथा ते इच्छा तथा क्रियताम् । अस्ति मे भाषणमालायाः आयोजने सम्मतिः ।"

प्रत्यागतः अहं प्राध्यापकप्रकोष्ठात् तस्मिन् नोव्हेम्बरमासीये प्रभातकाले भालप्रदेशगतान् घर्मबिन्दून् करेण आक्षिपन् प्राप्तपूर्ण-स्वातन्त्र्यः च प्रवृत्तः वक्तॄणाम् आयोजने । प्रथमं प्राध्यापिकायाः सौभाग्यवत्याः शान्तिब्रह्ममहोदयायाः गृहं प्रविष्टवान् । (नहि नहि, प्रमादः, महान् प्रमादः !

---

६. हां, हं, अं, इत्येते मराठीभाषागताः निपाताः अत्र लेखे प्रयुक्ताः, तेषाम् अर्थाः सन्दर्भेण एव सपदि ज्ञाताः भवेयुः । अतः केवलम् इदम् एव निर्दिश्यते यत् तेषाम् उच्चारणं हाम्, हम्, अम् इति मकारान्तं न भवति । तेषु अनुस्वारः वर्तते अतीव स्वल्पः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रवेष्टुं प्रयतितवान् इति वक्तव्यम्!) अयं विद्यामात्रव्यसनो वराकः यावत् गृहद्वारं स्पृशति तावत् एव गृहान्तात् पोलिका[७]पीठं, पोलिकादण्डः, विविधानि च विदूषकदेहवक्राणि पात्राणि मह्यं प्रत्युदगच्छन् । तेन "अलम् अनेन भाषणायोजनेन यत्र जीवितम् अपि संशये न्यस्यते" इति प्रादुर्भूतः विचारः मम मनसि । परं न स चिरं स्थितवान् । श्रूयते हि "आनन्दं भाषणे विद्वान् न बिभेति कुतश्चन" इति । अथ गृहं प्रवेष्टुकामस्य 'नान्यः पन्थाः विद्यते अयनाय' इति दृष्ट्वा, विरलतरम् अधुना महानसपात्र-वर्षम् इति च आलोच्य, अहं देहल्याम् एव स्थित्वा, पूर्वकायं नमयित्वा, गृहस्य अन्तः दृष्टिं निक्षिप्तवान् । प्राध्यापिकापतिराजाः काष्ठासनस्थाः स्वशिरसि धृतच्छत्राः एकाग्रेण मनसा कवितां लिखन्तः मया तत्र दृष्टाः । वर्णितं हि केनापि नवकविना—"चित्रं कान्ता भृशं क्रुद्धा कान्तः शान्तस्तथापि सः । तस्यास्तु पात्रवर्षं तत् तस्य तु च्छत्रधारिता ॥" इति । ततश्च 'एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता । भाजनं भार्यया क्षिप्तं पतिं हन्ति सपुस्तकम् ॥' इति इमां सूक्तिम् एतान् जापयामि इति क्षणं यावत् अहम् अचिन्तयम् '। परं महानसात् आगतानि अस्त्राणि केवलम् एतेषां छत्रं परिचुम्ब्य सफलम् इव स्वजन्म मन्वानानि भूमिं श्रयन्ति इति दृष्ट्वा, अयं च महाभागः तत्र सचक्षुः अचक्षुः इव, सकर्णः अकर्णः इव, समनाः अमनाः इव स्थितः इति च आलोच्य गीर्णवान् अहम् इदं चिन्तनम् । अथ रिक्तीभूते महानसे आरब्धम् अनन्यास्त्रेण शत्रुणा वाग्युद्धम् "अहो आलस्यम् आर्यपुत्रस्य, सर्वस्मिन् अपि कार्ये मया श्रमः निधेयः, अनेन च विश्रमः विधेयः" इत्यादिकं किमपि किमपि, यत् सर्वत्र प्रथिततमम । अत्र तावत् 'रणे अभिमुखः हतः स्वर्गं लभते' इति स्मरता समयव्ययपरि-जिहीर्षुणा मया स्पृष्टा द्वारस्था सन्देशकिङ्किणी[८] । तस्याः निनादेन सर्वम् अपि गृहम एकपदे शान्तिम् अगच्छत् । अन्तर्गृहात् प्राध्यापिकामहोदयाः बहिः आगताः । "अहो अपावृतम् एव एतत् (स्वर्ग-) द्वारम् , निःसङ्कोचं प्रविशन्तु भवन्तः" इति च नमस्कुर्वाणं मां सानन्दम् अन्तः आहूतवत्यः । प्राध्या-पिकामहोदयानां नियतिकृतनियमरहिता तनुः 'यतो वाचो निवर्तन्ते अप्राप्य

---

७. पोलिका = चपाती.

८. Call-bell.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मनसा सह' इत्येतावती पीना आसीत्। ताः महानसीयैः अस्त्रैः अनलङ्कृतम् एकम् आसनं महता प्रयत्नेन अन्विष्य मह्यं दत्तवत्यः। अन्वेषणकाले "अतीव चपलः मे पुत्रः, अतीव चपलः, सर्वम् अपि अन्तर्गतं वस्तुजातं स इतस्ततः करोति" इति ताभिः बहुवारम् उच्चरितं, मया च "अपि कश्चन बालकः एतावन्ति एतादृशि च भीमगदासदृशानि पात्राणि चालयितुं समर्थः स्यात्" इति चिन्तितम्। मम चिन्तनपूर्तेः प्राक् एव प्राध्यापिकाभिः आसनं लब्धम्। अतः तत्र उपविश्य "यथा यथा भवेत् पुंसां भाषणे सज्जता द्रुतम्। सा सैव प्रक्रिया साध्वी विपरीता ततोऽन्यथा॥" इति गुरूपदेशं स्मृत्वा, स्वरे मार्दवस्य स्नेहस्य आदरस्य च घटशतं रिक्तीकृत्य अहम् उक्तवान् "मान्याः, अग्रिमे मासे अन्तिमे सप्ताहे अस्ति अस्माभिः आयोजिता संस्कृतनाटकविषयिणी एका भाषणमाला। समावेशितानि तस्याम् उत्तररामचरितं, शाकुन्तलं, मृच्छकटिकं, मुद्राराक्षसं, रत्नावली, स्वप्नवासवदत्तं, वेणीसंहारं च इति सप्त नाटकानि। तत्र वेणीसंहारम् अधिकृत्य कृपया भाष्यतां भवतीभिः इति नम्रं मे विज्ञापनम्। अवश्यं पूरणीया इयं मे प्रार्थना।"

"किं वेणीसंहारम् अधिकृत्य? भवतु, भाषिष्ये, अवश्यं भाषिष्ये।"

"अनुगृहीतः, अतीव अनुगृहीतः अयं जनः। अथ पुनः एकश आगत्य ज्ञापयामि निश्चितां भाषणवेलां भवतीः।"

"अस्तु, तथा एव अस्तु।"

विस्मितः स्तिमितः आश्चर्यभूतः अभवम् अहम्। यासां भाषण-चातुर्यविषये तादृशी कीर्तिः नास्ति यादृशी भाषणनिमन्त्रणस्य अस्वीकारविषये तासु शान्तिब्रह्ममहोदयाः जनैः गण्यन्ते। परं ताभिः अपि मम इदं निमन्त्रणं झटिति स्वीकृतम्। अहो आश्चर्यम्! अर्थात् स्पष्टम् एव तत्र तासां गृहसंहारः कारणम् आसीत्। तस्मात् संहारक्षेत्रात् शीघ्रातिशीघ्रं मम निर्गमनम् इच्छन्ति स्म प्राध्यापिकामहोदयाः। परं भवतु नाम। किं कारणमीमांसया? निर्वर्तितं स्वकार्यम्। किं सम्प्रति परगृहचिन्तया? प्राध्यापिकागृहे धर्मवेणीभूता पत्नी संहरतु अथ वा कुलवेणीभूतः पुत्रः संहरतु। वयं तावत् "अस्तु, तथा एव अस्तु" इति सन्देशकिङ्किणीनिनादमधुरैः शब्दैः एव प्रमोदामहे। अथ केचन दुर्जनाः इमं मम वृत्तान्तं श्रुत्वा, खें खें

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इति कृत्वा "तासां प्राध्यापिकामहोदयानां पुत्र एव नास्ति" इति वदिष्यन्ति । परं कामं ते तथा वदन्तु । कः खलु लोकम आराधयितुं समर्थः ? अपि च किं प्रजया करिष्यामः येषां नः इदम् आयोजनम, इदं भाषणम् ?

शान्तिब्रह्मप्राप्त्या द्विगुणितोत्साहः अहं सडोलीकरमहोदयान् साक्षात् कर्तुं गतः । ते न सन्ति संस्कृतस्य वा अन्यस्य वा विषयस्य प्राध्यापकाः । परम् अधीतसंस्कृताः ते बहु प्रसिद्धाः किल रसिकत्वेन । प्रथमं प्रयत्नपञ्चकं विफलम् अभूत् । एकदा रसिकवर्याः माध्याह्नस्वापम् आस्वादयन्तः, अन्यदा क्रीडापत्रैः[९] आत्मानं रमयन्तः, कदाचित् चलच्चित्रं[१०] द्रष्टुं गताः, कदापि क्रीडासमाजे[११] चहापानव्यग्राः, कदाचन च यष्टिकन्दुके[१२] रताः आसन् । मम षष्ठम् अभियानं तु तेषाम् इदम् उद्योगदुर्गम् अभिनत् । अन्ततो गत्वा आगतः मम दृष्टिपथं तेषां मुखचन्द्रः । यथापूर्वं प्रास्ताविकं कृत्वा विज्ञापिताः ते मया मुद्राराक्षसम् अधिकृत्य भाषितुम् । उक्तवति एव मयि एवं, [१३]पञ्चमचञ्चवः तत्रभवन्तः तमाखुरसशोभि स्वमुखं चर्वणात् रश्मिषु इव आदाय न्यवर्तयन्, भ्रूभङ्गेन शकुन्तलाम् अलज्जयन्, जले निमज्जन् जनः यथा मुखं विधुनोति तथा मुखं विधूय माम् अवदन् च "मौड्राराक्शशं णाशि मम अभिमटं णाटकम् । यडि भाशिश्ये टर्हि वेणीशंहारम् एव अढिकृत्य भाशिश्ये ।"

"परं . . . . परं माण्याः अश्टि श्वीकुटं शाण्टिब्रह्ममहोडयाभिः टं णाटकम् अढिकृत्य भाशिटुम् ।"—अहम् अपि अनवधानात् (भारतस्य

---

९. Playing Cards.

१०. Movie.

११. Club.

१२. Cricket.

१३. नागवल्लीदलं चूर्णं सारः पूगीफलं तथा ।
साधनानां मता ह्येषा ताम्बूलस्य चतुष्टयी ॥
तमाखुः पञ्चमश्चात्र केषाञ्चन तु विद्यते ।
अतस्तं पञ्चमं प्राहुः पञ्चमज्ञा मनीषिणः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भावनिकम् ऐक्यं वर्धताम् इति हेतोः च) रसिकवर्याणाम् एव स-'रस'-वाण्या अवदम् ।

"भवदु । टर्हि न भाशिश्ये । भाशण्टां शाण्टिब्रह्ममहोडयाः ।"

"न, मान्याः, न । मा तथा भवतु । भवन्तः शान्तिब्रह्ममहोदयाः च इति उभौ अपि भाषितृत्वेन इष्टौ अस्माकम् । न भवतां त्यागाय सिद्धाः वयम् । कः खलु 'एरण्डः मे क्षेत्रे वर्तते' इति वर्धमानम् आम्रवृक्षं छिन्द्यात् ? यदि भवन्तः स्वीकरिष्यन्ति इदं निमन्त्रणं तर्हि एव भविष्यति इयं भाषणमाला । इहासने शुष्यतु मे शरीरं त्वगस्थिमांसं विलयं च यातु । अप्राप्य युष्मान् बहुलोकवाञ्छितान् न ह्यासनाद् गात्रमिदं चलिष्यति ॥ न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् । कामये रससिक्ताया भवद्वाण्यास्तु वर्षणम् ॥ यदि भवद्भ्यः मुद्राराक्षसं न रोचते तर्हि शाकुन्तलं वा रत्नावलीं वा स्वीकुर्वन्तु भवन्तः ।"

"हं...., एवं....एवं वडटि टर्हि भवान् । भवदु । भाशिश्ये यठाशाक्टि रट्णावळिम् अढिकृत्य ।"

"अनुगृहीतः अस्मि मान्याः, महत् अनुगृहीतः अस्मि ।"

प्रियतमाः वाचकाः, एवं शान्तिब्रह्म—सडोलीकर—दत्तहस्तः अहं परम्पराभिमानी अधुना कमपि शास्त्रिणं भाषितृत्वेन आयोजयामि इति चिखलीकरशास्त्रिणां गृहं गतः । मां दृष्ट्वा एव अवदन् शास्त्रिवर्याः "नैजाङ्घ्रिसरसीरुहद्वन्द्वविन्यासेन पवित्रयन्तु भवत्त्वावच्छिन्नाः श्रीमत्त्वनिरूपितमनःसम्पत्तिकाः मान्याः महोदयाः आस्माकीनम् उटजम् इदम् । करालः किल अयं कलिकालः । विरलत्वपक्षं गताः इदानीन्तने काले पण्डितमण्डलीमण्डनायमानाः विपश्चिदपश्चिमाः । तत्रापि पण्डितराजराजितिलकाः । तत्रापि चुलुकीकृतषड्दर्शनाः । तत्रापि दिगङ्गनाभिचुम्बितयशोराशयः । तत्रापि सौजन्यसारसुमनःसुगन्धितककुप्चतुष्टयाः । अतः भवताम् आगमनेन अमन्दानन्दसन्दोहतुन्दिलं मोदमेदुरं मे मनः । केन खलु हेतुना अनुभाविताः विरहं स्वप्रासादगताः रमण्यः श्रीमद्भिः ।"

"अं ? हं....हं, केन कारणेन आगतः अस्मि इति पृच्छन्ति भवन्तः । भवतु, भवतु । न किमपि, न किमपि । आसम् एतेन मार्गेण गच्छन्, अचिन्तयं च चिरदृष्टान् शास्त्रिवर्यान् एकवारं पश्यामि इति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न कोऽपि विशिष्टः हेतुः आगमने । भवतु । द्रष्टाः भवन्तः । आपृच्छे इदानीम् ।"

एतावत् कथमपि उक्त्वा "अहो, अहो किम् इदम् ? किम् इदम् ? विधीयतां स्वल्पः कृपापाङ्गः, आस्यतां क्षणम्" इति ससंरम्भं वदतः शास्त्रिवर्यान् सर्वथा दुर्लक्ष्य, उपरुद्धश्वासः इव हस्तचरणं धुन्वन् अहं शरवेगेन बहिः आगतः । बहिः आगत्य दीर्घदीर्घं श्वसितवान् । शिरोवेदनाशामकम् अञ्जनं सहस्रवारं घ्रातवान् । दश वमनरोधकानि गीर्णवान् । त्रिवारं चहाम् आस्वादितवान् । ततः किल पाण्डित्यताडितं गरगरायमाणं मे मस्तिष्कं किञ्चिदिव प्रकृतिं प्राप्तम् । "सर्पपण्डितयोर्मध्ये वरं सर्पो न पण्डितः । सर्पो दशति कालेन पण्डितस्तु 'पदे पदे' ॥" इति कविकृतम् अपि सत्यं किल वचनम् ।

चिखलीकरपाण्डित्यविदीर्णहृदयः अहं प्रथमम् आयुःक्षेमकारिण्याः[१४] कार्यालयं गतः । यदि अस्मिन् भाषणमालायज्ञे अहं हुतात्मा भवेयं तर्हि मम आप्ता (न यद्यपि मां तथापि) किमपि धनं लभेरन् इति तत्र ध्रुवकारं कृत्वा अनन्तरम् एव अवशिष्टानि भाषणानि आयोजयितुं गतः अयं जनः ।

अस्माकं नगरे श्रीढोबलमहोदयाः सूक्ष्मसौन्दर्यदर्शित्वेन विराजन्ते । अतः एकस्मिन् गुरुवासरे पावितं तेषां गृहं मया स्वपादस्पर्शेन । कण्ठस्थीभूतं प्रास्ताविकम् उद्गीर्य मया उक्तम् "मान्याः, भाषन्तां तर्हि भवन्तः शाकुन्तलम् अधिकृत्य ।"

"ओ हो हो हो ! शाकुन्तलम् ! आ हा हा हा ! तत् एव शाकुन्तलं यत् कालिदासेन लिखितम् । रम्यं रम्यम् । तत् एव शाकुन्तलं यत् कालिदासेन ग्रथितम् । सुन्दरं सुन्दरम् । तत् एव शाकुन्तलं यत् कालिदासेन निबद्धम् । रमणीयं रमणीयम् । तत् एव शाकुन्तलं यत् कालिदासेन रचितम् । मधुरं मधुरम् । तत् एव शाकुन्तलं यत् कालिदासेन प्रणीतम् । (अत्र मान्याः महाभागाः किञ्चिदिव श्रान्ताः, अहं च कालिदासेन अस्मदुपकाराय शाकुन्तलं किमर्थं समुद्रे न क्षिप्तम् इति अचिन्तयम् !) भवतु । अस्तु । आस्ताम् । तिष्ठतु । भाषिष्ये । वक्ष्यामि । वदिष्यामि । भणिष्यामि । परं कदा ? कुत्र ? केषां कृते ?"

---

१४. Life Insurance Corporation.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"अग्रिमे मासे, अन्तिमे सप्ताहे, अस्माकं महाविद्यालये, विद्यार्थिनां संस्कृतप्रेमिणां च कृते।" पर्यायशब्दप्रयोगनिर्विण्णेन मया नेत्रे निमील्य द्रुततमम् एकस्मिन् एव श्वासे इदं सर्वम् उक्तम्।

"भवतु। अस्तु। आ...."

"हां, हां, ज्ञातं, ज्ञातम्। अनुगृहीतः अस्मि, अनुगृहीतः अस्मि।"

एवं मासं यावत् विद्वद्गृहात् विद्वद्गृहं भ्रमता मया आयोजितानि कथमपि भाषणानि। परं न आसीत् दुःखस्य अनन्तरं सुखं मम प्रारब्धे। "वक्ता चेत् प्रतिजानीयाद् अयमस्मीति योजकम्। किमर्थं योजकस्तर्हि शरीरमनुसञ्ज्वरेत्॥" इति आसीत् मम श्रद्धा। परं गच्छता कालेन मया ज्ञातं यत् यथा इह लीलालब्धः भाषिता क्षीयते, एवम् एव इह श्रमचितो भाषिता क्षीयते। शान्तिब्रह्ममहोदयाः यस्मिन् समये भाषितुं सिद्धाः तम् एव समयं सडोलीकरमहोदयाः वाञ्छन्ति। यः विषयः दोबलमहोदयेभ्यः रोचते स एव सहसा हण्डिगोलमहोदयानां रुचये कल्पते। यस्मिन् समये भाषणार्थं वेडौलमहोदयान् विज्ञापयामि तस्मिन् एव समये कस्याश्चन साहित्यसंस्थायाः वेडौलप्रेम उल्लसति, सा च तान् भाषणार्थं ससम्मानं निमन्त्रयते। सर्वेषां भाषितॄणां समयं विषयं च कथं कथमपि निश्चाय्य यावत् विद्यार्थिनः इमां भाषणमालायोजनां ज्ञापयितुं महाविद्यालयम् आगच्छामि तावत् तस्मिन् एव समये अन्यया कयाचन सङ्घटनया अपरा चित्ताकर्षकतरा भाषणमाला आयोजिता इति सूचनाफलकः ज्ञापयति, मां मूर्च्छयति च।

अन्ते तावत् परिणतं मम यत्नस्य फलम्। मासेन सर्वं सुसम्पन्नम्। 'संस्कृतनाटकविषयिणी भाषणमाला' इत्यत्र 'भाषणमाला' इति शीर्षकं कृतम्, सर्वश्री—शान्तिब्रह्म—सडोलीकर—चिखलीकर—ढोबलवेडौल—हण्डिगोल—दाण्डिमारमहोदयानां कार्यं सर्वं श्री—तडतडे—गडबडे—धडपडे—लुगरे—सदरे—नान्दुर्गीकर—गडहिङ्ग्लजकरमहोदयैः निर्वर्तनीयम् इति निश्चायितम्, भाषणविषयाः उत्तररामचरितादीन् अपसार्य वेणीसंहारं, पुरुषस्वरूपं, परमाणुसिद्धान्तः, प्रत्यक्षोपपत्तिः, कुण्डलिनीशोधः, मायापरीक्षा, विधिमीमांसा इति योजिताः, इत्येतत् सर्वं यदि न विचार्येत तर्हि अन्यत् सर्वं यथा पूर्वम् इष्टम् आसीत् तथैव सम्पन्नम्। न क्वापि मनोरथभङ्गप्रसङ्गः उपस्थितः।

एवं मननसागरोद्धृतात् इमां भाषणमालायोजनारत्नावलीम् अहं सभाम् एकाम् आहूय स्वसहाध्यायिभ्यः अदर्शयम्। ततः च अस्याः योजनायाः



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अनुष्ठानार्थं द्रव्यमनुष्यबलं देयम् इति व्यज्ञापयम् । सभा समाप्ता। अपरेद्युः मम हस्ते निवेदनपत्रकम् एकम् आगतम् ।

आङ्ग्लदेशे 'यः अस्माकं प्रतिनिधिभ्यः संशृणुते स एव अस्मत्तः करम् आदातुं कल्पते इति घोषणाप्रसिद्धम् एकम् आन्दोलनम् अभूत् । अपि तत् भवता न ज्ञायते ? यदि भाषणमालायोजकेषु अस्माकं प्रतिनिधिः नास्ति तर्हि किमिति अस्माभिः द्रव्यबलं देयम् ? जायमानः वै आयोजकः त्रिभिः ऋणवान् जायते, कार्यवाहत्वेन सङ्घटनामार्गदर्शिभ्यः प्राध्यापकेभ्यः, नियोजकत्वेन भाषितृभ्यः, प्रतिनिधित्वेन च स्वसहाध्यायिभ्यः । अपि च, सर्वेषां विद्यार्थिनां वस्त्रकोशेषु सदा एव द्रव्यं खुलखुलायते इति मन्यते किं भवान् ? विना क्रोधं विचार्यताम् इति प्रार्थयमाना

कु. चिचुन्द्री
प्रतिनिधिः, विद्यार्थिनीविभागः ।

प्रियतमाः वाचकाः, तर्कयन्तु भवन्तः पत्रकम् एतत् पठित्वा मया किं नाम कृतं स्यात् इति । मया किल, मान्याः, मया किल....मया किल प्रत्युत्तरं लिखितम् ।

"यः अस्माकं प्रतिनिधिभ्यः संशृणुते स एव अस्मत्तः करम् आदातुं कल्पते' इति घोषणाप्रसिद्धम् आन्दोलनं मम ज्ञानानुसारम् अमेरिकायां बभूव । यदि भवत्यै रोचते तर्हि आङ्ग्लदेशे अपि तस्य स्थापनायां क्रियमाणायां न मे कश्चित् विरोधः ।"

भवदीयः,
अशोकः अकलूजकरः
आत्मनियुक्तः प्रतिनिधिः ।

प्रियतमाः वाचकाः, अधुना भवन्तः, 'अस्मिन् प्रतिपत्रके भाषणमालाविषये न किमपि दृश्यते, तस्याः किम् अभूत्' इति अवश्यं पृच्छेयुः । प्रेष्ठाः, सा किल....सा किल आगामिनः वर्षस्य डिसेम्बरमासे भवेत् । तदा....तदा नाम अहं प्राप्तस्वास्थ्यः रुग्णालयात् प्रत्यागमिष्यामि । अथवा, किं बहुना—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वनाडिकाः ।
क्षीयन्ते बहु मांसानि भाषणानां नियोजने ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# कालिदासमहोत्साहं नाम नाटकम्

हरि रामचन्द्र दिवेकरः

[ततः प्रविशति सूत्रधारः पारिपार्श्वकौ च]

सूत्रधारः—कवये कालिदासाय प्रार्पये सुमनोऽञ्जलिम् ।
यत्कीर्तिकौमुदी नित्यं त्रिषु लोकेषु राजते ॥

कृतं मया मङ्गलाचरणम् । [पारिपार्श्वकं प्रति] मारिष, प्रेरितोऽस्मि अनया विद्वत्परिषदाऽध्यक्षेण च यत् अस्मिन् कालिदासमहोत्सवे केनचित् नवेन नाटकेन उपस्थातव्यमस्माभिरिति । तत्कथय केन नाटकेन अस्याः परिषदः आराधनं कर्तव्यमिति ।

प्रथमः—भाव, ननु रचितमेवास्ति भवता 'कालिदासमहोत्साहं' नाम नवीनं नाटकम् । तत् किं तेनैव अस्याः सभाया मनोरञ्जनं न भविष्यति?

सूत्र० मनोरञ्जनं तु भविष्यत्येव । किं तु

यस्मिन्न स्यान्नायको नायिका वा
त्यक्ता धारा नाट्यशास्त्रस्य यस्मिन् ।
एवंभूतं नाटकं यन्नवीनं
? तद्रोचेतात्रैव जाने न जाने ॥

द्वितीयः—सर्वथा व्यवहर्तव्यमस्माभिः ।

सुकृते स्वभिनीते च सत्पात्रपरिचालिते ।
नाटकं चेन्न सिद्ध्येत् तत् नात्र कार्या विचारणा ॥

सूत्र० नैवम् । तेनैव कविकुलगुरुणा किं न कथितं यत्

'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।' इति ।

प्रथमः—किं तु किं तेनैव न प्रतिपादितं यत्

'पुराणमित्येव न साधु सर्वं
न चापि किंचित् नवमित्यवद्यम् ।'

इति? एषा आधुनिकी परिषदपि गुणग्राहिणी न केवलं पुराणरूढिवादिनी ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सूत्र० [परिषदं प्रति]

तत्सन्तो द्रष्टुमर्हन्ति सदसद्व्यक्तिहेतवः ।
कालिदास-महोत्साहं कालिदासमहोत्सवे ॥

[नेपथ्ये—कोऽयं कालिदासमहोत्सवः कालिदासमहोत्सव इति आरावः]

द्वितीयः—भाव, किमेतत्?

सूत्र० [विचिन्त्य] आम् ज्ञातम् ।

पुरंदरपुरातिथौ सति महाकवौ, भारते
चिरात्प्रभृति संस्कृतिः स्मरणशेषतामागता ।
अथाऽऽङ्ग्लजनतेजसा विरहिता कथं वर्तते
तदीक्षितुमयं कविर्भ्रमति भारते सर्वतः ॥

इति श्रुतं मया । तन्मन्ये तेनैव श्रुतं भवेत् अस्मदीरितम् । तदधुना वयं सर्वे निष्क्रमणं करिष्यामः । [इति निष्क्रान्ताः ]

(इति प्रस्तावना)

[ततः प्रविशति कालिदासः]

कालि०—अये किमर्थमेष कालिदासमहोत्सवः कालिदासमहोत्सव इति आरावः?

[नेपथ्ये—कविराज, अहं ते कथयामि]

क एष मां प्रत्युत्तरयति? स्वरस्तु नारदस्येव श्रूयते । तत् किं सोऽपि स्वर्गान्मामेवानुसरति? [निरीक्ष्य] अये सत्यमेव नारदेन भवितव्यम् । किंतु किमर्थं वेषपरिवर्तनम्? भगवन्, अभिवादये कालिदासोऽहम् ।

[ततः प्रविशति नारदः]

नारदः—स्वस्ति कविराजाय ।

कालि०—भगवन् किमेतत्?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

क्व सा वल्लकी? क्वास्ति वस्त्रोपवीतम्?
क्व चोर्ध्वा शिखा? पादुके ते गते क्व ।
नवीनेन वेषेण युक्तं सुरर्षे!
भवन्तं कथं मानवा मानयेयुः ॥

नारदः—तदपि कथयिष्यामि । त्वं तावत् प्रथमं कथय किमर्थं त्वम्
अद्यामृतमहोत्साहे स्वर्गे देवसभां प्रति ।
शक्रेण ह्युर्वशीद्वारा समाहूतोऽपि नागतः ॥ इति ।

कालि०—भगवन्, अमृतविषये न वर्तते मे बहुमानः । अमृतप्राप्तिः देवानामर्थे न वरः किंतु शाप एव इति मन्ये ।

नारदः—[विहस्य] साधु, कविवर! साधु । अधुना शोभसे कविरिति । यतः

यत् स्पष्टं सर्वलोकानां कविस्तन्नैव पश्यति ।
यत् जना नैव मन्यन्ते तद्विज्ञेयं कवेर्मतम् ॥

किंतु किंचित् स्पष्टं कुरु ते विधानम् । कथं वरतां परित्यज्य शापतां प्राप्तं वराकममृतम् इति ।

कालि०—ननु को लाभः अमृतेन?

नारदः—को लाभः? को न इति पृच्छ, कविराज! अमृतसेवनेन न जरा आगच्छति, नापि मृत्युः । सर्वदैव तारुण्यं, चिरकालमेव जीवनम् । अत एव च सर्वे देवा अजरा अमराः । किं विस्मृतं तवैव कथनं 'न च खलु वयो यौवनादन्यदस्ति' इति ।

कालि०—अत एव देवाः परमार्थतः न यौवनसुखमनुभवन्ति, नापि जीवितानन्दम् । दुःखाभावे, दुःखस्य अत्यन्ताभावे—सुखस्य सुखत्वमेव नष्टं भवति । कथितमेव

'यदेवोपनतं दुःखात् सुखं तद्रसवत्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥'

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—भवतु, वर्तते कश्चित्सारः तव कथने । किंतु न जानासि यत्तव अनागमनेन रुष्टः शक्र इति ।

कालि०—रुष्टोऽपि स किं मम छेत्स्यति ?

नारदः—तेन विप्रतिषिद्धस्ते स्वर्गप्रवेशः ।

कालि०—एतदेव स कर्तुं समर्थः । उक्तं च

'अंभोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।'

मद्विषये यदि एवं, तर्हि दुग्धे शर्करैवापतिता । अनेन चिरस्वर्गवासेन अहमपि विरक्तो जातः ।

नारदः—स्वर्गवासेऽपि ते विरागः ?

कालि०—भगवन्, विनोदार्थमेव मया विदूषकमुखेन कथितमासीत् यत् 'स्वर्गे न वा अश्यते न वा पीयते, केवलमनिमिषैर्लोचनैः मीना विडम्ब्यन्ते' इति । किंतु सत्यं मया तत् अनुभूतम् । अत एव स्वर्गं पृष्ठतः कृत्वा प्रस्थितः मम मातृभूमिं गन्तुमहम् । जन्मभूमिस्मरणेनैव अहं बलवदुत्कण्ठितोऽस्मि ।

नारदः—किं विद्यते तव जन्मभूमौ ; तत्र च [अर्धोक्ते]

कालि०—मा भवान् एकमपि शब्दं कथयतु । भगवन्,

(पद्यम्)

एषा भूर्जननी मे, स्वप्ने सकृदपि येन न कथितं लोके कः संजातः ॥ ध्रु० ॥
उषित्वा चिरं बहिः स्वदेशात् पुनर्दर्शनोत्सुकः स भूयात् ।
प्रतिपदमन्तःकरणे, जननीप्रेम्णा न च संध्यातः लोके कः संजातः ॥
जगति यदि स्यादेष पापकः स हि मन्तव्यः कृमिर्नारकः ।
नाम न गृह्णाति कविः, तस्य यदि स्यात् बहु विख्यातः लोके कः संजातः ॥
स्वार्थगभीरे पङ्के पतितः मृतो जगति स श्वसन् जीवितः ।
पशुत्वं याति यदा, सत्यं नरकं पुनः प्रयातः लोके कः संजातः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—सुष्ठु कविश्रेष्ठ सुष्ठु । स्वर्गतेन त्वया देशान्तरकवीनामपि उदात्तकल्पनाः स्वीकृत्य दर्शितमेव स्वीयं दूरदर्शित्वम् । परं किमर्थं त्वं पुनः भारतं प्रति प्रस्थितः ?

कालि०—शाकुन्तलादपि सरसतरं, विक्रमोर्वशीयादपि रुचिरतरं, मालविकाग्निमित्रादपि मधुरतरं नाटकं रचयितुमिच्छामि । तदर्थं भारतभ्रमणं कृत्वा नूतनान् विचारान्, नवीनाः कल्पनाः, आधुनिकानि शास्त्राणि आत्मसात् कृत्वा बुद्धिवैभवं वर्धयितुं मे मनीषा । अस्मिन् कार्ये, मुनिवर ! भवतां साहाय्यमपेक्षितम् ।

नारदः—अत एव च देवराजशापं तव भारतभूमिप्रस्थानं च श्रुत्वा अहमपि त्वामनुगन्तुं प्रवृत्तः । किं तु कविवर ! एषा ते कल्पना त्वया कदापि न प्रकाशनीया ।

कालि०—किमर्थम् ?

नारदः—अधुना भारतभूमिः स्वतन्त्रा स्वायत्तशासना च संजाता । पारतन्त्र्यवशतः चिरात् परकीयपदतलमर्दितः स्वाभिमानः अधुना शतगुणितेन सामर्थ्येन प्रकटीभूतः । तदभिमानमहावेगेन सर्वमेव तेषां प्राचीनं निखिले संसारे श्रेष्ठतमम् इति कल्पना अधुना भारतीयानां मनसि वरीवर्ति । तदनुसारं त्वमपि जगल्ललामभूतः श्रेष्ठः कविरिति मत्वा भारते तव महोत्सवः सर्वत्र प्रवृत्तः । सर्वे एव जनाः कालिदासमहोत्सवः, कालिदासमहोत्सवः इति तारस्वरेण वदन्ति । स एव आरावः त्वया श्रुतः । किंतु कथयामि ते यत् शाकुन्तलात्सरसतरनाटकस्य कल्पनामपि श्रुत्वा त्वां सर्वे उपहसिष्यन्ति इति । तस्मात् त्वया तूष्णीमेव स्थातव्यम् ।

कालि०—आश्चर्यमेवैतत् । कालिदासमहोत्सवे स्वयं मम कालिदासस्य जिह्वायन्त्रणा ।

नारदः—सत्यमेव कविरसि । कथं त्वां ज्ञास्यन्ति जनाः अयं कालिदास इति । कथय, ननु कथं ज्ञास्यन्ति । स्वर्गतस्य तव कतिपयानि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वर्षशतानि जातानि । न ते प्रतिमापि कुत्रासीत् येन त्वत्सादृश्यं जनैः अनुमेयं भवेत् ।

कालि०—तदधुना किं कर्तव्यम् ?

नारदः—एकतः शोभनमेवैतत् । अधुना त्वं यत्रकुत्रापि गत्वा अज्ञातरूपेण जनानां मनसि किं वर्तते इति ज्ञातुं समर्थो भविष्यसि ।

कालि०—मम तावत् तिष्ठतु कथा । किंतु भगवन् ! नारदस्य रूपं तु सर्वेषामेव भारतीयानां परिचितमेव कृतं पौराणिकैः । तत् किमर्थं भगवता एषा वेषपरिवृत्तिः कृता ?

नारदः—कवे ! क्रान्तदर्शिनोऽपि ते चक्षुः अनाक्रान्ते सूचीभेद्ये कालतमसि प्रवेष्टुं न समर्थम् । कालिदास ! यो नारदः पुराणवर्णनेन कल्पनापरिचितः स यद्यद्य आत्मनः ऊर्ध्वशिखेन तन्त्रीधारिणा रूपेण आगतो भवेत् तर्हि अद्यतनाः पाठशालाबालकाः तस्य तद्विचित्रं रूपं दृष्ट्वा न केवलं तमुपहास्यतां प्रापयिष्यन्ति, अपितु तस्योपरि लोष्टवृष्टिं करिष्यन्ति । तस्मात्,

यथा देशस्तथा वेषो यथा नाम तथा गुणाः ।
यस्य सोऽत्रैव जयति, नेतरे जीर्णवादिनः ॥

[नेपथ्ये—मह्यं देहि, मह्यं देहि । अत्रैका अत्रैका, इतः पश्य, इति कलकलः]

कालि०—भगवन् किमेतत् ? कोऽयं वदान्यो महाभागः ? किं च एवं मेघवृष्टिन्यायेन वितरति ?

नारदः—पश्यामि [इति अग्रे गच्छति]

[ततः प्रविशति हस्तपत्रकाणां संभारं कक्षे धृत्वा वितरकः, समन्ताच्च बालकबालिकाः तमेव कलकलं कुर्वाणाः]

वितरकः—विशाला सभा, विराट्स्वरूपा सभा ।

कालि०—(आत्मगतम्) विशालेति शब्दादेव सा श्रीविशाला विशाला-पुरी मम स्मृतिपथमागता ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वितरकः—कालिदासजन्मदिवसे, कालिदासजन्मस्थाने कालिदास-स्मारकनिर्णयार्थम् [इति उच्चैर्घोषयति]

नारदः—[समीपं गत्वा] मह्यमपि एकं देहि ।

वितरकः—एकं किम्? त्रीणि गृहाण । एकं त्वदर्थे, एकं तत्र तिष्ठते ते सुहृदे, एकम् अधिकं रक्षणार्थं क्षेपणार्थं वा ।

[इति त्रीणि हस्तपत्रकाणि नारदहस्ते समर्प्य निष्क्रान्तो बालकैः सह]

कालि०—[नारदसमीपं गत्वा सुरर्षे, किं तत्?]

नारदः—गृहाण, पठ च स्वयमेव ।

[कालिदासः पत्रकं हस्ते गृहीत्वा विस्फारिताभ्यां लोचनाभ्यां पश्यति]

कालि०—भगवन्! नैव पठितुं शक्नोमि न जाने कस्यां लिप्यामिदं लिखितम् । मम परिचिता वर्णाः न दृश्यन्तेऽत्र । किं न केवलं जातौ, लेखनेऽपि वर्णसंकरो जातः, येन न ते स्पष्टं विज्ञायन्ते ।

नारदः—अयं न वर्णसंकरः । अपि तु वर्णोत्क्रान्तिरियम् । मयैव विस्मृतं यदेतान् वर्णान् पठितुं त्वं समर्थो न भविष्यसि इति ।

कालि०—भगवता कुत्र शिक्षिता एषा वर्णावलिः?

नारदः—मया तु स्वर्गलोकाच्चल, मृत्युलोकमागच्छ, मर्त्यलोकात् प्रतिष्ठस्व, स्वर्गलोकं प्रविश इति सर्वदैव यातायातं क्रियते । एवं कालानुकूल-संचारी अहं सर्वदैव समाजेन सह वर्ते, न कदापि पश्चात् । कालपरिवर्तनेन सह सर्वाणि परिवर्तनानि शनैः शनैः प्रसृतत्वात् सुखपरिचितान्येव भवन्ति ।

कालि०—पठतु भगवान् ।

नारदः—[पठति] विशाला सभा, विराट्स्वरूपा सभा । कालिदास-जन्मदिवसे, कालिदासजन्मस्थाने, कालिदासस्मारकनिर्णयार्थम् ।

कालि०—एतत्तु वितरकशब्दैरेव ज्ञातम् । किंतु कथय भगवन्! कथं ज्ञातमत्रत्यैः जनैः कस्मिन् स्थाने, कस्मिन् दिवसे मया जन्म गृहीतमिति । मया तु तत्सर्वमेव विस्मृतम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—स्वाभाविकमेव ते विस्मरणम् । तस्मिन् समये जन्मदिवसस्य न किमपि महत्त्वमासीत् । किमासन् कतिचिन्नियमाः तस्मिन् युगे यथा पञ्चमवर्षात् प्राक् अध्ययनारम्भो न कर्तव्यः, अस्मात् वर्षात्पूर्वं विवाहो न कर्तव्यः, अमुकात् वर्षादनन्तरं शासकीयसेवायां प्रवेशो न लभ्येत इत्यादयः ?

कालि०—[विहस्य] न, न । किंतु कः संबन्धो वयसा सह विद्याध्ययनस्य, विवाहस्य, सेवाया वा इति तु न जाने ।

नारदः—[गम्भीरतया] तत्तु ते अनाकलनीयमेव । वर्तमानयुगे सर्वेण आत्मनो जन्मदिनं जिह्वाग्रे एव रक्षणीयमिति दण्डकः । पदे पदे तस्य आवश्यकता ।

कालि०—किंतु कथयतु भवान् कथं मे जन्मदिवस एभिर्निर्णीतः ?

नारदः—तवैव कथनात् ।

कालि०—किं मम कथनात् ?

नारदः—अथ किम् ।

कालि०—कुत्र कदा च मया तत्कथितम् ?

नारदः—किं न लिखितं त्वया मेघदूते काव्ये 'आषाढस्य प्रथम-दिवसे' इति । तथैव 'शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ' इति च । स्वयं लिखितं स्वयमेव विस्मरसि ।

कालि०—किंतु तस्य संबन्धः यक्षेण न मया सह ।

नारदः—सत्यमेव त्वमदूरदर्शी । अरे, मेघदूतस्य अभ्यासात् पाश्चात्यैः पण्डितैः तदनुगामिभिः पौरस्त्यैश्च, निश्चितमेव, यत्त्वया यक्षमुखेन स्वस्थितिरेव तत्र वर्णिता । तव स्वामिना स्वाधिकारे प्रमादं लक्ष्यीकृत्य वर्षभोग्यो दण्डः तुभ्यं दत्तः । तदा रामगिरौ महान् कारावास आसीत् । तत्रत्यायां कारायां राजाज्ञया त्वं निवेशितः । तत्र स्वप्रियासमागमे त्वमेव उत्कण्ठित आसीः, तां च उत्कण्ठां यक्षमुखेनैव त्वं वर्णितवान् इति । यक्षवर्णनं वाच्यार्थेन, व्यङ्ग्यार्थेन तत्तवैव वर्णनम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालि०—किंतु एवं गृहीतेऽपि न मया कुत्रापि कथिता मे जन्मतिथिः।

नारदः—न जाने त्वां कथं कथयामि। स्वर्गवासे अमृतसेवनेन ते बुद्धिर्जाड्यं गतेति मन्ये।

कालि०—स्यादेवमपि।

नारदः—कथय रे कालिदास, जनाः प्रथमं कार्यनिश्चयं कुर्वन्ति तिथिनिश्चयं वा?

कालि०—कार्यनिश्चयम्।

नारदः—एवं कालिदासमहोत्सवः कर्तव्य इति प्रथमं निश्चितम्। पश्चात्तन्निश्चयं कृतवद्भिः 'आषाढस्य प्रथमदिवसे' इति मेघदूतस्थं वाक्यं गृहीत्वा तस्मिन्नेव दिने महोत्सवसमारम्भः कृत एव।

कालि०—समारम्भोऽपि कृतः?

नारदः—अथ किम्। किंतु पश्चात् तस्मिन् चरणे 'प्रशम-दिवसे' इति पाठभेदः दृग्गोचरतां गतः।

कालि०—भवतु नाम पाठभेदः।

नारदः—पाठभेदे पक्षभेदः।

कालि०—[आत्मगतम्] मम काव्यस्य शब्दं प्रत्येव न, अपितु अक्षरम् अक्षरं प्रति अवधानं दीयते इति सत्यमेव अहम् आत्मानं धन्यं मन्ये।

नारदः—तत एकेन पण्डितेन सूचना कृता। यदि महोत्सव-तिथिरेव निश्चेतव्या, किमर्थं सा तिथिर्ग्राह्या यस्यां यक्ष उत्कण्ठितोऽभूत्। अस्यास्तिथेर्वरं स दिवसः यस्मिन् स आनन्दपूर्णोऽभूत्।

कालि०—प्रसन्नः कल्पः।

नारदः—अपरेण प्रतिपादितम्। कारावासान्मुक्तिः पुनर्जन्मसमा। तस्माद्यदि प्रथमजन्मदिवसः अज्ञातः किमर्थं पुनर्जन्मदिवस एव जन्मदिवस इति न स्वीकर्तव्यः। ततः प्रभृति सर्वैरेव एषा तिथिः स्वीकृता।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तस्मादधुना कण्ठस्थं कुरु ते जन्मदिवसं, येन न ते कदापि विस्मृतिः स्यात्। वद कस्मिन् कालिदासेन जन्म गृहीतम्?

कालि०—कार्तिकशुक्लैकादश्याम्। [विहस्य] एते मे भारतीया भ्रातरः सूत्रद्वारा स्वर्गारोहणे पण्डिता भान्ति।

नारदः—अधुना भारते सूत्रमाहात्म्यं बहु प्रवृद्धम्। एते न केवलं सूत्रद्वारा स्वर्गमारोहन्ति अपि तु एतैः सूत्रद्वारा स्वातन्त्र्यमपि संपादितमिति प्रवादः।

कालि०—भवतु। अधुना एतज्ज्ञातुं मे कुतूहलं यत् कथमेभिः तैलबुद्धिभिः मम जन्मस्थानं निश्चितम् इति।

नारदः—तदपि शृणु। त्वज्जन्मस्थानविषयेऽपि आसन् विविधानि मतानि।

केचित्काश्मीरजं प्राहुस्त्वां केचिद्वङ्गजं विदुः।
मध्यप्रदेशजं चान्ये स्वप्रामाण्यपरायणाः॥
नासीत् एकः प्रदेशोऽपि भारते यन्निवासिनः।
त्वां नाब्रुवत तत्रत्यं स्वाभिमानभरेण च॥

भोः कालिदास! किं त्वमपि स्मरसि कस्यां जातौ त्वमुत्पन्नः, को वा प्रदेशः त्वया स्वजन्मना नीतः धन्यताम्?

कालि०—भगवन्!

किंजातीयोऽहं किं-
देशीयो भारते यदा ह्यभवम्।
जात्यादिधर्मरहिते
स्वर्गे तद्विस्मृतं चिरनिवासात्॥
अद्यापि कोऽहमृषिवर!
निश्चेतुं यदि भवेन्न संभाव्यम्।
भारतवासी कविरह-
मिति पर्याप्तं हि मद्विषये॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

किं तु अस्मिन्विषये को निश्चयो जात इति ज्ञातुं मे बलवती मनीषा ।

नारदः—तामपि समाधातुमिच्छामि । एकस्यां सभायां प्रवृत्तेऽस्मिन् वादे एकेन महाभागेन उत्थाय वामहस्ततले दक्षिणमुष्टिं प्रपात्य उद्घोषितम् । इदमेव कालिदासजन्मस्थानमिति वयं ब्रूमः । नास्ति अस्य प्रमाणदानभरः अस्मासु । यावत् न कोऽपि अस्माकं प्रतिपादनं प्रमाणपुरःसरं खण्डयति तावदिदमेव कालिदासजन्मस्थानमिति प्रमाणम् ।

कालि०—शोभनो बलवांश्चायं तर्कः । किं तु किं स्थानं निश्चितं तेन इति तु भगवता न कथितम् ।

नारदः—या श्रीविशाला विशाला पुरी त्वया विस्तारपूर्वकं मेघदूते वर्णिता, यत्र वक्रेणापि पथा गन्तुं त्वया यक्षमुखेन मेघः प्रार्थितः, या च दिवः खण्डमेकं कान्तिमत् इति त्वया उत्प्रेक्षिता, या च त्रिभुवनगुरोश्चण्डीश्वरस्य धाम, सा उज्जयिनी एव तव जन्मनगरी भवितुमर्हति इति सर्वैरेव एकरवेण निर्णीतम् ।

कालि०—अद्य धन्यो जातः उज्जयिनीजन्मस्थानः प्रबोधिन्येकादशी-जन्मदिवसः कालिदासः ।

[नेपथ्ये घनवाद्यताडनपूर्विका घोषणा । शृणुत शृणुत भोः पौराः ! या विशाला सभा, या विराट्सभा कालिदासस्मारकनिर्णयार्थं निश्चिता सा विशाला मन्त्रिणः कार्यान्तरप्रसक्तत्वादद्य न भविष्यति, न भविष्यति, न भविष्यति । तस्मात्सभास्थाने केनापि न गन्तव्यं, न गन्तव्यं, न गन्तव्यम् । इति डिण्डिमघातः । ]

[ततः प्रविशति घनवाद्यताडकैः सह]

उद्घोषकः—[पुनरपि पूर्वोक्तां घोषणां करोति]

नारदः—[अग्रे गत्वा]

किं सर्वमेव कार्यजातं स्थगितम् ?

उद्घोषकः—[सरोषम्] किं मया उद्घोषितमेवम् ? सभा एव न भविष्यति । अन्यत् सर्वं भविष्यत्येव । मम कार्ये मा कुरु अन्तरायम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नगरस्थचतुष्पथेषु सर्वेषु घोषणा अद्यापि कर्तव्या । [इति घनवाद्यताडकैः सह निष्क्रान्तः । ]

कालि०—आसीन्मम महती उत्सुकता तां विशालां सभां द्रष्टुम् । अधुना सा सफला भविष्यतीति न मन्ये ।

नारदः—कविवर!

'यस्यामतं मतं तस्य मतं यस्य न वेद सः ।
इति शुश्रुम धीराणां ये नस्तद् व्याचचक्षिरे ॥'

अनेन उद्घोषणेन सभा न भविष्यतीत्यपि न मन्यस्व । नवागतः त्वमस्मिन् अर्वाचीने स्वाधीने भारते । अहं तु वारं वारं नैकरूपेण गतप्रत्यागतत्वात् चिरपरिचितः । अतो मामनुसर । एते जना न मां जानन्ति न चापि त्वाम् । अतः निश्चिन्तावावां कुत्रापि गमने । मयि मार्गदर्शिनि सर्वमेव सम्यग् दृष्टं भविष्यति । अत आगच्छ । गच्छाव आवाम् ।

[इति निष्क्रान्तौ]

[यवनिका]

(इति प्रथमोऽङ्कः)

## अथ द्वितीयोऽङ्कः

[ततः प्रविशति कालिदासः]

कालि०—कथं नाद्यापि आगच्छति सुरर्षिः ? तेन रहितः सत्यमेव किंकर्तव्यमूढोऽहम् ।

[नेपथ्ये वीणारवेण सह 'नारायण' इति नामस्मरणं श्रूयते]

कालि०—[निरूप्य]

तन्त्रीरवः श्रूयते च वीणा किंतु न दृश्यते ।
वदन्नारायणं नाम नारदोऽयं भवेन्न वा ॥

[ततः प्रविशति आधुनिकविद्यार्थिवेषधारी नारदः । कालिदासः विस्मयचकितः]

नारदः—विस्मितमूढ इव किं प्रेक्षसे ? कवे!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शिखाच्छादनार्थं शिरोवेष्टनी मे
इयं ग्रन्थरूपा प्रिया वल्लकी च ।
कथं कालिदासीयकाव्यस्य शिक्षा
नवे विश्वविद्यालये तद्धि दृश्यम् ॥

कालि०—भगवन्! अथ कुत्र गम्यते?

नारदः—अखिलभारतीये शासकीये कालिदास-विश्वविद्यालये ।

कालि०—कथम् अखिलभारतीयत्वम्? किं सर्वेभ्य एव भारतप्रदेशेभ्यः छात्रा अत्र आगच्छन्ति?

नारदः—एतन्नावश्यकम् । वर्तते अथ अस्मिन् भारते 'अखिल-भारतीय-नापितसमितिः' 'अखिलभारतीयमहाराष्ट्रसमाजः', 'अखिलभारतीय-हरिजनोद्धारकमण्डलम्' इत्यादि ।

कालि०—किं तर्हि अखिलभारतीयविशेषणं नान्वर्थकम्?

नारदः—अनर्थकं, निरर्थकं वा, किंतु अन्वर्थकं न ।

कालि०—तर्हि तस्य स्वीकारः किमर्थः?

नारदः—शोभायै स्वप्राख्यापनायै च ।

कालि०—आश्चर्यमिदम् अशोभनं च ।

नारदः—किमर्थमाश्चर्यमशोभनं वा? पृच्छामि किं त्वद्विषयकमेव किंचित्?

कालि०—सुखेनैव ।

नारदः—तर्हि किमर्थं कवे त्वं कालिदासः? किं त्वया कदापि काल्या दास्यं कृतम्? कृतं चेत् न किमत्यन्तं विस्मयावहं यत् त्वया कालिदासेन न एकस्मिन्काव्ये, नाप्येकस्मिन् नाटके स्वस्वामिनी सा काली स्मृता स्तुता वा? यस्याः प्रसादात् त्वं कविर्जात इति प्रसिद्धिः वर्तते लोके, किं तस्या नाम्नोऽपि अग्रहणं न ते भक्तिहीनत्वं दर्शयति? तस्मान्नाम्नो विचारो न बहुकर्तव्यः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालि०—[स्मितं कृत्वा] भगवन्, अथ कुत्र गम्यतेऽधुना? स्मृतिमभिनीय] आम्। विस्मृतमेव मया। विश्वविद्यालये नु। किं तत्र पाठ्यते?

नारदः—सर्वाः कलाः, सर्वा विद्याः, सर्वाणि शास्त्राणि, सर्वे चाधुनिका आचारविचाराः।

कालि०—तर्हि जातं मे महत्कार्यम्। अत्रैव वर्धितं भवेन्मे बुद्धिवैभवम्। किं न शक्नवानि अस्मिन्नेव स्थाने आधुनिकानि शास्त्राणि अध्येतुमहमपि?

नवीनाद्विज्ञानात्स्ववशमुपयाताः प्रकृतयः
श्रमा ये शूद्राणां परिचरणजास्ते विगलिताः।
दरिद्राणां दैवे वसति न मतिश्चोद्यमयुता
तदध्येतुं सर्वं ह्ययमपि जनो वाञ्छति मुने॥

अस्मिन् विश्वविद्यालये सा वाञ्छा कदाचित् पूर्णा स्यात्।

नारदः—किं तु कवे, किमत्र प्रवेशं प्राप्तुमुत्तीर्णा ते प्रवेशपरीक्षा? किं च विद्यते त्वत्सकाशं शिक्षाग्रहणार्थं शुल्कमावश्यकम्?

कालि०—[ग्रीवां चालयित्वा] न, न।

नारदः—[विहस्य] तर्हि ते प्रवेशोऽपि अत्र न, न। महाकवे! गतास्ते दिवसा विद्वन्! अद्य यदि प्रवेशपरीक्षाप्रमाणपत्रं न विद्यते, न च शिक्षाशुल्कं, तर्हि विश्वविद्यालयस्य द्वाराणि तव विषये पिहितान्येव।

कालि०—[सविस्मयम्] आम्। एवं?

नारदः—नवागन्तुकत्वात्सर्वमेव ते नवीनम्। आधुनिके भारते त्वया हृदि स्थापिताः सर्वाः पर्युषिताः कल्पना निःसारयितव्या एव। तव काल आसीद्धर्मप्रधानः। अयं कालः अर्थप्रधानः। अर्थाद्विना सर्वमेवात्र निरर्थकम्। उपविशतो धनम्, उत्तिष्ठतो धनं, धावतो धनं, चलतो धनं, किं बहुना तिष्ठतोऽपि, धनं, धनं, धनमित्येव। श्रूयते सर्वत्र धनस्यैव ध्वनिः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यस्य धनं स धन्यः, अन्यः अधन्यः । विद्याप्राप्त्यर्थमपि, अधुना न पर्याप्ता गुरुशुश्रूषा, नापि विद्यारुचिरावश्यकी । अद्य तु पुष्कलं धनमेव विद्याप्राप्ति-साधनम् ।

कालि०—तर्हि निर्धनानां विद्या अप्राप्यैव ।

नारदः—अथ किम् । 'अधनस्य कुतो विद्या', इति आधुनिकं सूत्रम् ।

कालि०—[किंचिद्विचार्य] तर्हि 'कुतो धनमविद्यस्य' इत्यपि स्यात् । सर्वे धनिनो विद्वांसः, सर्वे विद्यावन्तो धनवन्तः इति चेत् सत्ययुगमेव प्रवृत्तमिति मन्ये ।

नारदः—मन्ये त्वयाधीतं काव्यशास्त्रमेव । हेत्वाभासयुक्तस्ते तर्कः । न सन्ति सर्वे विद्वांसो धनसंपन्नाः नापि सर्वे धनिनो विद्यायुताः । किंतु अलमेतेन विवादेन । कथं सन्ति अत्राचार्याः, कथं वर्तन्ते च छात्राः इति प्रथमं सर्वं द्रष्टव्यम् । पश्चाद्यदि ते सत्यमेव मनीषा भवेत्, यतिष्येऽहं त्वदर्थे काञ्चित् शुल्कमुक्तिवृत्तिं संपादयितुम् ।

[नेपथ्ये दीर्घो घण्टानादः]

कालि०—किमर्थ एष घण्टारवः ?

नारदः—शिक्षारम्भकालसूचकः । पश्य पश्य कथं विद्यार्थिनः विद्यार्थिन्यश्च पुस्तकभारं हस्ते गृहीत्वा त्वरया आत्मनः कक्षां प्रवेष्टुमिच्छन्ति । तदागच्छ, आवामपि तत्रैव गच्छावः ।

[इति निष्क्रान्तौ]

(इति विष्कम्भकः)

[ततो यवनिकायां दूरीकृतायां दृश्यते शालाकक्षः । एकपार्श्वे भित्तिसमीपम्, उच्चपीठोपरि एका आसन्दी शिक्षकार्थम् । तत्पुरतः कानिचित् काष्ठासनानि सलेखफलकानि]



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशतो नारदः कालिदासश्च]

नारदः—शीघ्रं चल। कुरु त्वराम्। सर्वेभ्यः प्राक् आवां पृष्ठतमे आसने उपविशावः।

[तथा कुरुतः]

तत एकतः प्रविशतो द्वे विद्यार्थिन्यौ सुकृतनेपथ्ये। तयोरेका सकञ्चुकवस्त्रधारिणी पुष्पालंकृतकेशसंभारा। अन्या विकच्छा द्विकपर्दा च। पृष्ठभागे लंबत एकः, अपरः पुरतः, तेन सह व्यग्रवामहस्ता।]

एका—सखि चन्द्रकले! पूर्णमेव विस्मृतं मया, अद्य किं पुस्तकमध्येतव्यमिति। तस्मात् सर्वाण्येव पुस्तकानि गृहीत्वा अहमागता। कथय प्राध्यापकमहाशयः अद्य किमध्यापयिष्यति?

चन्द्र०—अयि शशिकले, का कथा पुस्तकस्य? अहं तु न स्मरामि विषयमपि। तस्मात् मया तु नानीतमेकमपि पुस्तकम् अभ्यासार्थम्।

शशि०—मिथ्यावादिनि, हस्ते तु पुस्तकसंभारः। मुखेन कथयसि एकमपि नानीतमिति।

चन्द्र०—ननु पश्य कानि एतानि पुस्तकानीति। इयमेका नवलकथा। इदं नवप्रकाशितमेकं नाटकम्। एष काव्यकलापः।

शशि०—किं च खलु इदम्?

चन्द्र०—भर्तृहरेः शृङ्गारशतकं सचित्रम्। एतच्चतुर्थं कुटुम्बनियोजनशास्त्रम्।

शशि०—को लाभस्तवानेन? त्वं तु न अद्यापि कुटुम्बिनी संवृत्ता।

चन्द्र०—महान् लाभः। अति रोचते मे इदम्।

शशि०—दर्शय, दर्शय।

चन्द्र०—अद्यापि अनुभवहीना बालासि।

शशि०—त्वं ननु न केवला माता, अपि तु मातामही।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चन्द्र०—चल, अन्ये छात्रा आगच्छन्ति ! आसनग्रहणं तावत् कुर्वः।

[तथैव कुरुतः]

[अन्यतः प्रविशतो विद्यार्थिनौ]

कालि०—(नारदं प्रति) [जनान्तिकम्] किमेवंप्रकारकं विद्याध्ययनं कुर्वन्ति एताः ?

नारदः—तूष्णीं तिष्ठ रे। ओष्ठयोः मौनमुद्रां संस्थाप्य कुरु केवलं श्रोत्रकार्यम्। पश्य च शृणु च किमेतौ द्वौ कुरुतः संलपतश्च।

[विद्यार्थिनोरेकस्य हस्ते पुष्पगुच्छकः। अपरस्य करे कन्दुकक्रीडा-साधनं जालदण्डः]

एकः—रे कौशलक! किं संस्कृताध्यापकः अद्य कन्दुकक्रीडापाठं दास्यति ?

कौशलकः—नहि रे पुष्पक! स वराकः तं पाठम् अध्यापयितुमक्षमः। कुमारसंभवाध्ययनसमये पार्वत्याः कन्दुकक्रीडां दर्शयितुं स मया प्रार्थितः। किंतु केन प्रकारेण सा गौरी कन्दुकक्रीडामकरोत् सविस्तरं वर्णयितुमपि न स समर्थो बभूव। एते प्राध्यापकाः सत्यमेव पुस्तकाभ्यासजडाः। पुस्तकस्थानां शब्दानां शब्दान्तरप्रतिपादनेनैव अर्थं प्रकटयितुं ते समर्थाः। तैः शब्दैः याः क्रिया ध्वन्यन्ते ताः ते नैव जानन्ति।

पुष्पकः—किमत एव त्वया तत्क्रीडाप्रकारं प्रत्यक्षं दर्शयितुमेतत्कन्दुक-क्रीडासाधनमानीतम् ? [किंचिद्विहस्य] किंतु कुत्र कन्दुकः ?

कौश०—[कञ्चुकान्तःकोषान्निष्कास्य] एष कन्दुकः। किंतु किं रे पुष्पक! कथय किमर्थम् त्वया आनीतः एष पृथुपुष्पगुच्छकः ?

पुष्पकः—तस्यै शशिकलायै दातुम्। अस्मत्तातस्य उद्याने जातानि एतानि। ह्यः तस्या मन आकृष्टमेतैः पुष्पैः। अत आनीतो मया एष पुष्पगुच्छकः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कौश०—आमलकं दत्वा कूष्माण्डपूरणार्थमेष उद्योग इति प्रतिभाति । पश्य कथं

त्वं पीयसे चालसपक्ष्मपङ्क्तिः
उपोषिताभ्यामिव लोचनाभ्याम् ।

तद्यावत् प्राध्यापको नागच्छति तावदेवार्पय देवतायै ।

पुष्पकः—[शशिकलासंमुखं स्थापयित्वा] एष मे अल्प उपहारः ।

शशि०—बलवदनुगृहीतास्मि । गच्छतु भवान् स्वासनमलंकर्तुम् ।

[पुष्पकः कौशलकसमीपं गच्छति]

कौश०—किम् एतावती एव संभावना ?

[उभावपि निजासनयोरुपविष्टौ]

कालि०—(नारदं प्रति) [जनान्तिकम्] किं भो एष एव अभ्यासः क्रियतेऽत्र ?

नारदः—[तर्जनीं नासिकापुरतः प्रतिष्ठाप्य] वाचंयमो भव । पश्य यद्यत्पश्यसि । सावधानं शृणु यद्यत् श्रोष्यसि ।

[ततः प्रविशति एकेन पार्श्वेन तरुणः अन्येन तरुणी च]

तरुणः—प्रियंवदे, कियद्विलम्बितं त्वया । प्राध्यापकागमनवेला संजाता । क्षिप्रं कथयाद्य संध्यासमये कुत्र मिलिष्यसि ?

प्रियंवदा—मधुकर, अद्य गृहगमनानन्तरं न मे अवसरः भविष्यति । सूर्यास्तादनन्तरं न माता कुत्रापि गन्तुं मामनुजानाति ।

मधुकरः—तर्हि कष्टमापतितम् । अद्य तु मया 'शकुन्तला' नामकचलचित्रपटदर्शनार्थं क्रीतं स्वतन्त्रस्थाने उपवेष्टुं पत्रिकाद्वयम् । किं न केनापि मिषेण अतिसंधातुं शक्या सा वृद्धा [प्रियंवदा सरोषं पश्यति] प्रियजननी ।

प्रियं०—पश्यामि । [किंचिद्विचार्य] मधुकर! एवं करोमि । विद्यते सखी मे कलावती । तस्या अनुनयं कृत्वा गृहे सत्यनारायणकथाश्रवणार्थं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रसादग्रहणार्थं च अद्य रात्रौ निमन्त्रिता भविष्यामि । सत्यनारायणनिमन्त्रणं तु जननी स्वीकरिष्यत्येव । अहमपि द्वितीयदृश्यं दृष्ट्वा प्रहररात्रिपर्यन्तं गृहं गमिष्यामि ।

मधु०—सुष्ठु । सत्यमेव सत्यनारायणः अनेन सत्कार्येण प्रीतो भविष्यति । अधुना उपविशावः स्वे स्वे स्थाने । [तथा कर्तुं परिक्रामतः]

कालि०—[स्वगतम् ]

स्त्रीणामशिक्षितपटुत्वमशिक्षितासु
संदृश्यते किमुत या बहुबोधवत्यः ।

[नारदं प्रति किंचिद्वक्तुमिच्छति]

नारदः—[तूष्णीमेव तं प्रतिषेधति] [नेपथ्ये घण्टानादः] [कालिदासं प्रति] तत्र आगच्छति प्राध्यापकः । सावधानो भव ।

[ततः प्रविशति आपादमस्तकम् आङ्ग्लवेषालंकृतः निःश्मश्रुकः सोपनेत्रकः कक्षे द्वित्राणि महान्ति पुस्तकानि गृहीत्वा, खट् खट् इति सोपानत्कपदध्वनिं कुर्वन् प्राध्यापकः । सर्वे सनारदकालिदासा उत्तिष्ठन्ति]

कालि० [जनान्तिकम् ] किमेष संस्कृताध्यापकः ? शोभना संस्कृतिः ।

नारदः—[तूष्णींभावसंज्ञां दर्शयति] [उच्चं पीठमारुह्य प्राध्यापकः पुरःस्थे लेखनकाष्ठफलके पुस्तकानि पातयति । उपनेत्रं नासिकाया उत्तार्य करलघुवाससा प्रमृज्य पुनः स्थाने स्थापयति । छात्राणामभिमुखो भूत्वा]

प्राध्यापकः—सुदिनं सर्वेभ्यः । कृतम् उत्थापनेन । उपविशत सर्वे यूयम् ।

[सर्वे स्वेषु स्वेषु आसनेषु उपविशन्ति] शशिकले ! अद्य किमध्येतव्यमस्माभिः ?

[न शशिकला न कोऽप्यन्यः किंचिद्ब्रवीति] भवतु, अहमेव कथयामि । अथ भारतभूललामभूतेन कविकुलगुरुणा प्रथितयशसा कालिदासेन विरचितमभिज्ञानशाकुन्तलं नाम नाटकं पठितव्यमस्माभिः । अनेन नाटकेन

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिदासस्य कीर्तिः संपूर्णभारते एव न प्रसृता, किं तु अन्येषु अपि देशेषु । 'गटे' नामकपण्डितेन अस्य बह्वी प्रशंसा कृता ।

कौश०—केन भाव? किं नाम तस्य?

प्राध्या०—'गटे' इति ।

पुष्पकः—मम तातपादानां मतेन तु तस्य कवेः नामोच्चारणमति-कठिनम् । किं तु भवत्कृतमुच्चारणं तु सुलभमेव ।

प्राध्या०—उच्चारणे किम्? यो वा को वा उच्चारः भवतु । महत्त्वं वर्तते तस्य विचारे, न तस्य नाम्न उच्चारे । शार्मण्यदेशीयेन तेन विदुषा शाकुन्तलविषये यत्कथितं तत् सावधानेन मनसा श्रृणुतम् । तेनोक्तम्—

संसारे निखिलेऽस्ति सुन्दरतमं तद्द्रष्टुमिच्छास्ति चेत्
भावांश्चैव हि मानसान्मृदुतमान् विज्ञातुमिच्छा यदि ।
बोद्धुं भारतसंस्कृतेश्च विषयं यद्यस्ति कौतूहलम्
एकं नाटकमेव तत्पठ सखेऽभिज्ञानशाकुन्तलम् ॥

चन्द्र०—किमेतत्पद्यं तस्यैव 'गेट' पण्डितस्य ?

शशि०—तस्य नाम तु 'गटे,' न 'गेट' इति ।

चन्द्र०—किमधुनैव गुरुणा न कथितम्, उच्चारणे नास्ति महत्त्वमिति ।

प्राध्या०—तथापि 'गेट' इति न कथनीयम् । एतत्पद्यं न तेन विरचितं किंतु तद्भावप्रदर्शकमेव । तस्य पद्यमस्मिन् पुस्तके वर्तते 'जर्मन-भाषायाम् । किमहं पठानि तत् ? [इति एकं पुस्तकम् उद्घाटयति]

सर्वे—न, न, भाव, न, न । को लाभः तत्पठनेन ? वयं तु तां भाषां न जानीमः ।

मधु०—किंतु किं तेन गुरोः पाण्डित्यप्रदर्शनं न भविष्यति ?

प्राध्या०—भवतु । नैव लाभः पठने इति बहूनां मतं मानयितव्यमेव । मया तु 'गटे' पण्डितस्य मतं प्रदर्शितम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रियं—किंतु किं मतं भवतां भाव ?

प्राध्या०—मन्मतमपि तथैव । अथ शृणुत एकस्य भारतीयस्य पण्डितस्य मतम् । स कथयति [अन्यत्पुस्तकमुद्घाट्य]

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥

शशि०—किं नाम अस्य पद्यस्य रचयितुः भाव ?

प्राध्या०—अज्ञातनामा एष इति मन्ये । को लाभस्तन्नामज्ञानेन ?

चन्द्र०—पाश्चात्यानां नाम प्रसिद्धम् । भारतीयानामज्ञातमिति किम् ?

प्राध्या०—पाश्चात्या नाम नामप्रथनशीलाः । भारतीया वयं न तथा ।

प्रियं—भावस्तु भारतीयः सन्नपि न मन्यते एवमिति मन्ये । यदा तु भवतां लेखः प्राकाश्यं गच्छति तदा तस्य शिरस्येव भवतां सर्वोपाधियुक्तं नाम प्रकाशते । नामप्रकाशनात् लेखस्य माहात्म्यं वर्धत एव ।

शशि०—अत एव मया पृष्टं तन्नाम । येन केनापि लिखितं न प्रमाणं भवितुमर्हति ।

कौश०—भवतु, के ते चत्वारः श्लोकाः ?

प्राध्या०—चतुर्थाङ्काध्यापनावसरे कथयिष्यामि तान् । अद्य तु प्रारम्भ एव कर्तव्यः ।

पुष्पकः—मम तातपादानां मतेन 'शुश्रूषस्व गुरून्' इति श्लोको विद्यते तेषु चतुर्षु श्लोकेषु ।

प्राध्या०—स्यात् ।

कौश०—किंतु किं भवान्मन्यते ?

प्राध्या०—मन्मतमपि तथैव ।

मधु०—स श्लोको न केनापि पण्डितेन रचितः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रियं०—अयि कः? 'शुश्रूषस्व गुरून्' इति 'काव्येषु नाटकं रम्यम्' इति वा?

मधु०—अपरः।

शशि०—तत्र तु नाटकस्य नामापि न विद्यते। 'तत्र रम्या शकुन्तला' इत्यस्मिन् चरणे कथनानुसारेण शकुन्तला कदाचित् रम्या स्यात्, दुष्यन्तदृष्टया। किंतु शकुन्तला इति नाटकनायिकाया नाम, न नाटकस्य।

कौश०—कदाचित्केनापि पाणिनिसूत्रेण सिद्धं भवेत् 'शकुन्तला' इति नाटकस्य नाम। भाव! कथयतु भवान् तत्प्रमाणकं सूत्रम्।

प्राध्या०—[स्वगतम्] किं कर्तव्यमेषाम् उद्धतानां छात्राणां पुरतः?

कवेर्नाम न जानामि, सूत्रं व्याकरणस्य न।
नैकः श्लोकोऽपि कण्ठस्थः, किंतु प्राध्यापकोऽस्म्यहम्॥

भवतु एवं प्रतिपादयामि। [प्रकाशम्] साहित्यावसरे भो कौशलक! व्याकरणमाकृष्य किमर्थमानयसि? भो पुष्पक! कः श्लोकस्त्वया कथितः?

पुष्पकः—गुरो! शुश्रूषस्व गुरूनिति।

प्राध्या०—किं जानाति कश्चित्तं श्लोकम्?

शशि०—जानात्ययं जनः।

प्राध्या०—पठ तर्हि। [उच्चैः] शृणुत भोः।

शशि०—[मधुरस्वरेण पठति]

शुश्रूषस्व गुरून्, कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने, भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो, वामाः कुलस्याधयः॥

कौश०—[उच्चैः] पुनरेकवारं, पुनरेकवारम्।

प्राध्या०—[पुरः फलके मुष्टिमास्फाल्य]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मौनम् मौनम् । न यूयं रङ्गमञ्चसामाजिकाः । शृणुत । अनेन पद्येन शकुन्तला पतिगृहगमनसमये उपदिश्यते पितृतुल्येन कण्वमहर्षिणा । अत्रोपदिश्यन्ते पञ्च वृत्तयः । गुरुशूश्रूषावृत्तिः प्रथमा ।

पुष्पकः—किमस्माकं वर्गभगिन्य इव सा शन्कुतला आसीत् येन सा एवमुपदिष्टा कण्वेन । आश्रमवर्धितायै तस्यै एष उपदेशः पुनरुक्त इव निरर्थकश्च । नासीत् सा गुरुशुश्रूषणपरायणा इति किं न ध्वन्यते अनेनोपदेशेन ?

प्राध्या०—भोस्तर्ककर्कश ! कृतं भवतः तर्कशास्त्रेण । द्वितीय उपदेशविषयः महत्त्वपूर्णः । विवाहितया स्त्रिया सपत्नी सखीवत् मानयितव्या इति तस्य सारः ।

शशि०—गुरो ! कण्वदत्त एष उपदेश इति विस्मृत्य परमार्थत एव वक्तव्यं, किं भवान् मन्यते अस्मिन् विषये ।

मधु०—किमधुनैव भावेन न कथितं यदेष उपदेशो महत्त्वपूर्ण इति ? कमपि पुरुषं पृच्छ अस्मिन् विषये । एतमेवोपदेशं दास्यति स स्वभार्यायै । मधुकरवृत्तयस्तु सर्वे पुरुषाः स्वभावतः ।

प्रियं०—नाम्नोऽनुरूपमेव वदसि । कर्तव्यमेव मया अस्य मननम् ।

चन्द्र०—किंतु पृच्छ कामपि स्त्रियम् । किं द्वे असिलते एकस्मिन्नेव कोशे सुस्थाप्ये ? अस्वाभाविक एष उपदेशः ।

प्रियं०—भवान् कथयतु भवतो भावं भाव !

प्राध्या०—[आत्मगतम् ] उभयतःपाशा एषा रज्जुः । तस्मान्न मया किमपि वक्तव्यमस्मिन् विषये । [प्रकाशम् ] भोः कालिदासेन किं कथितमिति ज्ञातुं वयमत्राऽऽगच्छामः ।

[नेपथ्ये घण्टानादः]

[आत्मगतम् ] ननु उपकृतमेवानेन घण्टानादेन । [प्रकाशम् ] तस्मात्तेन यत्कथितं तस्य योग्यायोग्यविषया चर्चा अप्रासङ्गिकी । [इति

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुस्तकानि उपसंहृत्य खट्खट्कारं निष्क्रान्तः] [अन्येऽपि छात्रा निष्क्रान्ताः]

मधु०—प्रियंवदे, सायंसमयं मा विस्मर ।

प्रियं—न विस्मरिष्यामि यत्त्वया प्रतिपादितं तदपि । [एतावपि निष्क्रान्तौ]

नारदः—भोः कालिदास, दृष्टं त्वया कथं शाकुन्तलस्य अध्ययनं भवतीति ।

कालि०—सर्वमेव दृष्टं सुरर्षे ! एतं विश्वविद्यालयं तु पश्यामि सर्वतः दुष्यन्तशकुन्तलापूरितम् ।

नारदः—श्रुतं यत्कथं तवोपदेशः तन्तुशेषं विदारितः । तव सौभाग्यादध्ययनकालखण्डः शीघ्रमेव समाप्तः । अन्यथा न जाने किं किं श्रवणपथमागमिष्यत् इति ।

कालि०—किं मम तृतीयोपदेशः 'भर्तुः विप्रकृतया रोषो न कर्तव्यो भार्यया, तस्य प्रतीपं च न गन्तव्यम्' इत्यपि नारोचिष्यत ?

नारदः—अद्य भर्तुर्विप्रकृतत्वमेव नास्ति । भर्ता नैव शक्नोति विप्रकर्तुम् । या विप्रकरोति सा भार्यैव ।

कालि०—सत्यमेव अनेन दर्शनेन क्षीणाभिमानः संवृत्तोऽहम् ।

नारदः—अधुना तु बहु द्रष्टव्यं विद्यते । पश्चात् न केवलं क्षीणाभिमानः अपि तु विनष्टाभिमानः भविष्यसि । भाग्येषु अनुत्सेकिन्या न केवलया शाकुन्तलयैव भाव्यम् । अपि तु कालिदासमहोत्सवे स्वयं कालिदासेन गलितनष्टाभिमानेन अनुत्सेकिना भवितव्यमिति मन्ये । तदागच्छ । अग्रे किं द्रष्टव्यमित्यस्य विचारं कुर्वः ।

[निष्क्रान्ताबुभौ]

[यवनिका]

(इति द्वितीयोऽङ्कः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## अथ तृतीयोऽङ्कः

[ततः प्रविशति विचारमग्नः द्विचक्रवाहनं संचालयन् कश्चित्तरुणो नागरिकः । तथैव किंचित्परिक्रम्य, तस्मादुत्तीर्य च]

तरुणः—इदं सर्वज्ञभट्टाचार्यस्य श्रीमतः श्रीदासस्य सदनम् । तद्यावत्स वातसेवनार्थं न गच्छति तावदेव मया स द्रष्टव्यः ।

[अग्रे दृष्ट्वा]

अयं स स्वयमेव इत आगच्छति । मन्ये वातसेवनार्थं न, किं तु कार्यान्तरार्थं प्रस्थितः । तत् तस्यैव सहचरो भवामि ।

[ततः प्रविशति कज्जलवर्णः पृथूदरः आपादतलमस्तकं यन्त्रास्पृष्ट-प्रशस्तश्वेतवस्त्रसंवृताङ्गः नौसदृशीं श्वेतामेव 'गांधी'-शिरोवेष्टनीं धारयन् वेत्र-हस्तः सर्वज्ञभट्टाचार्यः श्रीदासः]

तरुणः—[तस्य संमुखीभूय] भट्टाचार्य महाशय! 'जय त्रिलोकि, जय त्रिलोकि' । अद्य वातसेवनसमये कुत्र अन्यत्र गम्यते?

भट्टाचार्यः—[स्वगतम्] अये कार्यकारणतत्परः मे सुहृत् चाटुवाक् नटवरः । [प्रकाशम्] नमस्ते, नमस्ते । क एष अभिनवः स्वागत-संबोधनप्रकारः?

नटवरः—एते संबोधनप्रकाराः एषु दिवसेषु अतिशीघ्रतया परिवर्तमानाः । 'अभिवादयेऽहं भोः' इत्यस्य प्राचीनप्रकारस्य स्थाने समत्वसूचकं एकवचनयुक्तं 'नमस्ते' इति प्रवृत्तम् । तस्यापि स्थानं देशप्रेमसूचकेन 'जय हिंद' इत्यनेन गृहीतम् । तदपि दूरीकृत्य आचार्य 'बाबा विनोबा' महोदयेन तत्स्थाने 'जय जगत्' इति संस्थापितम् । पदमेकमग्रतो गत्वा अनेन नटवरेण 'जगत्' शब्दस्थाने 'त्रिलोकी'शब्दः अभिषिक्तः । अत एव अधुना कथयामि 'जय त्रिलोकि' इति

भट्टाचार्यः—[विहस्य] भवतु भवतु । केन कारणेन अत्रागमनेन त्वया आत्मा सश्रमः कृतः?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नटवरः—इच्छामि द्वे निमन्त्रणपत्रे अद्यतनसमारोह-दर्शनाय ।

भट्टा०—किं विक्रमकीर्तिमन्दिरान्तर्गतकालिदासप्रेक्षागृहस्य उद्घाटन-समारोहे ?

नटवरः—अथ किम् ।

भट्टा०—अशक्यमेव तत् । यावन्ति अनुज्ञापत्राणि मुद्रापितानि, तानि सर्वाण्येव वितीर्णानि । नैकमपि शिष्यते । त्वया ह्यः किं न कथितम् ?

नट०—ह्यस्तु नैवासीदावश्यकता । कथयन्तु भवन्तः किंतु किमर्थं तस्य स्थानस्य 'नाट्यमण्डपः' इति नाम त्यक्त्वा 'प्रेक्षागृहम्' इति नाम निहितम् ?

भट्टा०—नाट्यगृहमित्युक्ते केवलं तत्र दर्शयिष्यमाणस्य नाटकस्यैव बोधो भवेत् । प्रेक्षागृहशब्दस्तु यद्यत् प्रेक्षकैः प्रेक्षणीयं, नाट्यं वा, नृत्तं वा, गानं वा, चलच्चित्रं वा, व्याख्यानं वा तस्य सर्वस्यैव समावेशे समर्थः । श्वः तत्र मालविकाग्निमित्रस्य एकः प्रवेशः, उर्वशीवियोगमत्तस्य पुरूरवसः पद्यानां गानं, हस्तिनापुरधीवरस्य नृत्यं, 'स्त्री' इति नाम्ना प्रथितस्य चलच्चित्रस्य प्रधानोंऽशः, 'कालिदासवर्णितं रघुराजस्य समुद्रयानं' इत्यस्मिन् विषये व्याख्यानं सर्वमेव अद्यतनादुद्घाटनादनन्तरं भविष्यति ।

नट०—अत एव निमन्त्रणप्राप्तिविषये मम निर्बन्धः ।

भट्टा०—प्रथमं तावत् कथय के ते सुरसुन्दर्यौ ये एवं त्वया अनुग्राह्ये ?

नट०—न ते केचित्सुन्दर्यौ ये स्वर्गपण्याङ्गनासमसौकुमार्ये मर्त्यलोक-परम्पृतिके, भवादृशां मानवेन्द्राणां सुकुमारं प्रहरणं, प्रत्यादेशः रूपगर्वितानां चलच्चित्रनटीनाम् अलंकारश्च अस्य नगरस्य भवितुमर्हतः । ते एवं स्यातां चेत्, जाने यत् भवतामयःसदृशमपि हृदयं तयोरर्थे द्रवीभवति, अज्ञात्वैव हस्ताद्भ्रष्टानि भवन्ति निमन्त्रणपत्राणि ।

भट्टा०—तर्हि कौ तौ महाभागौ ययोरर्थे एषः प्रयत्नः क्रियते ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नट०--एतौ द्वौ ह्य एव नवागतौ, अपरिचितौ अस्य देशस्य कालस्य वा। ह्यः अपराह्णे महतः संकरान्मुक्तोऽयं जनः।

भट्टा०—कथमिव ?

नट०—महाकालदर्शनार्थं नित्यमेवाहं गच्छामि अपराह्णकाले।

भट्टा०--किमर्थं न प्रातः, नापि मध्याह्ने, नचापि सायाह्ने ?

नट०--आचार्य भवद्भिरेव कथितं यत्—

प्रातः काले शिवं दृष्ट्वा निशापापं विनश्यति।
मध्याह्न आजन्मकृतं, सायाह्ने सप्तजन्मनाम् ॥

इति। मया तु पापमेव न क्रियते यद्विनाशाय शिवदर्शनं कर्तव्यम्। अथवा यदि क्रियते तर्हि तस्य विनाशं नेच्छामि। अत एव यस्मिन् काले शिवदर्शनेन अशिवं न नश्येत् तस्मिन्नेव काले महाकालमन्दिरं गच्छामि।

भट्टा०--भवतु, किंतु ह्यः किं वृत्तम् ?

नट०—महाकालं दृष्ट्वा, एतत् द्विचक्रवाहनमारुह्य, वेगं गृहीतवति एतस्मिन् पादाधाराभ्यां चरणौ दूरीकृत्य उपरि पुरतस्तौ संस्थाप्य स्वस्थचित्तेन मया स्वैरं मुक्तं मे वाहनम्।

भट्टा०—ततस्ततः।

नट०—ततो दूरादेव दृष्टौ मया तेजःपुञ्जशरीरौ द्वौ महाभागौ। तयोरेकेन अतित्वरया, मा मा इति कथयन्तमप्यपरं करेण दूरीकृत्य, मद्वाहनपुरतः द्वावपि करौ प्रसार्य, 'संस्थापय, संस्थापय' इति उच्चैः ब्रुवता स्थापितः स्वभव्यदेहः।

भट्टा०—ततः किं संजातम् ?

नट०—तत्क्षणमेव वाहनगतिं निरुध्य यावदहं वाहनासनादुत्प्लुत्य भूमौ पदं दास्यामि तावदेव तेन वाहनचक्रदण्डौ धृत्वा सभयदयाक्रान्तमनसा 'न व्यथितं किंचिदङ्गम्' इति अहं पृष्टः। मया तु तत्क्षणमेव ज्ञातं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यदयमदृष्टैतादृशवाहनः कश्चिद्ग्रामीणः पुरुष इति । किंतु किं जानन्ति भवन्तः कथं तौ अभिधीयेते इति ?

भट्टा०—कथमहं जाने ? कथय ।

नट०—एकस्तयोरात्मानं नारद इति कथयति । स तु महान् धूर्तः । अपरः किं तु सरलस्वभावः येनाहं संरुद्धः । तस्य नाम कालिदास इति । द्वावपि नारदकालिदासौ अतीवोत्सुकौ द्रष्टुमेतं समारम्भम् ।

भट्टा०—सत्यमेव न विद्यते मत्सकाशे एकमपि निमन्त्रणपत्रम् । अन्यथा कथं प्रत्यक्षमेव आगताय [विहस्य किंचित्] कालिदासाय तन्न दीयते ।

नट०—चिन्तयन्तु भवन्तः कांचित् प्रयुक्तिं येन तयोः मनोरथः सिद्ध्येत् ।

भट्टा०—[विचारं नाटयति ।] [प्रविश्य अपटीक्षेपेण]

पुरुषः—महामान्य ! एतत्पत्रं भवतां हस्ते समर्पयितुमहमादिष्टः । [इति तथा कृत्वा निष्क्रान्तः]

भट्टा०—[पत्रं बाचयित्वा] महाननर्थ आपतितः । [किंचिद्विचार्य] नटवर, किं तौ नवागतौ एकैकस्मिन् प्रवेशद्वारे स्थित्वा प्रवेशसंयमनं कर्तुं समर्थौ ? किंचित्कालमेव तत्कर्तव्यं प्रारम्भे । पश्चात् यदा रक्षिणः आगत्य तत्कार्यं स्वीकरिष्यन्ति, तदा तौ यत्र कुत्रापि स्थातुं समर्थौ भविष्यतः । एवं प्रेक्षागृहस्य यस्मिन् कस्मिन्नपि भागे स्थित्वा सर्वमेव तयोः दृष्टं श्रुतं च भविष्यति । किंतु प्रवेशनियमने ताभ्यां दृढव्यवहाराभ्यां भवितव्यं नाम ।

नट०—स्यादेवम् । यतिष्ये । सर्वमेतत् तौ अवबोधयितुं साधयाम्यहम् । भवन्तोऽपि च आत्मनः कार्यार्थं गच्छन्तु । [इति निष्क्रान्तौ]

(इति विष्कम्भकः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति दुःखितान्तःकरणः लज्जावनतवदनः द्वाररक्षकवेषः कालिदासः]

कालि०--कष्टं भोः कष्टम् ।

यस्मिन्नवन्तिनगरे नृपतेः सभायां
यन्नामसंस्मरणतः चकिताः सदस्याः ।
तत्रैव तस्य च महोत्सवसुप्रसंगे
जातः स एव विधिनानुचराद्धि हीनः ॥

भोः कालिदास, सर्वमेव आत्मनो माहात्म्यं विस्मृत्य स्थापय आत्मानं प्रवेशद्वारे, नियमय च प्रवेशमिच्छतः । [किंचिद्विचार्य] । किंतु कथं नु नारदेन नाद्याप्यागम्यते? [दृष्ट्वा] आगत एव स्मृतमात्रस्तत्रभवान् सुरर्षिः । [ततः प्रविशति द्वाररक्षकवेषः नारदः] भगवन् अभिवादये कालिदासः अहम् ।

नारदः--स्वस्ति । किंतु ध्यानं दत्वा चित्ते स्मर यत् न त्वं कालिदासः, नाहं च नारदः । ह्योऽपि त्वया एष एव प्रमादः कृतः । भाग्यात् तेन नटवरेण

परिहासविजल्पितं वचः
परमार्थेन न मानितं तव ।

आवामधुना द्वाररक्षकौ । त्वं जयः, अहं च विजयः । तच्छीघ्रमेहि । गच्छाव आवाम् । [इति परिक्रामतः] । [किंचित् परिक्रम्य] न त्वया मनसि खेदः कार्यः । यदि अस्माकं निजकर्तव्ये केचित्प्रमादाः भवेयुः, अन्ये तत्र आगत्य आवयोः स्थानग्रहणं करिष्यन्ति नौ च मोचयिष्यन्ति । 'क्षन्तव्यम्' इत्युक्त्वा आवां मुक्तौ भविष्यावः । 'क्षन्तव्यम्', 'अनुगृहीतः' इत्येतौ द्वौ शब्दौ अस्मिन् युगे सर्वार्थसिद्धिसाधकौ । न विस्मर्तव्यौ तौ ।

अस्मिन्युगे सुकर्तव्यं यथा मनसि रोचते ।
कोऽपि क्रुद्धो यदि भवेत् ब्रूयात् क्षन्तव्यमेव तत् ॥
अचिरादेव मुक्तौ भवावः दृश्यदर्शने श्रव्यश्रवणे च ।

[प्रविश्य अपटीक्षेपेण]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुरुषः—अहो जयविजयौ, किमत्र क्रियते ? ननु युवाभ्यां द्वाररक्षणं कर्तव्यम् ? कियत एव कालात् जनप्रवेशनमारब्धम् ।

नारदः—[करस्थघटिकायन्त्रं दृष्ट्वा] अये अधुना तु त्रीण्येव वादितानि । आवां तु स्वकार्यार्थं गन्तुमादिष्टौ सार्धत्रिवादनसमये । कथं जनैः प्रागेव प्रविश्यते ?

पुरुषः—राज्यान्तरमन्त्रिमहाभागाः उद्घाटनसमारोहार्थं निमन्त्रिताः ते तु मध्याह्ने एव आगताः पञ्चवादनसमये तैः कार्यान्तरार्थं गन्तव्यमेव । अतः अयमुद्घाटनसमारोहः मुहूर्तेन एकेन अपकृष्टः । सोऽधुना चतुर्वादन-काले एव भविष्यति । निमन्त्रणपत्रे लिखितात् समयात् प्राक् कथं निमन्त्रित-सज्जना आगमिष्यन्ति इति, मण्डपस्तु येन केन प्रकारेण पूर्णो भवितुमर्हति इति च विचार्य, ये केच पुरुषा रथ्यासु राजमार्गेषु च दृष्टाः तान् सर्वान् प्रवेश्य मण्डपस्तु पूर्णासनः कृतः प्रवेशपत्राण्यदृष्ट्वैव । अतः अधुना अस्माभिः केवलम् अस्मत्प्रमुखसंमुखं गत्वा, 'उपस्थिता वयम्' इति कथयित्वा, यत्र कुत्रचित् गन्तव्यं, यथेष्टं कर्तव्यं च । तर्हि अनुसरत माम् । उपस्थितिं निर्देश्य यथेष्टकरणे मुक्ता भवामः ।

[इति निष्क्रान्तः]

कालि०—अधुना किं कर्तव्यमावाभ्याम् ?

नारदः—अधुना तु आवयोः किमपि कर्तव्यमेव नास्ति । को लाभः उपस्थितिनिदर्शनेन आवयोः ? अस्मन्नामनी तु तत्र न विद्येते । तस्मात् अधुना आवाभ्यां द्वाररक्षणं परित्यज्य सामाजिककर्तव्यार्थं बद्धपरिकराभ्यामेव भवितव्यम् । [इतः ततः किंचित् परिक्रम्य] भवतु अस्मदर्थे रिक्ते आसने स्तो वा न वा इति पश्यामि । [चतुर्दिशं दृष्ट्वा] तत्र तु अग्रिमायामेव पङ्क्तौ विद्येते द्वे रिक्ते वेत्रासने । आगच्छ । तत्रैवोपविशावः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालि०—किंतु यदि निमन्त्रितपुरुषाः आगच्छन्ति, किमावयोर्निःसारणं न भवेत्?

नारदः—न । एकाकिनां पुरुषाणां कारणेन न कोऽपि अस्मान् उत्सारयिष्यति ।

कालि०—किंतु यदि तैः सह काश्चित् सुवसनाः स्वलंकृताः सुन्दर्य आगमिष्यन्ति तर्हि किं भविष्यति?

नारदः—एवंभूते अस्ति उत्थापनसंभावना । किं तु सापि अतिलघिष्ठा । ते रिक्ते आसने तु पङ्क्तेर्मध्यभागे स्थिते । अतः तत्र स्थितानाम् उत्थापनवारः प्रथमं नागमिष्यति । पूर्वं तु तेषामेव निष्कासनं भविष्यति यैः अन्तयोः स्थितानि आसनानि परिगृहीतानि ।

कालि०—तथापि न रोचते मे तत्रोपवेशनम् । आवां तत्रैवोपविशाव यत्र निःसारणस्य आशङ्कापि न भवेत् ।

नारदः—तर्हि किमर्थमत्रैव नास्यते?

कालि०—अस्मात् स्थानात् न किमपि द्रष्टुं श्रोतुं वा समर्थौ भविष्यावः ।

नारदः—किं तत्र विद्यते दर्शनीयम्? यो महाभागः उद्घाटनार्थं निमन्त्रितः ये चान्ये तत्र उच्चपीठे स्थिताः तेषां सर्वेषामेव विषये ।

शरीरसौष्ठवं नास्ति, सौन्दर्यं च न विद्यते ।
विशेषरहिता वेषा दृष्टिलाभो न कश्चन ॥

कालि०—किं तु किं श्रवणविषये?

नारदः—नैषा त्वत्कालीना पुराणी सभा यत्र वक्तुः शब्दाः समीपस्थैरेवाश्रूयन्त न दूरस्थितैः । इदानींतनेन ध्वनिक्षेपकेण यन्त्रेण प्रसारितान् शब्दान् यत्र कुत्रापि स्थितौ आवाम् श्रोतुं शक्नुवः ।

कालि०—तर्हि अत्रैवोपविशावः ।

[तथा कुरुतः]


CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[नेपथ्ये - हलो, हलो, एकः, द्वौ, त्रयः]

नारदः—शृणु । श्रूयते न वा ?

कालि०—सर्वं स्पष्टमेव श्रूयते । किंतु किमर्थमेषा अङ्कगणना ?

नारदः—नासौ अङ्कगणना । यन्त्रेण ध्वनिः सुष्ठु क्षिप्यते न वा इत्यस्यैषा परीक्षा ।

[नेपथ्ये—शृणुत भोः सद्भगिन्यः सद्बान्धवाश्च ! मन्त्रिमहोदयाः स्वस्थानादत्रागन्तुं निर्गताः । कतिभिश्चिदेव निमेषैः ते अत्र पदमर्पयिष्यन्ति । तस्मात्स्वस्थचित्तैः सर्वैः भवितव्यम् ।]

कालि०—[साश्चर्यम्] भगवन् । का नाम एषा विद्या यस्याः प्रभावात्सर्वमिदं गन्धर्वनगरमिव । ह्यस्त एव अहम् आश्चर्याभिभूतः । अङ्गुलिस्पर्शेनैव दीपाः प्रज्वालिता भवन्ति । अङ्गुलिस्पर्शेनैव निर्वाणं यान्ति । वद अत्र, शृणु तत्र कियत्यपि दूरे ।

नारदः—पदार्थविज्ञानमिति संज्ञया ज्ञायते एतत् शास्त्रम् । एष विज्ञानसूर्यः पश्चिमाया दिश उदितः । यदा वयं भारतीयाः पश्चिमदिशां पृष्ठतः कृत्वा पूर्वाभिमुखाः 'जगन्मिथ्या, जगन्मिथ्या' इति प्रवदन्त आस्म, एतैः पाश्चात्यपुरुषश्रेष्ठैः अस्य पदार्थविज्ञानशास्त्रस्य अभ्यासात् स्ववशीकृतानि सर्वाणि पञ्च महाभूतानि । [कर्णं दत्वा[ अये श्रूयते महान् करतलध्वनिः । तन्मन्ये तत्रभवन्तः मन्त्रिमहाभागा उद्घाटनार्थम् प्राप्ता इति । अधुना सावधानं शृणु ।

[नेपथ्ये शारदास्तवः श्रूयते]

[या कुन्देन्दुतुषारहारधवला, या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा, या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।]

कालि०—अथ अग्रे किम् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—मुख्याभ्यागताय सूत्रहारार्पणम् ।

कालि०—किमर्थं सूत्रहारः, न पुष्पहारः? किमत्र शुष्काणि सर्वाणि कुसुमानि येन तेषां हारो न क्रियते?

नारदः—कविवर, सत्यमेव ते स्मृतिभ्रंशः जात इति मन्ये । ह्य एव मया किं न वर्णितं सूत्रमाहात्म्यमाधुनिकम् । पश्य, पुष्पहाराः काभिश्चिदेव घटिकाभिः म्लाना निर्गन्धाश्च भवन्ति । किंतु सूत्रहारस्य शुष्कीभवनमशक्यमेव । मलिनीभूता अपि ते हाराः प्रक्षालिताः पुनः दुग्धधवला भविष्यन्ति । परं च वस्त्रवयनार्थमपि तेषामुपयोगः अस्ति एव । मन्त्रिमहोदयाः प्रतिदिनं पञ्चषेषु समारोहेषु गच्छन्त्येव । प्रतिसमारोहं पञ्च दश वा सूत्रहारान् ते प्राप्नुवन्ति । अनया गणनया तेषां सकाशे शतशः सूत्रहारा एकीभवन्ति । तान् विक्रीय वस्त्रव्ययः सुखेन लब्धुं शक्यः ।

कालि०—तर्हि किं सर्वाणि पुष्पाणि भगवत्पूजायामेव उपयुज्यन्ते?

नारदः—[स्मितं कृत्वा] न एकस्य भगवतः । किं तु बह्वीनां भगवतीनाम् । एता अधुना केशपाशान् भूषयन्ति सुमनोभिः । तेन तासां पुरतः स्थिताः पुरुषा यथा तासां मुखकमलदर्शनेन प्रीता भवन्ति, तथा पृष्ठतः स्थिताः पुरुषाः शिरोधारितपुष्पाणां घ्राणतर्पणेन सुगन्धेन तृप्ता भवन्ति । ताः सुन्दर्योऽपि मध्ये मध्ये ग्रीवां वलयित्वा पृष्ठतः पश्यन्ति येन द्वयोरपि पक्षयोः सौख्यविनिमयो भवति । भवतु एष करतलघोषः उद्घोषयति यत् स्वागताध्यक्षाः मन्त्रिपरिचयं कर्तुमुत्थिता इति । तस्मात् शृणुवः अधुना ।

[नेपथ्ये—'अयि सज्जनाः, अत्र उपस्थितानां श्रीमतां मन्त्रिमहाशयानां परिचयं भवतामग्रे कर्तुमहमादिष्टः । एते महाभागा अद्यतनैः प्रातर्वृत्तपत्रैः एवं प्रशंसिता यत्तेषां विषये एकमपि शब्दमधुना वक्तुमनावश्यकम्, अपरं च; नैष कालः दीर्घवक्तव्यस्य अपि तु प्राप्तकर्तव्यस्य । सूर्यनारायणं भगवन्तं दर्शयितुं दीपिकोपयोग इव मे भाषणं भविष्यति, इति

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मत्वा एषां गुणवर्णने नैकमपि शब्दमुच्चार्य, श्रीमतो मन्त्रिमहाभागान् अस्य प्रेक्षागृहस्य उद्घाटनं कर्तुं संप्रार्थ्य अहमासनपरिग्रहं करोमि ।]

[करतलघोषः ; अचिरादेव खण्डितः]

कालि०—[कर्णं दत्वा साश्चर्यम्] भगवन् कथमधुना न किमपि श्रूयते ?

नारदः—स्यात् ध्वनिक्षेपणे यन्त्रे काचिद्विकृतिः । दूरीभविष्यति सा शीघ्रमेव । [दूरं दृष्ट्वा] अये किमेतत् ? उत्थिताः सर्वे प्रेक्षकाः । मञ्चस्योपरि तु हस्ताहस्ति, दण्डादण्डि, किमेतद्दृश्यते, अपेत, अपेत न गच्छामः, अत्रैव स्थास्यामः, करग्राहं दूरीकुर्मः, बहिः प्रक्षेप्स्यामः इति कोऽयं कोलाहलः ?

कालदासः—किं जातं तत्र ?

नारदः—सम्यङ् न ज्ञायते ।

[प्रविश्य पटाक्षेपेण कश्चित्]

पुरुषः—उद्धूलिता सभा । आरक्षिभिः आक्रान्तो रङ्गमञ्चः । मन्त्रिमहोदयाः तेषामेव रक्षणे बहिर्नीताः । भवन्तावपि गच्छतमधुना ।

नारदः—अनारब्धा एव सभा केन कारणेन समाप्तिमगमत् ?

पुरुषः—आसन् केऽपि महाभागाः सभामण्डपे तस्मिन्, ये एषां मन्त्रिणां करकमलेन अस्य कालिदासस्य प्रेक्षागृहस्य उद्घाटनं न इष्टवन्तः । निश्चितसमयात् प्राक् प्रारब्धा सभा, अनिमन्त्रितैरेव क्षुद्रपुरुषैः आक्रान्तानि सर्वाणि आसनानि, निमन्त्रितास्तु स्थानाभावे क्रुद्धाः इत्येभ्यः सर्वेभ्यः कारणेभ्यः तैः खलु पुरुषैः बलात् विद्युत्प्रवाहं स्थगयित्वा, न वक्तव्यं, नेच्छामः श्रोतुमेकमपि शब्दमस्य, अनिष्टमस्य हस्तेन एतदुद्घाटनकर्म इति महता उद्घोषेण सह विसर्जिता सकला सभा । तत् गच्छत स्वस्थानं प्रति । अद्य अत्र न किंचिद्भविष्यति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[इति निष्क्रान्तः]

कालि०—[स्वगतम्]

मज्जन्मभूमौ मम जन्मनो दिने
मत्स्मारकार्थं च सभा नियोजिता ।
प्रेक्षागृहोद्घाटनहेतवे या
द्वे चापि भग्ने, कथमेष उत्सवः ? ॥

[प्रकाशम्] अस्ति किंचिदधुनापि प्रेक्षणीयम् ?

(पद्यम्)

अहं महाकविरिति चित्तेऽहम् अवहं यं गर्वम् ।
सर्वो गलितः स हि दुर्दैवात् विपरीतं सर्वम् ॥

करिष्यामि किं, पश्यामि च किम भ्रान्तः संजातः ।
मन्ये स्वर्गनिवासं त्यक्त्वा व्यर्थं चाऽऽयातः ॥

नारदः—कविवर, व्यर्थमेव दुःखं वहसि । मा दुःखितो भूः । पश्य

परिवर्तिनि संसारे परिवर्तो न चेद्भवेत् ।
अनवीनो जराजीर्णो भवेल्लोको मृतो यथा ॥

एतौ द्वौ जरठयुवानौ इत एवागच्छतः । तावेव पृच्छावः । किंतु प्रश्नात्पूर्वं वरं तयोः संलापश्रवणम् । अतस्तयोः मार्गात् किंचिदपसृत्य तिष्ठावः । [तथा कुरुतः]

[ततः प्रविशतः परस्परं संलपन्तौ पूर्वोक्तौ द्वौ पुरुषौ]

वृद्धः—कथय को लाभः सभोद्धूलनेन ?

तरुणः—महान् लाभः । अतः परं सति बहुमतविरोधे कतिचित् प्रभुत्वलोलुपाः हठात् स्वमतेनैव कार्यं कर्तुं न प्रभविष्यन्ति ।

वृद्धः—किंतु किमेतादृशेन कार्येण भवतां छात्राणां कालिदासविषये स्पष्टीभवति प्रीतिः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तरुणः—नेति वयं जानीम एव। किंतु किं पूर्णतः अपरिचित-कालिदासेन अज्ञातसंस्कृतेन केनचिदुद्घाटनकर्म कारयित्वा स्पष्टीभवेत् कालिदासप्रीतिः? बहुमतविरोधमनादृत्य यैरयं निमन्त्रितः तैरपि किं किंचिद्विचारितम्? अयं संस्कृतभाषाया एकमपि शब्दं न जानाति। बाल्यादेव अनेन वामलिपिः शिक्षिता। देवनागरीलिपिं न सम्यक् पठितुं नापि लिखितुं जानात्येषः। भवन्त एव कथयन्तु किमेतादृशस्य हस्तेन कालिदासप्रेक्षागृहस्य उद्घाटनं शोभनम्?

वृद्धः—'न पूर्णतः शोभनम्' इति तु मम मतमपि। किंतु अस्य महाभागस्य केन्द्रीयशासनप्रभावः भवता विस्मृतः। एकेनाप्यस्य शब्देन महान् धनलाभः अस्य कार्यस्य कृते भवितुं शक्यः। किं विद्याप्रभाव इव संपत्प्रभावोऽपि न विचारणीयः?

तरुणः—न कदाप्येतत् अस्मभ्यं कथितं स्वागताध्यक्षेण।

वृद्धः—न जानन्ति भवन्तस्तरुणाः छात्राः अपरिपक्वबुद्धयः वृद्धवचनं यत्।

मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत्।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते॥

इति।

तरुणः—दूरतोऽस्तु वचसा प्रकाशनम्। किंतु कथमपि तस्य सूचनं कर्तव्यमेवासीत्। भवतु निरस्ता एषा बहुमतविरोधिनी सभा। किं कर्तव्यमधुना इत्यस्य विचारः अस्मत्पक्षेण करणीयः।

वृद्धः—विनाशार्थं बद्धपरिकरा यूयं छात्राः न किंचिदपि विधायकं कार्यं कर्तुं समर्थाः।

नाशयितुमेव यूयं परकार्यं वित्थ न प्रसाधयितुम्।
पातयितुमेव शक्तिः नाखोरुद्धर्तुमत्र पिटम्॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तरुणः—अलमस्मानाखुसदृशान्मत्वा । सिंहस्यापि पाशान् छेत्तुं मूषका एव समर्था इति न विस्मरणीयम् ।

वृद्धः—अस्तु । किंतु न मे सभाभङ्गो रुचितः ।

तरुणः—अस्माभिः कृत एष सभाभङ्गो मान्यो भविष्यति सर्वेषाम्, ऋते भवद्विधेभ्यो जीर्णविचारेभ्यः । एतादृशस्य पुरुषस्य हस्तेन कालिदासप्रेक्षागृहोद्घाटनं न कस्यापि रुचये । किं बहुना । यदि स्वर्गात् कालिदासोऽपि अत्रागच्छति, सोऽपि एतत्सभाभङ्गार्थम् अस्माकं प्रशंसामेव करिष्यति ।

नारदः—[जनान्तिकं कालिदासं प्रति] अवसरोऽयम् अस्मान् प्रकाशयितुम् । [अग्रे भूत्वा] नमो भवद्भ्याम् । अयं मम सुहृत् कालिदासनामा । मां तु नारद इति कथयन्ति जनाः ।

वृद्धः—स्वागतं भवद्भ्याम् । [तरुणं प्रति] एष चिन्तित एव कुतोऽपि कोऽपि प्राप्तः कालिदासब्रुवः । एतमेव स्वर्गादागतं मत्वा पृच्छामि । [कालिदासं प्रति] भोः कालिदास! दृष्टा एव त्वया सभाया दुर्दशा इति मन्ये । कथय कथं मन्यसे?

कालि०—श्रुतो मया भवतोः संलापः । यदि उद्घाटकः सत्यमेव यथावर्णितः तर्हि अनुचितमेव तस्य हस्तेन उद्घाटनम् ।

तरुणः—[करतलध्वनिं कुर्वन्] साधु कालिदास साधु ।

वृद्धः—सत्यामपि तेन धनहानौ?

कालि०—अथकिम् । धनमेव सर्वेषु सुप्रधानमिति न मे कालिदासस्य मतम् । विदितेऽपि धनमाहात्म्ये येन केन प्रकारेण धनार्जनमप्रशस्तमेव ।

वृद्धः—किंतु किमनेन सभाभङ्गेन कालिदासमहोत्सव एव विरतो न स्यात्?

तरुणः—क एवं कथयति? छात्रपक्षस्य एषा सभा एव अमान्या आसीत् । प्रेक्षागृहस्य उद्घाटनं यस्य कस्यचित् करेण कारितत्वान्न कोऽपि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लाभः । तस्योद्घाटनं श्वो रात्रौ कालिदासस्यैव मालविकाग्निमित्रनाटकस्य एकप्रवेशदर्शनेन सुष्ठु भविष्यति । अधुना तस्यैव नेपथ्यादिव्यवस्थां कर्तुं मया गन्तव्यमेव । भोः कालिदास, समर्थितं भवता मन्मतम् । अतः सन्तुष्टोऽहं दास्यामि भवते द्वे प्रवेशपत्रे सुरक्षितोत्तमासने । रात्रौ अवश्यं तत्र आगन्तव्यं भवता, [स्मित्वा] अनेन नारदेन सह । वयं तरुणाः छात्राः कथं कालिदास-महोत्सवं सम्पादयामः, तदचिरेणैव प्रेक्षणीयं भवेत् । विसृज्येतामधुना इमौ जनौ तत्कार्यकरणाय । [इति निष्क्रान्तः वृद्धद्वितीयः]

नारदः—आगच्छ कालिदास । आवामपि तावत् इतस्ततः भ्रमणं कृत्वा, विश्रामं गृहीत्वा श्वः तन्नाट्यप्रवेशं द्रक्ष्यावः ।

[इति निष्क्रान्तौ]

(यवनिका)

(समाप्तः तृतीयोऽङ्कः)

## अथ चतुर्थोऽङ्कः

[ततः प्रविशति चिन्तामग्नस्तरुणः]

तरुणः—(आत्मगतम्)

एते छात्रा उद्धता नाशशीलाः
नैते शक्ताः शोभनं कर्म कर्तुम् ।
इत्येषा या प्रस्तुता लोकनिन्दा
मिथ्याकर्तुं तां कथं शक्नुयाम ॥

सर्वत्र श्रूयते उद्धताः छात्राः, उद्धताः छात्रा इति । किन्तु न कोऽपि विचारयति कस्मात् कारणात् ते उद्धता इति । किं ते स्वभावत एव एवम्?

[प्रविश्य]

अपरः—मित्र संयोजक, किमर्थम् एषा चिन्तामग्नता?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संयोजकः—शोभनक, न जानासि कथं सर्वत्र नगरे छात्राणां निन्दा क्रियते। सर्वत्र उद्घोषितं तैः संक्रुद्धैः सभासञ्चालकैः सडिण्डिमवादम्।

शोभ०—कथं न जाने। किंतु यदि कृत एव अस्माभिः सभाभङ्गः, तर्हि निन्दायाः कथं वयमात्मानं मोचयितुं शक्नुमः?

संयो०—किंतु किं सभाभङ्गो व्यर्थ एव कृतः?

येन केन प्रकारेण, समानीय यतः कुतः।
यं कं च, कार्यं चेत्कर्म, यद्वा तद्वा भवेत्खलु॥

शोभनक! अस्माकं सभोद्धूलनेन इतरे अत्रत्या जनाः निन्दां कुर्वन्तु, किंतु अन्यत आगतेन कालिदासेन तदस्माकं कृत्यं संमानितमेव।

शोभ०—किं यं पुरुषमधिकृत्य त्वया कथितं स परमार्थत एव कालिदासः इति मन्यसे?

संयो०—न जाने सत्यं न वा। किंतु यत् तेन नारदब्रुवेण कथितं तत्तु सत्यमेव विचारणीयम्।

शोभ०—किमुक्तं [विहस्य] तेन सुरर्षिणा?

संयो०—परिहासो न कर्तव्यः। प्रथमं सत्यमेव किं तौ नारद-कालिदासौ इति कल्पना मयापि हास्यतां नीता। किं तु यदा तयोः निवास-स्थले नरवरगृहे तयोः परस्परसंलापः मम श्रोत्रयोः पतितः, तदा स संशयः शिथिलतां गतः। तदा तु तौ न कोऽपि शृणोति इति मत्वा स्वैरमालपन्तौ आस्ताम्। तस्मिन्संभाषणे स्वर्गस्य, तथा स्वर्गाधीशस्य इन्द्रस्य, उर्वश्याः च उल्लेखात् शिथिलीभूतः स संशयः गलितप्राय एव जातः। पश्चाद्यदाहं तयोः संमुखं गतः, आश्चर्यचकिताभ्यां ताभ्यां परिवर्तित एव स्वसंभाषण-विषयः। तेन मम संशयः लुप्त इव संप्रति।

शोभ०—किं त्वया किंचित् भाषितं तत्र?

संयो०—आम्। नारदनामानं पुरुषमहं कथितवान् छात्रनिन्दाविषये।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शोभ०—किं तेन तदा उक्तम्?

संयो०—सोऽब्रवीत्, न त्वया चिन्ता कार्या।

कार्यं कार्यं कार्यकाले, क्रीडाकाले च खेलनम्।
दर्शितव्यः शुभाचारः रात्रावद्य समुत्सवे॥

तस्मिन्नेव काले रथ्यायां तारस्वरेण कोऽप्युदघोषयत् यत्—

एते छात्राः श्वानसमाः खाद्यखण्डविलोलिताः।
क्षणाद्भूत्कृत्य सन्दंशः क्षणाल्लाङ्गूलचालनम्॥

शोभ०—किं ताभ्यामपि श्रुतं तत्?

संयो०—अथकिम्। किंतु लज्जावनतवदनं मां वीक्ष्य तयोः कालिदासनामधारिणो महाभागस्य मुखात् ये शब्दा निःसृताः, तान् श्रुत्वा अहं जडीभूतो विस्मयेन, उल्लसितश्च आनन्देन।

शोभ०—कथय कथय के ते शब्दाः?

संयो०—सोऽब्रवीत्। समानदर्शी महाभागोऽयं, येन युवानः छात्राः श्वानसमतां नीताः। पश्य,

युवा तथा श्वा मघवा तथैव
समानशीलाः परिहासकाले।
अतो मुनिः पाणिनिरेकसूत्रे
श्वानं युवानं मघवानमाह॥

शोभ०—अहो बलवती कल्पना। प्रतिभायाः कियत् उच्चैरुत्प्रेक्षणम्। ततस्ततः।

संयो०—ततो विनोदेन अपनोदितचिन्तस्य मम मुखे स्मितरेखां प्रेक्ष्य तेनाग्रे कथितम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सूत्रे युवा सुग्रथितो हि मध्ये
श्वा चैकपार्श्वे मघवा परस्मिन् ।
युवा भवेत् श्वा यदि विप्रकारितः
सन्मार्गनीतस्तु समं मघोनः ॥

तस्मात् यदि यूयं सर्वे युवानः प्रेक्षागृहमहोत्सवे शोभनं व्यवहरथ, तर्हि अहमेव छात्राणां पक्षं गृहीत्वा सर्वेषां चेतसि तरुणविद्यार्थिवर्यमाहात्म्यं संस्थापयिष्ये इति । एवमुक्तवति कालिदासे स नारदः मध्ये एवाब्रवीत् । 'अयं कः तत्संस्थापने । युष्माकं व्यवहारः अनुशासनबद्धश्चेत् स्वयमेव स तत् समर्थयिष्यति' इत्युक्त्वा उभावपि तौ तूष्णीमासतुः । तेन मन्मनसि निश्चय एव समुत्पन्नः यत् एतौ सत्यमेव नारदकालिदासौ स्वापह्नवमिच्छन्तौ इति ।

शोभ०—तर्हि न विद्यते किमपि कारणं चिन्तामग्नतायाः । स्वयं कालिदासेन उद्धृतपक्षैः अस्माभिः विद्यार्थिविद्यार्थिनीभिः एवं वर्तितव्यं यत् न कोऽपि अस्मान् प्रति अङ्गुलिनिदर्शनं करिष्यति । एतां वार्तां सर्वस्मिन्विद्यार्थिसंघे प्रसारयिष्यामि । मा कुरु चिन्ताम् । त्वयि संयोजके न किमपि अशोभनं भविष्यति ।

संयो०—शोभनक !

छात्रसंघः सिन्धुसमः शान्तः स्यात् क्षोभितो न चेत् ।
यदि क्षुब्धो गिरीणां च ग्रासं कर्तुमपि क्षमः ॥

मा प्रसारय एतां वार्ताम् । किंतु [कर्णे कथयति] एवं कुरु । गच्छ कार्यसिद्धयै । अहमपि आत्मनो नियोगमशून्यं करोमि । [इति निष्क्रान्तौ]

(इति विष्कम्भकः)

[ यवनिकायां दूरीकृतायां दृश्यते प्रेक्षागृहम् ]

[श्रूयते च]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥

[ततः प्रविशति पुष्पाणि विकिरन्ती]

सूत्रधारिणी—

(पद्यम्)

जानीत हि मां सर्वे सूत्रधारिणीम् ।
सर्वेषां छात्राणां कार्यकारिणीम् ॥ ध्रु. ॥

ह्यः सर्वैर्युष्माभिः कार्यभञ्जनम्
दृष्टम्, अद्य पश्यतात्र चित्तरञ्जनम् ।
मालविकाया गानं रुचिरनर्तनम्
प्रार्चयामि वाग्देवीं विघ्नवारिणीम् ॥ १ ॥

[पुष्पाणि विकिरति]

[आकाशं प्रेक्ष्य, विचिन्त्य च] भ्रातरं सुबन्धुमाहूय पृच्छामि एतत्कार्यं न वेति । [नेपथ्याभिमुखी] सुबन्धो ! क्षणमात्रमत्रागच्छ ।

सुबन्धुः—[प्रविश्य] आर्ये किमर्थमहमाहूतः ? किं नाटकारम्भे 'सूत्रधारः नटीं वा पारिपार्श्वकं वा आहूय संलापं करोति' इति नाट्यशास्त्र-नियममेव पालयितुं त्वया सूत्रधारिण्या अहमाहूतः ।

सूत्र०—नहि नहि । एतां परिषदं दृष्ट्वा मे मनसि काचिदभिनव-कल्पना प्रादुर्भूता । तस्याः विषये त्वन्मतं ज्ञातुं तवाह्वानम् ।

सुबन्धुः—कथय का सा कल्पनेति ।

सूत्र०—सुबन्धो, याभ्यां महाभागाभ्याम् अस्माकं छात्राणां हतोत्साहे मनसि संचारित उत्साहः, तौ अत्र अस्मत्प्रयोगं द्रष्टुं बहुमानपूर्वकं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सामाजिकेषु उपवेशितौ। किंतु न स तयोः पर्याप्तः सत्कार इति मन्ये। कथय कथं भवेत् यदि तयोरेव एकस्मै प्राश्निकपदं समर्पितं स्यात्?

सुबन्धुः—को विशेषः? तथा कथिताः प्राश्निकाः बहुधा अक्षिपिधानपूर्वकं विचारमग्ना इति प्रदर्श्य सुखेन निद्रासुखमनुभवन्ति, प्रयोगान्ते च यत्किंच कथयन्ति। तथैव कर्तुं किमेष आरम्भः?

सूत्र०—न। मत्कल्पनाया एतदभिनवत्वं यत् प्राश्निकेन रङ्गमञ्चे एव स्थित्वा मध्येमध्ये स्वमतं गुणदोषप्रदर्शनपूर्वकं प्रदर्शितव्यम्।

सुबन्धुः—तेन शोभनं भवेत्। एवं कृते प्रयोगे अन्तरालोऽपि न भवेत्। प्रयोगस्य दीर्घकालवर्तित्वेऽपि प्रेक्षकैः श्रान्तमनोभिरपि न भवितव्यम्। रोचते मे एषा कल्पना।

सूत्र०—तर्हि प्रार्थयेऽहम्।

सुबन्धुः—गच्छाग्रतः। अहमपि प्रयोगे न किंचिदपि हीयेत इति द्रष्टुं साधयामि।

[इति निष्क्रान्तः]

सूत्र०—[सामाजिकेषु स्थितौ नारदकालिदासौ प्रति] हे भगवन्तौ, श्रुतं मया यत् नारदकालिदासयोः

एको भगवद्भक्तः गानपटुः चाटुकृतककलहरतः।
अन्यः कवितासक्तः प्रतिभाशीलः स्वकौमुदीधवलः॥

तन्नामधारिणोः नारदेन नाम्ना गानप्रधाने अद्यतने प्रयोगे परीक्षकपदं सुभूषितव्यमिति सर्वेषामेवास्माकं प्रयोगकर्तॄणां प्रार्थना। तस्मात्तेन अत्र आगत्य प्रदर्शयिष्यमाणस्य मालविकानृत्यस्य प्रस्तावना कर्तव्या।

नारदः—[प्रविश्य] भद्रे! किंनाम्ना एव युष्माभिः कृत एष सत्कारः। एवं चेत् शृणु—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नाम्ना लक्ष्मीर् गोमयं संचिनोति
भिक्षासक्तो योऽस्ति नाम्ना कुबेरः ।
मृत्युं प्राप्तः कथ्यते योऽमरेशः
लोके नाम्नो वर्तते नो महत्त्वम् ॥

सूत्र०—भगवन् अलमन्यथा गृहीत्वा ।

मन्यामहे वयं वां तौ बिभृथो नामनी ययोः ।
आदरेण च पश्यामः तन्न कार्या विचारणा ॥

नारदः—भवतु का गतिः ?

राज्ञां स्त्रीणां च पालानां निर्बन्धः पाल्य एव हि ।
अन्यथा क्रमतो दण्डो, रोषो, रोदनमन्ततः ॥

भद्रे अनया युक्त्या सूत्रधारकर्तव्ये प्रस्तावनारूपे सूत्रधारिण्या त्वया सम्यङ् नियुक्तः अयं जनः । परमार्थीकृतं च कालिदासवचनं यत् 'निसर्गनिपुणाः स्त्रियः' इति ।

सूत्र०—भगवन् ! नैत्रैतत् । अहं तु मन्ये यत्

यो लोकत्रितये सदैव चलति स्थाल्यां यथा पारदः
यो लग्नः परमेश्वरे, भवजले लोकस्य यः पारदः ।
यो वर्णेन विराजते भुवि सदा चन्द्रो यथा शारदः
सोऽत्रैवैष विराजते मम पुरः साक्षाद्भवान् नारदः ॥

यदि एवंभूतो भवान् नः छात्राणां संकटसमये पारदो न भवेत्, कं वान्यं वयं शरणं व्रजामः ? अतः किं बहुनोक्तेन । करोतु भगवान् प्रस्तावनाम् अहमेकस्मिन्कोणे स्थिता श्रोष्यामि ।

नारदः—अयि भोः सामाजिकाः, दृष्टमेव भवद्भिः कथमहं सूत्रधारिण्या अनया काष्ठपुत्तलक इव नर्तितः । किंतु यदि सत्यमेवाहं नारदनामा,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तर्हि एतां सूत्रधारिणीमपि कंचित्कालं नर्तयिष्ये । अयि सूत्रधारिणि, यद्यधुना सूत्रधारोऽहं, त्वं तावद्विदूषिका भव ।

सूत्र०—कथं विदूषिका भवामि, भाव?

नारदः—एवं वर्तते विदूषकस्य लक्षणं नाट्यशास्त्रे । 'विकृताङ्गवचोवेषैर्हास्यकारी विदूषकः' इति । तर्हि त्वमपि कुब्जेव तिष्ठ, वक्राङ्गभङ्गस्थापनार्थं दण्डमेकं करे गृहाण, मध्ये मध्ये हास्योत्पादनार्थं वद च किंचित् । [सूत्रधारिणी निष्क्रान्ता] सभ्याः! अचिरेणैव कालेन एका रूपवती सुन्दरी, भवतां पुरः आगमिष्यति ।

सूत्र०—[यथानिर्दिष्टं प्रविश्य] एषाहमागता । किं कर्तव्यं मयाधुना?

[सामाजिकेषु हास्यध्वनिः]

नारदः—सज्जनाः! नैषा सा सुन्दरी । इयं तु विदूषिका । [तां प्रति] विदूषिके! त्वया न किंचित् कर्तव्यम् । कोणे स्थातव्यमेव । [सा तथा करोति] सभ्याः! दूरीकृते पटे कस्याश्चिदवगुण्ठनवत्याः सुन्दर्याः दर्शनं प्रथमं भविष्यति । शनैः शनैः तदवगुण्ठनं यास्यत्यधोऽधः । यथा यथा तदवगुण्ठनं दूरीभविष्यति, तथा तथा तस्याः सौन्दर्यं वर्णयिष्यामि । तद्भवद्भिः अनिमेषलोचनं द्रष्टव्यम् ।

विदूषिका—[उपसृत्य] भाव! का सा? किञ्च सा अहमिव रूपे?

नारदः—त्वं तु सुन्दरी आसीः । किंतु अनेन वेषेण न सुन्दरी, अपि तु वानरी । तिष्ठ स्वकोणे । [इति तां निजकोणे प्रेषयति]

[ततः प्रविशति काचिदवगुण्ठनवती युवती । यथा यथा अवगुण्ठनमपसरति तथा तथा नारदो वर्णयति]

दीर्घाक्षं शरदिन्दुकान्ति वदनम् बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितोऽमितं च जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सभ्याः, इयं कालिदासस्य मालविका। अधुना सा शर्मिष्ठायाः कृतिमभिनेष्यति।

विदू० [किञ्चिदुपसृत्य] भाव, केयं शर्मिष्ठा? नक्षत्रनामसु धनिष्ठा तु श्रुता। इदं नाम तु अश्रुतपूर्वम्।

नारदः—[सरोषम्] दूरमपसर। शर्मिष्ठा तु वृषपर्वणः सुता देवयान्याः सपत्नी।

विदू०—सर्वमेवेदं वेदाक्षरसमं दुर्बोधम्। को नाम मघवा इति पृष्टे बिडौजाः स इतिवत्। भवतु आत्मनो मूढताया आच्छादनार्थं वरं तूष्णीमेव स्थातव्यम्। [इति स्वगतमुक्त्वा आत्मनः कोणस्थानं गृह्णाति]

नारदः—प्रथमं तावदेव स्थिरीभूय उपगानं कर्तव्यम्।

विदूषिका—[आत्मगतम्]

उपवक्ता मया ज्ञातः उपाध्यक्षश्च मे श्रुतः।
उपगानं हि किं नाम, न ज्ञातं न च मे श्रुतम्॥
पृच्छामि चेद् गमिष्यामि सर्वेषामुपहास्यताम्।
तस्माद्वरं मौनमेव, प्रष्टव्यं नैव किंचन॥

नारदः—उपगानं नाम अर्थोपकारकैः शब्दैर्विना केवलं स्वरमालिकाया आलापग्रहणम्। मालविके आरभस्व।

मालविका—

धऽपम रेऽसाऽनिसा सारेपऽम

गम पऽपऽधधध पध निऽसांरें निसां।

नारदः—सभ्याः! योगिन्या नाम रागिण्या इयं स्वरमाला। आर्ये अधुना 'खमाज' रागेण उपगाय द्वितीयं चरणम्।

मालविका—

निनिऽसांऽनिसां निधमध निधपऽऽऽ

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गऽम पध निसां निधपगमगऽऽऽ

नारदः—किं श्रुतं भवद्भिः ऋषभहीनम् एतदुपगानम्? तृतीयं चरणमतः अवधारयत रागे 'बहार' - संज्ञके। कथय बाले!

माल०—

धनि सांरें निसां धनि सांऽऽऽ

मप गम निध निनि सांऽऽऽ

नारदः—सुष्ठु, अथ अन्ततः पुनरागच्छ योगिनीं नाम रागिणीम्।

माल०—

सां (सां) विधऽऽम म(म)रेऽसाऽ

सारेमऽमऽ, पधनिऽसां रें निसांऽ

नारदः—साधु मालविके, साधु उपगीतम्।

विदू०—भाव! कोणेऽस्मिन् स्थित्वैव पृच्छामि, को लाभः निरर्थकैः स्वराणामारोहावरोहैः?

नारदः—अहमपि अत्रैव स्थित्वा ते उत्तरं दास्यामि। अनेन स्वरालापेन रागज्ञानं भवति। अर्थज्ञानं वाञ्छसि चेत् शृणु तत्काव्यम्। मालविके! पठ काव्यं गानानुकूलम्।

माल०—[गायति]

दुर्लभः प्रियो मे तस्मिन् भव हृदय निराशम्।
अहो मे स्फुरति कथमयमपाङ्गको वामः॥

एष स चिरदृष्टः कथमुपनेतव्यः?
नाथ! मां पराधीनां त्वयि गणय सतृष्णाम्॥



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—पद्येऽस्मिन् कालिदासेन रत्याख्ये स्थायिभावे चत्वारो व्यभिचारभावा वर्णिताः। प्रथमे चरणे तावन्नैराश्यम्। द्वितीये सविस्मया उत्कण्ठा। तृतीये हर्षयुक्ता चिन्ता। चतुर्थे तु दैन्यम्। एतेषां भावान् नाट्येन प्रदर्शनमतिकठिनं विशेषतः क्रमेण अनेन इति कालिदासेनैव एतन्नाट्यं प्रति 'दुष्प्रयोज्यम्' इति कथितम्।

विदू०—किंतु किमर्थमेते भावाः?

नारदः—शृणु स्वामिन्या देवयान्याः पतिः ययातिः। तस्मिन् मनो लग्नं शर्मिष्ठायाः। किं तु तत्प्राप्तेराशापि न इति नैराश्यम्।

विदू०—ततः किं हर्षस्य कारणम्?

नारदः—तस्मिन्नेव काले तस्या वामाक्षिस्पन्दनं जातम्। महिलानां वामाक्षिस्फुरणं शुभम्, किंतु कथं तन्मे भवेदिति सविस्मया उत्कण्ठा। सा उत्कण्ठया इतस्ततः पश्यति। अत्रान्तरे तया दृष्टो दूरस्थितः ययातिः। दृष्ट इति हर्षः। कथमुपनेतव्यः इति चिन्ता। उपनीते सति दैन्यप्रदर्शन-पूर्विका तस्य प्रार्थना। सुन्दरि,

विदू०—किमियं वानरी सुन्दरी जाता?

नारदः—न त्वां सम्बोधयामि। अपेहि। मा कुरु पुनः पुनः प्रत्यवायम्।

[विदूषिका अपैति]

[मालविकां प्रति] सुन्दरि! प्रदर्शय अभिनयम्। सभ्याः! पश्यत कथं नैराश्यं सूच्यते। नेत्रे तेजोहीने, मुखं विवर्णं, हस्तपादौ शिथिलौ। मुखेन कथयति।

माल०—दुर्लभः प्रियो मे, तस्मिन् भव हृदय निराशम्। [अक्षिस्पन्दनं सूचयति]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—अयि भोः दृष्टं किं, कथमनया वामाक्षिस्पन्दनं सूचितम् इति। साधु मालविके। सज्जनाः! पश्यत कथं नेत्रे विस्फारिते, कथं च ते ऊर्ध्व-गामिनी, कथं चकितचकिता नेत्रे किंचित् संकोच्य तयोरुपरि हस्तं धृत्वा इतस्ततः पश्यति चिन्तयति च। एवं विस्मयावहा सूच्यते उत्कण्ठा। शब्दाः मुखाद्बहिरागच्छन्ति।

माल०—अहो मे स्फुरति कथमयमपाङ्गको वामः।

नारदः—अये किमनया दृष्टं येन गल्लौ अकस्मात्फुल्लौ जातौ, ओष्ठौ च किंचिद्विवृतौ। मुखमपि सतेजस्कं भूतम्। आम्। दर्शनपथमागतः ययातिः। अत एव हर्षः।

माल०—एष स चिरदृष्टः, एष स चिरदृष्टः।

नारदः—किंतु।

माल०—कथमुपनेतव्यः, कथमुपनेतव्यः?

नारदः—इयं चिन्ता। चिन्तायां लक्षयत कथं ललाटे रेखाः, कथ-मक्षिसङ्कोचः, कथं शरीरस्य स्थिरीकरणम्। अन्ते स समीपमागतः। ततः शृणुत दीनवचनम्।

माल०—नाथ! मां पराधीनां त्वयि गणय सतृष्णाम्।

नारदः—शोभनं मालविके शोभनम्। सुष्ठु गीतमभिनीतं च। अथ भारतीयनाट्यानुसारेण नृत्यं प्रदर्शय।

[मालविका - तथा नृत्यं कृत्वा निष्क्रान्ता]

विदू०—भगवन्, भग्नप्रायाणि मे गात्राणि।

[वक्रीभूय स्थित्वा] तदधुना न शक्नोमि एवं स्थातुम्।

नारदः—तर्हि क्षिप तं दण्डम्। गात्राणि सरलानि कुरु। [सा तथा करोति] अधुना न त्वं विदूषिका अपि तु सूत्रधारिणी। छिन्नं सूत्रं पुनः संधेहि। अहं स्वस्थानं गच्छामि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुबन्धुः—[प्रविश्य] महदुपकृतं भवता। अस्माभिः प्रदर्शिते प्रयोगे तेषुतेषु स्थानेषु विवरणं कृत्वा सामाजिकानां चित्तं सुष्ठु आकृष्टम् अस्माकं भगिन्या मालविकारूपायाः कलाकौशलविषये। अतः सर्वेषां सामाजिकानां छात्राणां च मतेन भवद्भ्यो धन्यवादं हृदयेन दास्यामि।

नारदः—अनुगृहीतोऽस्मि।

सु०—अन्या च विद्यते काचित् विज्ञप्तिः।

नारदः—कथय।

सु०—अत्रभवता अस्मत्साहाय्यं सम्यक्कृतम्। तत्रभवता कालिदासेनापि किंचित् कर्तव्यमिति मनीषा सर्वेषाम्। तस्मात् श्वः अस्मिन्नेव समये तेनात्र व्याख्यानं दातव्यम्। दृढं विश्वसिमि यत् भगवता निर्बन्धकथितः कालिदासः अस्माकं विज्ञापनाममान्यां न करिष्यति, इति। अतः अत्रैव व्याख्यानघोषणां करोमि। अयि सभ्याः [इत्यर्धोक्ते]

नारदः—मा एवं क्षिप्रकारी भव।

सु०—नाहं दीर्घसूत्री। सूत्रधारिणीहस्ते यत् सूत्रं तदपि लघुलघु। तस्माद्विचारार्थम् अवसरमेव न दास्ये। [पुनः] अयि सभ्याः! समाप्तः एषोऽद्यतनः प्रयोगः। अधुना

यान्तु सभ्यगणाः सर्वे तुष्टा अस्मत्प्रयोगतः।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च॥

श्वः अस्मिन्नेव स्थाने अस्मिन्नेव समये कालिदासमहोत्सवः कथं कर्तव्यः इत्यस्मिन् विषये स्वयमेव कालिदासस्य व्याख्यानं भविष्यति। तस्मात् सर्वैश्च भवद्भिः निजसुहृद्भिरन्यैः सह अत्र आगन्तव्यम्, आगन्तव्यम्, आगन्तव्यम्।

[इति निष्क्रान्ताः सर्वे]

(यवनिका)

(इति चतुर्थोऽङ्कः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## अथ पञ्चमोऽङ्कः

[ततः प्रविशति सुबन्धुः]

सुबन्धुः—नेतृब्रुवाणां विघटय्य कार्यं
मूकीकृताः छात्रविनिन्दका ये ।
महोत्सवे मालविकाप्रयोगः
संपादितः सर्वसुखावहश्च ॥

अथ अद्य सुसंपन्ने कालिदासव्याख्याने सर्वमेव भविष्यति सुसमाप्तम् । तत्प्रथमं तावत् सूत्रधारिणीं भगिनीमाहूय प्रष्टव्यमेव सर्वसिद्धता जाता न वेति । भगिनि सूत्रधारिणि,

सूत्रधारिणी— (प्रविश्य) सुबन्धो किमर्थमहमाहूता ?

सु०—व्याख्यानसिद्धताविषये प्रष्टुम् ।

सू०—सर्वमेव सुसज्जम् । सभास्थानं श्रोतृभिः पूर्णप्रायमेव । अल्पान्येव स्थानानि रिक्तानि । मन्ये निश्चितवेलायाः प्राक् तानि अपि अशून्यानि भविष्यन्ति । कस्मिन्नपि विषये न कार्या चिन्ता । किंतु सुबन्धो! कथय कोऽद्य अध्यक्षपदमलंकरिष्यति ?

सु०—न कोऽपि । अनध्यक्षैव सभा अद्यतना ।

सू०—किमर्थम् ?

सु०—अध्यक्षेण व्याख्यातुरपेक्षया विद्वत्तरेण भाव्यम् । न पश्यामि कंचिदेवं कालिदासाद्विद्वत्तरम् । अतः अनध्यक्षमेव व्याख्यानमद्य ।

सू०—कुत्रकुत्रचित् व्याख्यातुः समकक्षः किंचिदूनोऽपि भूषयत्येव अध्यक्षपदम् ।

सु०—तदेव भवति अनर्थावहम् । पश्य

अध्यक्षो यः पण्डितं मन्यते स्वं
व्याख्यानान्ते किंचिदेष ब्रवीति ।
व्याख्यानार्थः तेन चेत् खण्डितः स्यात्
सर्वो भूयात् कज्जलेनावलिप्तः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न विद्यते अवसरः व्याख्यातुस्तन्निराकरणाय । अतः श्रोतॄणां चित्ते तदेव तिष्ठति यदध्यक्षेण अन्ते प्रतिपादितम् । सुन्दरे चित्रे कज्जललेपनमिव भवति तत् । अद्य अतो न कोऽपि अध्यक्षः, न कश्चिदुपवक्ता । केवलं व्याख्यानमेव । भवतु, गच्छ, पश्य च सर्वमहीनमिति । अहमपि व्याख्यातारं मञ्चं प्रापयितुं गच्छामि । [निष्क्रान्तौ उभौ]

(इति विष्कम्भकः ।)

[नेपथ्ये श्रूयते 'नारायण' 'नारायण' इति सतन्त्रीरवः सकरतालनादः ध्वनिः]

[ततः प्रविशति ऊर्ध्वशिखः, त्रिपुण्ड्रधारकः, यज्ञोपवीती, सोत्तरीयः, वल्लकीस्कन्धः, करकरतालः, पीताम्बरः, सपादुकः, नारदः कालिदासद्वितीयः]

नारदः—सभ्याः ! ह्यः अहमासम् नारदब्रुवः । सर्वैर्युष्माभिः नारद इति संमानितः । अतः मया चिन्तितं किमर्थमद्याहं भवतां पुरतः नारदवेषेण एव नाऽऽगमिष्यामीति । अत एव मया धृतोऽयं वेषः नारदस्य युष्मत्परिचितः । अयं मे प्रियसुहृत् कालिदासनामा स्वभावादेव कातरः, स्वप्रौढिपराङ्मुखः प्रमादेनापि स्ववर्णनमकुर्वाणः भवद्भिः सर्वैः व्याख्यातेति वृतः । सोऽत्र मया हस्तग्राहमानीतः । पश्यत पश्यत इमं व्याख्यातारम् ।

[कालिदासः सत्रपः अधोवदनः]

[जनान्तिकम्] मित्र कालिदास, नववधूरिव मा लज्जस्व । पर्यवस्थापय आत्मानं यावदहं श्रोतॄणां चित्तं स्थिरीकर्तुं यते । [प्रकाशम्] भो भोः समागताः सभ्याः श्रोतारः ! नवीनां सरणिमनुसृत्य प्रथमं तावत् मौन-प्रार्थना कर्तव्या । आरम्भे अहं ॐ इति अक्षरमुच्चार्य विलम्बितमुच्चैः कृत्वा शनैः शनैः तं स्वरं नीचैः करिष्यामि, अन्ते च मौनं धारयिष्यामि । मौनं धरति मयि सर्वे दीपाः निर्वाणं यास्यन्ति । निमिषद्वयपर्यन्तं तस्मिन्नेवान्धकारे सर्वैः मौनमाश्रित्य, स्वचित्तं स्थिरीकृत्य स्वस्वदेवताध्यानं कर्तव्यम् । सद्विचारार्थं च प्रार्थना कर्तव्या । निमिषद्वयावसाने पुनरपि ॐ इति नीचीनात्स्वरादारभ्य शनैः शनैः तं स्वरं तारं करिष्यामि । उत्थिते तारस्वरे पुनः प्रकाशो भविष्यति । हुं ओ३म् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[यथावर्णितमौनानन्तरम्]

भो कविवर! अद्य यथाहं नाट्येन नारदः तथैव भवान् कालिदासः। अभिनयाव आवां यत्

स्वर्गादावामुज्जयिन्यां प्रविष्टौ
छात्रा दृष्टाः पाठशाला च दृष्टा।
श्रोतव्यं यत् सर्वमेव श्रुतं तद्
दृश्यं दृष्टं, शिष्टमस्तीह भाष्यम्॥

तत्तु त्वया कर्तव्यम्। व्याख्यानसमयः संजातः। न कोऽपि अत्राध्यक्षः। अहं व्याख्यातृसखः। अहमासने उपविशामि। तिष्ठतैव त्वया व्याख्यानं कर्तव्यम्।

कालि०—[स्मितं कृत्वा] यदि भगवान् न अध्यक्षः किंतु व्याख्यातुः सखा, तर्हि मयि व्याख्यातरि तिष्ठति कथं भवानासनपरिग्रहं कर्तुमर्हति। द्वावप्यावां तिष्ठन्तौ एव संभाषणं कुर्वः। तत्सम्भाषणमेव व्याख्यानं भविष्यति।

नारदः—किंतु नैषा व्याख्यानपद्धतिः।

कालि०—किमियं पद्धतिः कस्यांचित् स्मृत्यां समाविष्टा?

नारदः—किंतु द्वाभ्यां व्याख्यानमित्यपि नियमः न कुत्रापि लिखितः।

कालि०—न केवलं लिखितः, अपि तु प्राचीनकालान्महापुरुषैरनुसृत एव।

नारदः—कुत्र?

कालि०—भगवन्! देवप्रियो भगवान् न देवानांप्रियः। तथापि यदि अज्ञानेनावृतमात्मानं दर्शयिष्यसि तर्हि भगवते भगवद्गीताया एव स्मरणं दास्यामि। यदि एकाकी कृष्णः अविच्छिन्नेन भाषणेन गीतातत्त्वव्याख्यानमकरिष्यत्, तत् व्याख्यानमर्जुनमतपरिवर्तनाय नालमभविष्यत्। अतः व्याख्यानस्य इष्टपरिणाम इष्यते चेत्, एकेनैव पुरुषेण व्याख्यानं न

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दातव्यम् । एकेनैव स्वरेण एकस्यैव व्याख्यानं विरसतामावहेत् । अतः अद्य सुमुहूर्ते कृष्णार्जुनयोः उदाहरणमनुसृत्य आवां व्याख्यानस्य संवादसरणिं प्रवर्तयावः । केवलमिदमेवान्तरं यद् गीताव्याख्याने भगवान् श्रीकृष्णो गुरुः, अर्जुनश्च शिष्यः, अत्र भगवान्परीक्षकः अहं परीक्ष्यः छात्रः । भगवता प्रष्टव्यं मया तु उत्तरं दातव्यम् । पृच्छतु भगवान् प्रथमं प्रश्नम् ।

नारदः—[स्मितं कृत्वा] त्वया किंचिदपि अद्यापि नोक्तम् । अनुपक्रमे एव कथं प्रश्नः? आरभस्व व्याख्यानम् । ततः आवश्यकं प्रश्नं प्रक्ष्याम्येव ।

कालि०—[श्रोतृसमाजाभिमुखीभूय नमस्कृत्य]

नमः कालिकायै महाशक्तिकायै
विशालापुरीशप्रियायै जनन्यै ।
त्वदीयप्रसादान्महामन्दबुद्धिः
भवत्येव लोके कविः कालिदासः ॥

सभ्याः! अहो भाग्यमस्य कालिदासस्य अद्य, यत् कालिदासजन्मस्थाने कालिदासजयन्तीमहोत्सवे कालिदासप्रेक्षागृहे तस्य किञ्चित् कथयितुं प्राप्तः अवसरः ।

नारदः—[श्रूयताम् श्रूयताम् इति करतलध्वनिं करोति]

कालि०—[आत्मगतम्] नहि, नहि इति कथयतापि मया कृत एव व्याख्यानोपक्रमः । भवतु अन्यत ओघं नयामि । [प्रकाशम्] भगवन् कथय किं कथयामि?

लोके ख्याता या विशाला पुरीयम्
प्राज्ञैः पूर्णा सूरिभिः पण्डितैश्च ।
एषामग्रे मादृशो नैव शक्तः
किञ्चिद्वक्तुं मौनमेवाश्रयेऽतः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—आयातः पुनर्वेतालः पूर्वं स्थानम् । कविवर मा वद, मा वद । किन्तु कथय कस्मिन्समारोहे वयमत्र संमिलिताः?

कालि०—कालिदासमहोत्सवसमारोहे ।

नारदः—किं रोचते ते एष समारोहप्रकारः?

कालि०—न रोचते ।

नारदः—किं कारणमरुचेः?

कालि०—न रोचते मे व्यक्तिमाहात्म्यप्रदर्शनम् ।

नारदः—एतेऽपि कालिदासव्यक्तिं न स्तुवन्ति । व्यक्तिमाहात्म्यस्य समयः गत एव सर्वैः राजभिः सह भारतात् । पश्य किं क्रियते एभिरेषु समारोहेषु । व्यक्तिरूपस्य कालिदासस्य प्रशंसायामपि न क्रियते सा कालिदासरूपस्य । एते तु वर्णयन्ति तस्य व्यक्तेः कृतीः । कुत्र तस्य नाटकान्यभिनीयन्ते, कुत्र तस्य काव्यस्य चर्चा क्रियते । कुत्र कुत्र यत् कालिदासस्य स्वप्नेऽपि नागतं स्यात्, तद्बलात् तस्य शब्देभ्यः आकृष्य स्थाप्यते । यदि न रोचते ते एषः प्रकारः, कथय केन प्रकारेण कर्तव्यः अयं महानुत्सवः?

कालि०—भगवन् व्यक्तेः स्थाने कृतिषु स्थापितास्वपि एतद्विशेष-माहात्म्यमेव भवति, न सामान्यमाहात्म्यम् । यतो वराकः कालिदास एक एवासीत् । कति वर्तन्ते तस्य प्रसिद्धाः कृतयः? एकं खण्डकाव्यं मेघदूतनामकम्, द्वे महाकाव्ये रघुवंशकुमारसंभवनामनी, त्रीणि नाटकानि मालविकाग्निमित्र-विक्रमोर्वशीय-शाकुन्तलसंज्ञकानि । एतासां षण्णां कृतीनां माहात्म्यं कियत्कालं स्थास्यति? अचिरादेव पुनः पुनः तासां विवरणेन तत्रागमिष्यति पर्युषितत्वम्, तन्मूलकं च वैरस्यम् ।

नारदः—तर्हि किं कर्तव्यम्?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालि०—प्रथमं तावत् कालिदासः सर्वश्रेष्ठ इति कल्पना एव चित्तान्निःसार्या ।

नारदः—किं कथयसि कविवर! कालिदासो न सर्वश्रेष्ठ इति ।

कालि०:—अथ किम् । तस्मिन् काले तस्मिन् देशे स्यात् कदाचित् कालिदासः सर्वश्रेष्ठः । किंतु स सर्वदा तथैव स्थास्यति इति कल्पना हास्यास्पदा, निरवधेः कालस्य विस्तीर्णायाः पृथिव्याश्च अवमानकारिका । यतः

अपार एष संसारे स्वाभिमानो वृथा भवेत् ।
न ज्ञायते किं किमासीत् अस्ति किं, किं भविष्यति ॥

अतः कस्मिंश्चित् काले, कस्मिंश्चिद्देशे आसीत् कश्चन श्रेष्ठः इत्येव कथनं परमार्थतः सत्यम् । अन्यत्सर्वमसत्यमेव ।

नारदः—किंतु एवम् उत्सव एव अनावश्यको भवेत् ।

कालि०—न भगवन्! न । उत्सवप्रियाणां नराणां जीवनाद्विरते उत्सवे तज्जीवनमेव नीरसं स्यात् । किंतु य उत्सवः कर्तव्यः स कस्या अपि विशिष्टव्यक्तेः न कृत्वा सामान्यतया कार्य इति मे भावः ।

नारदः—दृश्यते ते विचारः सारवान् । तथापि स्पष्टमधिकं कुरु ।

कालि०—आद्याक्षरेणैव संपूर्णशब्दं जानते भगवते न वर्तते किंचिदस्पष्टम् । तथापि जनहितार्थं पृच्छते भवते स्पष्टीकरिष्यामि ।

नारदः—कुरु तथैव ।

कालि०—गृह्णातु भवान्कालिदासस्यैव उदाहरणम् । कालिदासः कविरिति प्रसिद्धः । तस्मात् भवतु कालिदासमहोत्सवः कविमहोत्साहरूपेण ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

या या भाषाः सुविज्ञाता अस्माभिः पठिताश्च याः ।
तासु तासु च भाषासु ये ये सन्ति च सूरयः ॥

तेषां सन्तुलनां कृत्वा भिन्नेषु विषयेषु च ।
प्राप्ता ये सन्ति निष्कर्षाः संस्थाप्याः पुरतः सताम् ॥

एवं कृते न वैरस्यं कस्मिन् कालेऽपि संभवेत् ।
नवीनत्वान्नवीनत्वात् काव्यानां सर्वदैव हि ॥

नारदः—किंतु तेन कदाचित्कस्मिन्विषये कालिदासः निकृष्ट इत्यपि निष्कर्षः संभवेत् ।

कालि०—का हानिः? ज्ञानस्य क्षेत्रं प्रतिदिनं विस्तृतमेव भवति । तेन प्राचीनज्ञानम् अद्यतनात् ज्ञानात् यदि संकुचितं दृश्यते न किमपि अत्र अस्वाभाविकम् । विचारयाम खलु कालिदासस्योपमाक्षेत्रमेव । 'उपमा कालिदासस्य' इति सर्वैः एव मुक्तकण्ठं प्रशस्यते । किं तु विद्यन्तेऽद्य बहवः अर्थाः ये कालिदासेन न श्रुताः नैव दृष्टाः न चापि अनुभूताः । किंतु न कोऽपि कथयिष्यति यत्तेऽर्था इदानींतनैः कविभिः स्वकाव्येषु न प्रयोक्तव्या इति । 'उपमा कालिदासस्य' इति स्तुवतो विदुषः अयमेवाभिप्रायः यद्ये विषयाः कालिदासस्य पुरत आसन्, तेभ्यः वर्ण्यविषयस्पष्टीकरणाय ते सूक्ष्मया सौन्दर्यदृष्ट्या उपयोजिता इति । सैव सूक्ष्मा सौन्दर्यदृष्टिः अद्यतनैः कविभिः प्रयुक्ता चेत्, तेषामुपमा कालिदासस्योपमातोऽपि शोभनतरा भवितुं शक्या इति अत्र न वर्तते मम कोऽपि संदेहः । सर्वमेव सुन्दरं भवितुमर्हति स्वस्वसमये ।

बीजाद्यथा स्याल्लघुरङ्कुरश्च
स शोभितः स्यान्नवपल्लवैश्च ।
कालेन पुष्पैश्च फलैश्च पूर्णः
छायान्वितोऽन्ते स भवेद्धि वृक्षः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—साधु रे कालिदास साधु। पश्य पश्य ते व्याख्यानेन— नहि नहि संभाषणेन कथं चित्रार्पितमिव श्रोतृवृन्दम्। अधिकं कथय किंचित् येन चातका इव ऊर्ध्ववदनाः श्रोतारः तृप्तिं यास्यन्ति।

कालि०—न न इति कुर्वतापि मया बहु भाषितम्। प्रतिपादन-वशाद्विस्मृतमेव मया व्याख्यानं न कर्तव्यमिति। किमधिकं कथनीयम्?

नारदः—कवे, किं न मन्यसे तव प्रतिपादनदिशा यस्य कस्यापि विषयस्य तस्मिन्नुत्सवे अन्तर्भावो भवेत्। एवं कृते किं स उत्सवः अतिव्याप्तः न भवेत्। अधुना तव मतेन संकुचित उत्सवः। परंतु त्वन्निर्दिष्टां सरणिमनुसृत्य तस्य विस्तारोऽमर्यादो भविष्यतीति मन्ये। तर्हि कथय कञ्चित्सुवर्णमध्यम्।

कालि०—मया दिङ्मात्रं दर्शितः काव्यविषयः मर्यादयितुं शक्यः। कालिदासस्य एकं खण्डकाव्यमपि गृहीत्वा बहवो विचाराः कर्तुं शक्याः। कालिदासात्प्राक्, तस्य पश्चाद्वा संस्कृतभाषायां तथैव अन्यभाषासु भारतीयासु यूरोपीय-भाषासु वा कानिकानि खण्डकाव्यानि जातानि, तत्र 'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु' इति मया [इति अर्धोक्ते] नहि नहि—कालिदासेन [इति अर्धोक्ते]

नारदः—कथय निर्भयतया मयेति। किं मया आदावेव न कथितं यदद्य भवान् कालिदासभूमिकायां वर्तमान इति। तस्मान्मयेत्युक्ते न कापि क्षतिः।

कालि०—कालिदासेन कथितं सिद्धान्तम् अनुगम्य दूतकर्मणि कामिजनैः केके चेतना अचेतना वा नियुक्ताः, दूतमुखेन किंप्रकारकाः संदेशाः प्रेषिताः, तत्र को विशेषः कालिदासस्य के अन्येषां वा, इति सर्वमेव प्रतिपादयितुं शक्यम्। किं बहुना। सर्वथैव संकुचितां स्वनिर्भरामेव वृत्तिं परित्यज्य विशालया सार्वदेशिकया दृष्ट्या सर्वस्यानुशीलनं करणीयम्। अत्रभवतां विदुषां पर्याप्त एक एव शब्दः, मया तु केवलः प्रदर्शितः पन्थाः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न कथयामि वेदवाक्यमिव 'नान्यः पन्था अयनाय विद्यते' इति। अपितु कथयामि—'स्वर्गं सर्वे यान्ति पन्थान एव'। भगवन् अधिकं वक्तुं नोत्सहे।

नारदः—सुविचाराणां दुर्भिक्षेऽस्मिन् आकण्ठं भोजनदानं न युक्तम्। कदाचित्तेन अजीर्णमपि संभवेत्। तस्मात् यथा व्याख्यानस्य उपक्रमः कृतः तथा कर्तव्य उपसंहारः। मा प्रेक्षस्व ममैव मुखम्। श्रोतृवर्गस्याभिमुखीभूय वद यद्वक्तुकामोऽसि।

कालि०—[तथा कृत्वा] अयि विशालानिवासिनः सज्जनाः छात्राश्च! युष्मत्संपादितमिमं कालिदासोत्सवं दृष्ट्वा महानानन्दो जातो मे मनसि। महोत्सवविषयकाः मम—नहि नहि—आवयोः विचाराः सावधानेन मनसा भवद्भिः सर्वैः श्रुताः इति अयं मम सुहृन्नारदः अहं च बलवदनुगृहीतौ स्वः। एषु यद्रोचते तद्ग्राह्यं यन्न रोचते तत् त्याज्यम्।

मया यन्मतं मे तदग्रे धृतं च
श्रुतं शान्तचित्तैर्भवद्भिश्च सर्वैः।
अयोग्यं यदि स्याद् विचार्य स्वचित्ते
क्षमा तत्र कार्या, जनो याचतेऽयम्॥

[नेपथ्ये करतलध्वनिः]

नारदः—अनेन करतलरवेण ज्ञायते यत् स्वीकृता ते प्रार्थना। अथ एकमेव कार्यमवशिष्टम्। तत्तु सभाविसर्जनम्। तत् कृत्वा आवामन्तरितौ भवावः। अयि सभ्याः!

[इत्यर्धोक्ते एव अपटीक्षेपेण प्रविश्य]

[एकतः सुबन्धुः, अन्यतः सूत्रधारिणी च]

उभौ—[युगपदेव]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न खलु न खलु कार्यं पूर्णतां यातमद्या-
प्यवसितमिह भाष्यं, शिष्यते किंचिदन्यत् ।
किमिति यदि? वदावः पूज्ययोरेतयोर्नः,
तरुणकुसुममालापूजनं प्रार्थना च ॥

सु०—अयि सभ्याः! उद्धूलितायां तस्यां सभायां सर्वत्र प्रवादः छात्राः उद्धताः केवलनाशकारिणः इति ।

सूत्र०—तदा आभ्यामेव महाभागाभ्यामुद्धृतः अस्मत्पक्षः, अस्मभ्यं छात्रेभ्यः दत्तं समाधानं, कार्यकरणे वयं सर्वे समुपदिष्टाः ।

सु०—तदनन्तरं छात्रैरस्माभिरनुशासनबद्धैः संपादितः ह्यः मालविकाभिनयप्रयोगः । [स्मितं कृत्वा] अनेन देवर्षिणा नारदेन कथं वयमनुगृहीताः इति सर्वैरेव प्रत्यक्षीकृतम् ।

सूत्र०—अद्य च स्वविचारप्रदर्शनेन कालिदासमहोत्सवः कथं कार्य इत्यपि प्रतिपादितं [स्मितं कृत्वा] प्रत्यक्षमेव कालिदासेन ।

सु०—तदर्थमहमेतां कुसुममालां भगवतः कविश्रेष्ठस्य कालिदासस्य कण्ठे समर्पयामि ।

[इति तथा करोति । उच्चैः करतलध्वनिः]

सूत्र०—अहमपि एतां केवलतुलसीमञ्जरीमालां नारदकण्ठे प्रार्पयामि ।

[इति तथा करोति]

नारदः—[विहस्य] सूत्रधारिणि! न कयापि कुमार्या अद्यावधि मालां कण्ठे समर्प्य अहं सनाथीकृतः ।

सूत्र०—नेयं भगवन् प्रीतिपूर्वकं समर्पिता पुष्पमाला यस्या विषये शङ्का कार्या ।

नारदः—[पुनर्विहस्य] किं मयि न वर्तते ते प्रीतिः?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सूत्र०—भवादृशे पूज्यपुरुषे कथं संभवेत् प्रीतिः? भवद्विषयिका भावना न प्रीतिः अपि तु भक्तिः। इयं तुलसीमञ्जरीमाला न प्रीति-सूचिका अपितु भक्तिदर्शिका। तेन अलमन्यथा गृहीत्वा। एनां तुलसीमालां समर्प्य भवतः पादयोः भक्तिपूर्वकं प्रणमामि। [इति प्रणामं करोति]

नारदः—[कालिदासं प्रति] दृष्टं कथं प्रत्युत्पन्नमति स्त्रैणमिति। [सूत्रधारिणीं प्रति] बाले! अभिमतवरप्राप्तिरस्तु। [सुबन्धुं प्रति] कथय किं ते भूयः प्रियमुपकरोमि?

उभौ—यदि प्रसन्नो भगवान् एतदस्तु भरतवाक्यम्—

अग्रेऽग्रे गन्तुमिच्छूनां हितार्थं तन्निरोधिनाम्।
सङ्गतं युववृद्धानामस्तु प्रीतियुतं सदा॥

नारदः—तथास्तु।

(यवनिका)

इति पञ्चमोऽङ्कः॥

॥ कालिदासमहोत्साहं नाम नाटकम् समाप्तम्॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# सैरन्ध्री नाम प्रेक्षणकम्

देवकी मेनोन्

(१)

(नेपथ्ये गीयते)

मधुरमङ्गलमोहनविग्रहम्
परिलसत्तडिदम्बरमालिनम् ।
व्रजवधूजनपुण्यमहोदयम्
प्रणततापहरं हरिमाश्रये ॥

आसीद्भोजपतेर्दासी मधुरायां तपस्विनी ।
त्रिवक्रत्वात्स्वकायस्य त्रिवक्राख्यां गता हि सा ॥

गात्रे गतापि वक्रत्वं दुष्कृतेनान्यजन्मनि ।
ऋजुत्वं मनसा वाचा कर्मणा चाभजत्स्थिरम् ॥

नियुक्ता भोजराजेन ह्यनुलेपनकर्मणि ।
स्वकर्मनिरता नित्यं धराधिपमसेवत ॥

कर्मणा मधुरानाथभुजिष्यात्वं गतापि सा ।
मनसा देवकीसूनुं प्रपेदे मधुराजनिम् ॥

समाप्य दैनन्दिनकृत्यमेषा
सम्पूजयामास मनोहरं तम् ।
बृन्दावनं गोपकुलैस्समेतं
सम्मोहयन्तं मुरलीस्वनेन ॥

(मधुरायां सैरन्ध्र्याः त्रिवक्रायाः आडम्बररहितं भवनम् । ततः प्रभाते प्रविशति कुब्जा सैरन्ध्री । स्वयं लिखितस्य चित्रफलके मुरलीधरस्य भगवतः रूपमभिवन्द्य गायति ।)

(गानम् - कापिरागेण आदितालेन)

पाहि मुकुन्द माम् अनाथाम् ।
पाहि मुकुन्द माम् अनाथाम् ॥

पाहि मुकुन्द माम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पाथेयं ते पादस्मरणम् ।
जीवितपथे मे खेदहरणम् ॥

पाहि मुकुन्द माम् ।

भवजलधौ ते भक्तिरमोघा ।
भवतु हरे मे सुलभा नौका ॥

पाहि मुकुन्द माम् ।

संसृतिबन्धविमोचनचरित ।
सङ्कटमोहनिवारणनिरत ॥

पाहि मुकुन्द माम् ।

व्यालराक्षसदुर्मदनिग्रह ।
पालय जलदश्यामलविग्रह ॥

पाहि मुकुन्द माम् ।

(ततः प्रविशति सैरन्ध्र्याः सखी निकटगृहस्था सुशीला नाम गेहिनी ।)

**सैरन्ध्री**—सखि स्वागतं ते ।

(आसनं निर्दिश्य)

अत्रोपविश्यताम् ।

**सुशीला**—(उपविश्य)

सखि, ते गीतरागेणाकृष्टाहमत्रागता । त्वया चित्रलिखितस्य श्यामल-कोमलस्य नन्दकुमारस्य स्तुतिः निरर्गलप्रवाहेण मधुररागेण गीता भक्तिरसे निमज्जयति श्रोतॄणां मनांसि ।

**सैरन्ध्री**—सखि, निरर्गलमिति यदुक्तं त्वया तत्सत्यमेव । विरलवाङ्मतिविभवा अशिक्षिता यद्यपीयं सुकुमारकलासु, तथापि मङ्गल-विग्रहस्यारविन्दलोचनस्य मनोहरलीलाविलासान् हृदि विभावयन्त्याः मे तूलिका चित्रकर्मणि, रसना च तद्गीतसरण्यां यथेष्टं प्रवर्त्तेते ।



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुशीला—श्लाघनीया ते जीवितचर्या । सखि ! अस्ति मे जिज्ञासा । कथं नु ते अदृष्टपूर्वस्यापि गोकुलकुमारस्य विभावनाशक्तिरुत्पन्ना ?

सैरन्ध्री—सखि श्रूयताम् । भोजनृपतेर्नित्यमङ्गविलेपनवाहिन्याऽसकृद्राज्ञश्चारमुखात् श्रुतानि मया यशोदातनयस्य मायाचरितानि सम्मोहनानि, यैराप्लावितोऽनवरतमानन्दसागरे नन्दव्रजः । मुकुन्दलीलाः श्रावंश्रावं भावनाशक्तिर्मयोपलब्धा ।

सुशीला—लोकोत्तरमधुराकृतिप्रकृतौ किशोरे भागिनेये विद्वेषकलुषितमतिर्जातः महाराज इति विधेः प्रभाव एव सूचितः ।

सैरन्ध्री—विपरीता हि दैवगतिः । यथा महाराजः कृष्णभीत्या सदा तत्स्मरणः संवृत्तः, तथाहं राजदासी तत्प्रेम्णा अजस्रं तद्गतमानसैव जाता ।

(समन्दस्मितम्)

सुशीला—सखि, भीरोः कामिनश्च मनोवृत्तेरेकदेशसाम्यं विद्यत एव ।

सैरन्ध्री—सखि, गोपवधूनां सौभाग्यमसूयावहमेव, यन्मायामानुषविग्रहस्य भगवतः केलीरङ्गे नन्दव्रजे सुलभगोविन्दसमागमास्तास्संवृत्ताः । मन्ये व्रजस्त्रियस्ताः न केवलं मानुष्यः परंतु देवाङ्गना एव भुवमागता ह्युपसेवितुमच्युतमिति ।

(सविषादम्)

सखि, अकृतपुण्याहं तु सदा कृष्णगतमानसा कदा वा सकृदपि भगवद्दर्शनावसरं लभेय इति चिन्तया उत्ताम्यामि ।

(नेपथ्ये)

अचिरादचिरात् ।

सैरन्ध्री—(कर्णं दत्वा) सखि, शुभोदर्कं वचनं श्रूयते । त्वरितं गत्वा ज्ञायतां का वार्तेति ।

सुशीला—तथा ।

(इति निष्क्रान्ता)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(पुनः प्रविश्य)

सुशीला—सखि, दिष्ट्या वर्धसे । पौराः सहर्षमुद्घोषयन्ति अचिराद्रामकेशवावागमिष्यतः मधुरापुरीमिति ।

सैरन्ध्री—सखि, प्रियं मे ।

सुशीला—मया पृष्टास्ते एवमाहुः । महाराजेन कंसेन राजधान्यां प्रवर्त्यमानधनुर्मखनिरीक्षणाय राममाधवावानेतुं नन्दव्रजं प्रेषितेनाक्रूरेणानीतौ कुमारावद्यापराह्णवेलायां पुरः प्रवेशं कुर्यातामिति ।

सैरन्ध्री—मुदितास्म्येतद्वार्तया । परंतु, सखि बलकेशवदर्शनोत्सुकैः पौरैर्निबिडिते राजपथे कथं वा दुर्बलाहं कुब्जा मुकुन्दं द्रष्टुं पारयामीत्याकुलितं मे मनः ।

सुशीला—यथाहं पश्यामि, अस्थाने ते विषादः । महाराजस्याङ्गानुलेपनहेमभाजनहस्तां त्वां राजादरेण को वा वारयेद्राजवर्त्मनि ?

सैरन्ध्री—सखि तथापि जनसम्मर्दे मार्गे नाहमेकाकिनी गन्तुमुत्सहे ।

सुशीला—सखि, मा विषीद । त्वया सहाहं यास्यामि । ममाप्यस्ति कौतूहलं कुमारदर्शने । तत्सखि, गृहकार्याणि त्वरितं निर्वर्त्य सहिते यास्याव आवाम् । साधयाम्यधुना ।

सैरन्ध्री—आश्वस्ताहम् । न केवलं मे प्रियसखी त्वं, परंतु यथार्थनाम्नी सुशीला च ।

(निष्क्रान्ते)

(२)

(मधुरायां राजपथः)

(नेपथ्ये)

अथापराह्णे भगवान् कृष्णः सङ्कर्षणान्वितः ।
दिदृक्षुर्मधुरां गोपैः प्राविशत् परिवारितः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तां सम्प्रविष्टौ वसुदेवनन्दनौ वृतौ वयस्यैर्नरदेववर्त्मना ।
द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुस्तदुत्सुकाः ॥

(ततः प्रविशति सखीसहाया शीतलपरिमलोद्गार्यङ्गविलेपनपूरितहेमभाजनहस्ता सैरन्ध्री । ते परिक्रामतः ।)

सुशीला—(करेण निर्दिशन्ती) सखि, प्रेक्षस्व इमाः प्रासादाधिरूढाः पुरस्त्रियः अक्षमा दृश्यन्ते नन्दकुमारप्रेक्षणसमुत्सुकाः । अविदूराच्च श्रूयते पौरजनकोलाहलः । तद्राममाधवावचिरादूद्रक्ष्यावः ।

सैरन्ध्री—सखि कातराहं जनसङ्कुलमार्गे गन्तुम् । तत्स्थानमिदं जनासङ्कीर्णमाश्रयाव, कुमारप्रेक्षणानन्दमनुभवितुम् ।

सुशीला—तथा । (द्वे तथा कुरुतः ।)

(ततः प्रविशन्ति प्रमुदिताः भक्ताः सम्मिलिताः करतालेन सह गायन्तः नृत्यन्तश्च)

(गानम्-यमुनाकल्याणीरागेण, आदितालेन)

रामसमेत कृष्ण—जय
रामसमेत कृष्ण—जय

पीताम्बर श्रीधाम जय जय
नीलाम्बर बलराम जय जय

रामसमेतकृष्ण

मन्मथकोटिप्रभापरिलसित
मङ्गलरूप मायाचरित

रामसमेत

गोपतारावृतचारुसुधाकर
योगेश्वर जगदीश कृपाकर

रामसमेत

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मधुरालोकन मञ्जुलहसन
मधुरामोहन मुरलीवादन

रामसमेत

(निष्क्रान्ताः भक्ताः ।)

सैरन्ध्री--(आत्मगतम्) स्पन्दते मे दक्षिणेतरं नयनम्, येनाविलम्बितमनोरथसिद्धिः सूच्यते । अथवा किं वञ्चितास्मि नयनेन ।

(ततः प्रविशतः रामकृष्णौ पौरपरिवारितौ ।)

सुशीला--(करेण निर्दिशन्ती) सखि, प्रेक्षस्व, इमाः प्रासादाधिरूढाः प्रमदाः हर्षोत्फुल्लनयनाः अभिवर्षन्ति सुमनोभिः जनसमूहमध्यगतौ नन्दकुमारौ । किंतु पौरैर्निबिडं परिवारितौ न स्फुटं व्यज्येते ।

(सुशीला पुनरपि निरीक्षमाणा-सावेगम)

सखि प्रेक्षस्व प्रेक्षस्व, नयनोत्सवकरौ बलकेशवौ सुस्मेरवदनौ, सगोपालौ दर्शनपथं गतौ । भक्तजनाश्च तावर्चयन्ति स्रग्गन्धादिभिः ।

सैरन्ध्री—(निरीक्षमाणा-सविषादं) सखि, यद्यप्यायस्याम्यात्मानं तथापि हतभाग्याया मे त्रिवक्रायाः कुब्जायाः नोपलभ्यते निमेषदर्शनमपि पावनजन्मनोः कुमारयोः । अनन्ताः प्रेक्षकसमूहाः एव मे नयनयोः विषयीभवन्ति ।

सुशीला—मा विषीद, द्रक्ष्यस्यचिरात् नयनानन्दनौ कुमारौ ।

सैरन्ध्री--(आत्मगतम्) कुतो ह्येतावन्मे भागधेयम् ।

(किञ्चित् विलम्ब्य, प्रकाशम्)

सखि, अधुना किं प्रेक्षसे भगवन्तम् ?

सुशीला—नहि, मेघराजिषु विहरंश्चन्द्रमा इव ईषदीषद्दृश्यते, अकस्माच्च परोक्षं नीयते जनैर्घैः ।

सैरन्ध्री--हा धिक् । (इति बाष्पं विसृजति)

सुशीला--सखि, समाश्वासिहि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सैरन्ध्री—(सविषादं) सखि, सर्वथा विफलप्रयत्नाहं संवृत्ता मन्दभागिनी। एतस्मात् स्थानात् भगवद्दर्शनमसाध्यमेव मन्ये। मे राजधानी-गमनवेला च परिहीयते। राजकोपतः भीताहं नात्र स्थातुं पारयामि। यावत् गच्छामि। त्वं तावत् बलकेशवदर्शनानन्दममन्दमनुभूय प्रतिनिवर्त्तस्व।

(कुब्जा मन्दंमन्दं सविषादं गन्तुं प्रवृत्ता)

सुशीला—(पुनरपि निरीक्षमाणा, सविस्मयम्) सखि एह्येहि। जनसमूहं विभिद्य इत एव अभिवर्त्तेते द्विपेन्द्रगमनौ बलकेशवौ। मन्ये सर्वान्तर्यामी मुकुन्दः भक्तायास्ते सम्यक् दर्शनदानाय कृतमतिरिति।

(भगवान् सरामः त्वरितगतिः कुब्जाम् उपयाति। सुशीला तयोः पादयोः प्रणिपत्योत्तिष्ठति)

सैरन्ध्री—(विलेपनभाजनं सखीहस्ते दत्वा सहर्षाश्रुनयना बद्धाञ्जलिः)

प्रसीदतां मे सर्वमङ्गलविग्रहौ भगवन्तौ। (सगद्गदम्) अकृतपुण्यायाः मे अङ्गवैकल्यात् शिरसा मे भगवत्पादारविन्दस्पर्शनं प्रतिषिद्धं दैवेन।

कृष्णः—(सस्मितम्) पृच्छामि किञ्चित् भवतीम्।

सैरन्ध्री—भगवन्, अनुग्रह एव प्रश्नः।

कृष्णः—का त्वं वरोर्वेतदिहानुलेपनम्
कस्याङ्गने वा कथयस्व साधु नः।
देह्यावयोरङ्गविलेपमुत्तमं
श्रेयस्ततस्ते न चिराद्भविष्यति॥

सैरन्ध्री—दास्यस्म्यहं सुन्दर कंससम्मता
त्रिवक्रनाम्नी ह्यनुलेपकर्मणि।
मद्भावितं भोजपतेरतिप्रियं
विना युवां कोऽन्यतमस्तदर्हति॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राज पण्डित

दूरभाष : { ५८५७०० / ५८३९१९

# डा० गोस्वामी गिरिधारीलाल

शास्त्री, ज्योतिषाचार्य, एम.ए.पीएच्.डी.

२५/३०, पूर्वी पटेल नगर, नई दिल्ली-११०००८

आदरणीय
डॉ. सत्यव्रत शास्त्री,
श्री आर डी. शर्मा जी
आपके पास आ रहे हैं
ये अपने विषय के
इनकी पुत्रवधू ने फर्स्ट
क्लास एम. ए. की है
उसके लिये चर्चा कर
कार्य में सहायता कर
कृतार्थ करें

भवदीय
गो. गिरिधारीलाल

Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan

Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan

(कुब्जा सहर्षं राममाधवौ स्वस्ववर्णेतरशोभिना अङ्गरागेणानुरञ्जयति । कुमारौ मिथः प्रेक्ष्य प्रीतिं प्रकटयतः)

कृष्णः--(स्मेरवदनः) अङ्गने शुभकर्मणः सद्यः फलं ते ददामि ।

नेपथ्ये--आक्रम्य प्रपदे पद्भ्यां द्व्यङ्गुल्युत्तानपाणिना ।
प्रगृह्य चुबुकेऽध्यात्ममुदनीनमदच्युतः ॥

(कृष्णः कुब्जायाः शरीरं यथावर्णितं स्वकराभ्याम् उन्नमयति । कुब्जा सद्य एव परिहृताङ्गवैरूप्या प्रमदोत्तमा भूत्वा हर्षाश्रूणि विसृजन्ती भगवतः पादयोः पतति । भगवांश्च तामुत्थापयति । भक्तजनाश्च भगवत उपरि पुष्पवृष्टिं कुर्वन्ति ।

सैरन्ध्री—(भक्तिनम्रा बद्धाञ्जलिः)

भगवन् करुणासागर, भक्तकल्पतरो,

त्वं मे माता पिता चैव त्वं मे बन्धुः सखा प्रियः ।
त्वं मे विद्या धनं चैव त्वं मे प्राणाः परा गतिः ॥

(निष्क्रान्ताः सर्वे)

(मङ्गलम्)

मुग्धेन्दुवक्रोक्तिविलासभावै-
र्योऽनन्दयद्गोपवधूः कुमारः ।
भक्ताङ्गवक्रत्वमपाहरद्यः
पायात्स नो दुर्मतिवक्रतायाः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# श्रीकुलशेखरसूरेः भगवन्निद्राप्रार्थनारूपा गाथाः*

अनु० टि. एस्. श्रीनिवासाचार्यः

१. मन्नुपुकळ्

आशाविश्रुतकीर्तिकोसलसुतादिव्योदरद्योतकृत्
लङ्काधीश्वरमैळिभञ्जन ! महावप्रैर्दृढैः काञ्चनैः ।
संरुद्धे परितस्तु कृष्णनगरे मन्नीलदीप्यन्मणे !
मद्भोग्यामृत ! दिव्य ! राघव ! विभो ! निद्रां भजेथाः सुखम् ॥

२. पुण्डरीकमलर्

नाभीसम्भवपुण्डरीककुसुमे सर्वावनीसर्गकृत्
मग्नान्कर्कशताटकोरसि शरान्कर्तुं धनुर्नामन ! ।
सन्द्रष्ट्रर्पितमानसासितमणे ! श्रीकृष्णपुर्यां लसन् !
दिक्षु व्याप्तभुजिष्य ! राघव ! विभो ! निद्रां भजेथाः सुखम् ॥

३. कोङ्गुमलि

गन्धिश्यामळकेशकोसलसुतासद्वंशजातार्भक !
श्रीमन् ! दाशरथे ! यशश्चयलसद्वैदेहकन्यापते ! ।
गङ्गातीर्थसुपावनाम्बुभरितश्रीकृष्णपुर्यां लसन्
मद्वंश्यामृत ! नीलमामकमणे ! स्वप्यास्सुखं राघव ! ॥

४. तामरैमेल्

फुल्ले तामरसे प्रसूतविबुधश्रेष्ठ ! प्रभो ! मैथिली-
भर्तः ! पङ्क्तिरथस्य कोसलपतेर्विश्वेड्यडिम्भोत्तम ।
गीतैः कृष्णपुरे द्विरेफरचितैः कीर्णे लसन्मन्मणे !
बाणप्रेरकतीक्ष्णचापवरभृत् ! स्वप्यास्सुखं राघव ! ॥

---

* आल्वारभिधेषु वैष्णव-दिव्यसूरिषु अन्यतमैः कुलशेखरभूपालैः गीते द्रविडगाथा-प्रबन्धान्तर्गते 'पेरुमाल्-तिरुमोलि'-नाम्नि प्रबन्धे अष्टमं दशकमिदमनूद्य दत्तमत्र ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

५. पाराळुम्

दत्वा स्वां भरताय संपदमहो सर्वां नृपेन्द्रोचितां
प्राप्तः ! स्वीयदवीयसा निरवधिप्रेम्णा वनं दुर्गमम् ।
वीरश्रीविलसद्भुजान्तरयुत! श्रीकृष्णपुर्यां नृप !
श्रीमद्दाशरथे ! क्षितीशमुकुटालङ्कार! निद्राहि भोः! ॥ ५ ॥

६. शुऱ्ऱमेल्लाम्

सर्वैर्बन्धुजनैस्तवानुगमने व्यग्रैर्वनं जग्मिवन् !
त्वद्विन्यस्तभरौघभेषज वरा(र ! अ)योध्यानगर्याः पते ! ।
अभ्यस्ताखिलविद्यसूरिनिलय श्रीकृष्णपुर्यां मणे !
श्रीरामा(म ! अ)वरमातृवाक्यनिरत ! स्वप्यास्सुखं राघव ! ॥

७. आलिनिलै

प्राप्य प्लक्षदळाधिशायिशिशुतामन्तर्निगीर्णावने !
हत्वा वालिनमाहवे तदनुजे विन्यस्ततद्राज्यधूः ! ।
कुल्यानुन्नमणिप्रतीरसुभगश्रीकृष्णपुर्यां मणे !
श्रीमन्नालिपुराधिनाथ ! सुसुखं निद्राह्ययोद्धयापते ! ॥

८. मलैयतनाल्

बद्ध्वा सेतुमथाद्रिभिर्वरणयुग्लङ्कापुरीनाशकृत् !
लोलं वारिनिधिं विलोड्य कृपया देवाय दत्तामृत ! ॥
विद्यापारगपण्डिताग्र्यनिलय श्रीकृष्णपुर्यां लस-
द्धन्विन् ! मेचकरत्न ! वीर्यभरित ! श्रीराम ! निद्राहि भोः ॥

९. तळैयविळुम्

गन्धस्यन्दिसुकेशपङ्क्तिरथसद्वंश्याग्र्यडिम्भ ! प्रभो !
चापेनानमितेन सालवरभृल्लङ्कापुरीनाशन ! ।
क्षेत्रप्रोद्धृतफुल्लहल्लकलसच्छ्रीकृष्णपुर्यां मणे !
श्याम ! स्वानुजदर्शितस्वदय ! भोस्स्वप्यास्सुखं राघव ! ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

१०. तेवरैयुम्

देवानां दितिजन्मनां च ककुभामन्तर्दिशां सर्गकृत् !
सर्वैस्सेव्यपदाम्बुजातयुगलं निद्राण ! रङ्गे पुरे ।
ऋद्धायाः कनकापगाद्भिरभितः श्रीकृष्णपुर्यां मणे !
पत्रिप्रेरकचित्रचापधर ! भोस्स्वप्यास्सुखं राघव ! ॥

११. कन्निनन्मा

प्राकारावृतकृष्णपूर्निलयमत्काकुस्थपादाब्जयोः,
त्वं निद्रां कुरुतादिति प्रगदिताश्शत्क्यायुधेनातुलाः ।
दात्रा श्रीकुलशेखरेण रचिता गाथा दश द्राविडीः
येऽभ्यस्यन्ति दृढं भवन्ति त इमे भक्तोत्तमास्तत्प्रियाः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# श्रीकैरविण्यां पार्थसारथिविषया गाथाः[1]

अनु० अ. मु. श्रीनिवासाचार्यः

१. विर्पेरुविळवुम्

धानुष्कं सुमहान्तमुत्सवमहो कंसं स्वकं मातुलं
मल्लान् मत्तमतङ्गजं गजनियन्तारं निपात्याप्यधः ।
निघ्नन्तं, त्रितयं पुरां ज्वलनसात्कर्तुः शिवस्य व्यथां
गुर्वीं प्रास्य, विभुं, रिपुप्रमथनं तोत्रं वहन्तं करे ॥

पार्थस्यन्दनपूर्वतः स्थितिजुषं, मातुस्सपत्न्या गिरा
त्यक्तस्वीयकिरीटमैक्षिषि परं श्रीकैरविण्यामहम् ॥ १ ॥

२. वेदत्तै—

वेदं वेदफलं रसेन मधुरं, प्राज्ञाश्च ये मौनिनः
तेषां भोग्यमदोषमुत्तमफलं, नन्दस्य दन्तावलम् ।
क्षोणीस्थस्तुतमादिमूलममृतं, दासस्य मे स्वामिनं,
सौधाढ्ये तुलनाविहीनललनानित्यानुभूतिस्थले ॥

मावासे महिलापुरे समगमं श्रीकैरविण्यामहं
[2]भक्तानुग्रहकाम्यया प्रकटितस्वं मूर्तिभिः पञ्चभिः ॥ २ ॥

३. वञ्चनै शेय्य—

कर्तुं वञ्चनमात्तमातृवपुषैवागत्य भीता स्वयं
क्रन्दन्ती भुवि संगता किल पिशाची याभवत्, तत्स्तनम् ।
क्ष्वेलालीढमपासुताकरमहास्वादेन नाथः पिबन्
यो विद्याधरसिद्धचारणगणैः आश्चर्ययुक्तैः स्तुतः ॥

---

1. आल्वारभिधाने श्रीवैष्णवदिव्यसूरिदशके दशमेन कलिध्वंस-(तिरुमङ्गैयाल्वार्) नाम्ना कृतेषु दिव्यप्रबन्धेषु षट्सु अन्यतमे तिरुमोलिनाम्नि दिव्यप्रबन्धे द्वितीयशतके तृतीयं दशकमिदम् । मद्रपुर्यन्तर्गततिरुवल्लिक्केणिनाम्नि क्षेत्रे कृतालयस्य भगवतः पार्थसारथेर्दर्शनसमये गीता एता गाथाः, तदनुवादोऽयम् ॥

2. अस्मिन् श्रीकैरविणीक्षेत्रे पञ्च मूर्तयः सन्ति । तदावेदनार्थमयं पादः, अर्थात् पद्यपूरकश्च । श्रीनृसिंहः, श्रीरङ्गनाथः श्रीवरदराजः, सपरिवारः चक्रवर्तिश्रीतनूजः, सपरिवारः श्रीपार्थसारथिः श्रीवेङ्कटकृष्णस्वामी इति पञ्च मूर्तयः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारीरूपधरोऽमृतं रुचिकरं योऽदात्कदाचित्पुरा,
तं देवं किल दृष्टवानयमहो श्रीकैरविण्यामहम् ॥ ३ ॥

४. इन्दिरनुक्कु—

इन्द्रार्थं किल गोपवृद्धकलिते प्राचीनरीत्या सवे
मन्त्रैः कल्पितमर्चनं क्रमवशादप्राप्य देवाधिपे ।
वृष्टिं वर्षयति, प्रदूनहृदयैर्गोपैः समभ्यर्थितः
'पाया गोधनमस्मदीयमथ नः पाया अपाया'दिति ॥
धृत्वैकं गिरिमप्रमेयविभवं वृष्टिं न्यरौत्सीच्च यः
तं देवं किल दृष्टवानयमहो श्रीकैरविण्यामहम् ॥ ४ ॥

५. इन्तुणै—

हृद्याम्भोरुहवासिनीप्रियतमं सर्वसहावल्लभं
स्वस्मिन्न्यस्तभृतेः प्रियं सहचरं नप्पिन्नगोप्याः,* पतिम् ।
अन्येषामपि, पञ्चपाण्डवकृते दुर्योधनादीन्पुनः
दौत्येनाप्य तदीयवाग्विनिमयं कुर्वन्तमाप्तं मम ॥
अस्माकं कुलनाथमैक्षिषि परं श्रीकैरविण्यामहं
*भक्तानुग्रहकाम्यया प्रकटितस्वं मूर्तिभिः पञ्चभिः ॥ ५ ॥

६. अन्धकन्—

बालेऽस्मिञ्जनुषान्धकस्य हि महाराजाधिराजानुजे
राज्ञीमेत्य सुभूषितां 'कुरु पुनर्दास्यं त्वमस्मत्कृते' ।
इत्थं जल्पति, कोपमेत्य 'भगवन् स्वीकुर्वकस्मात्कृपाम्'
इत्येवं ननु कृष्णयाप्यभिहिते, कृच्छ्रं सुकेश्याः, स्त्रियः ॥
भ्रातॄणां शतकस्य चाप्य विधवाश्चापादिता येन, तं
पश्यामि स्म वृषात्मजस्य रथिनं श्रीकैरविण्यामहम् ॥ ६ ॥

---

*द्राविडसाहित्यप्रसिद्धा कृष्णप्रेमपात्रेष्वन्यतमा गोपी 'नप्पिन्नै' नाम्नी ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

७. भरतनुम्—

शत्रुघ्नो भरतानुजस्स भरतः सौमित्रिणा मैथिली
रात्रावह्नि च यं स्तुवन्ति, अधिपतिं मे, रावणस्यान्तकम् ।
रक्ताम्लानसुगन्धिशीतललताकुञ्जे समं कोकिलैः
नृत्यं बर्हिषु चाचरत्सु, तरणेरन्तर्गतावङ्गकैः ॥

व्याप्तायां किरणैः समैक्षिषि विभुं श्रीकैरविण्यामहं
*भक्तानुग्रहकाम्यया प्रकटितस्वं मूर्तिभिः पञ्चभिः ॥ ७ ॥

८. पळ्ळियिलोदिय—

विद्याभ्यासगृहादुपागतशिशोर्वक्त्रे सहस्रं पुन-
र्नाम्नां सुष्ठु समाहृतं, श्रवणयोः कर्तुं न चैव क्षमः ।
उक्त्वा तं परुषाक्षरं सुकुपितः स्तम्भं यदाताडयत्,
सद्यश्चन्द्रकलावदातदशनान्, वह्नेश्शिखामुद्गिरत् ॥

नेत्रं वक्त्रमहो बृहच्च कलयन् योऽवातरद्, दृष्टवान्
तं हर्यक्षमतिप्रसन्नवदनं श्रीकैरविण्यामहम् ॥ ८ ॥

९. मीनमर्—

मीनव्याप्तसरस्स्थनव्यसुमनांस्यादातुकामे स्वयं
तत्रागत्य जलेऽवगाह्य करिणि स्वीयं करं चोन्नतम् ।
कृत्वा क्रोशति, नक्रसंग्रहणतः पादे व्यथापीडिते,
कुच्छ्रं तस्य गजस्य संशमयितुं पक्षीन्द्रमारुह्य तम् ॥
कासारं समुपेत्य चक्रमपि संप्रेर्य स्थितं दृष्टवान्
माध्वीस्यन्दिनिकुञ्जसौधमहिलाश्रीकैरविण्यामहम् ॥ ९ ॥

१०. मन्नुतण्पोळिल्—

नित्यं शीतलभूरुहावलिसरोवप्रैश्च सौधैर्गृहैः
हर्म्यैर्मण्डपकैश्च दक्षिणदिशाधीशेन संस्थापिते ।
श्रीमत्तोण्डमहीभुजा सुमहिलापुर्यां, मनोहारिणि
श्रीमत्कैरविणीपुरे स्थितममुं संसेव्य नन्दात्मजम् ॥
श्रीमङ्गाजनताधिपेन सुधिया श्रीवैष्णवश्रीजुषा
प्रोक्तं ये दशकं विदन्ति, त इमे विन्दन्ति सौख्यं दिवि ॥ १० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# शरण-गीतानि*

## टि॰ जि॰ सिद्धप्पाराध्यः

(१)

शाखास्वटन्मर्कटतुल्यमेतन्मनो मदीयं चलतीति सत्यम् ।
संसक्तमेतद्विषयोपभोगे न केवलं तिष्ठति सत्समाजे ॥
तथा प्रवेशं न ददाति मह्यं समाधियोगाय हृदन्तराळे ।
संप्रार्थये त्वां गुरुसङ्गमार्य दयस्व भृत्यं भवदंशभूतम् ॥
मनो मदीयं भवतः पदाब्जे द्विरेफरूपेण निधेहि नित्यम् ॥

(२)

कोऽयं कुतो ह्येष समागतोऽत्र बन्धुश्च को वेति न चिन्तयैवम् ।
अयं मदीयो मम सेवकोऽयं मय्येव संयुज्यत एष भृत्यः ॥
इत्येव सञ्चिन्तय सङ्गमार्य भृत्यं सुतं भावय मां त्वदीयम् ॥

(३)

चन्द्रोदयादुच्चयमेति वार्धिस्तस्यास्तकाले परिहीयते सः ।
मुनिर्यदापः पिबति स्म वार्धेः किमागतोऽब्धेस्सहकर्तुमिन्दुः ॥
यदा तु राहुर्ग्रसते हि चन्द्रं तदा समुद्रः किमु याति मध्ये ।
न कोऽपि देव ! प्रददाति रक्षां त्वमेव दाता जगदेकबन्धुः ॥

(४)

वन्यो रसालः क च कोकिलः क तथापि सञ्जायत एव सङ्गः ।
महीध्रधात्रीलवणोदसारौ संबन्धमैतां किल नैकदेश्यौ ॥
गुहेशलिङ्गस्य ममापि सङ्गः कथं कुतो वेति न शङ्कनीयम् ।

(५)

आशानिबद्धाः शतशो मृताः पुरा तथैव चान्नात्खलु कोटिशो मृताः ।
नितम्बिनीस्वर्णभुवां कृते मृताः सहस्रशस्ते भवरोगपीडिताः ॥
विचार्यमाणे बहुधा गुहेश्वर त्वदर्थमेकोऽपि मृतो न दृश्यते ॥

---

*शरणा नाम लिङ्गायतसंप्रदायिनः साधवः । तेषां यानि भक्ति-विरक्ति-मयानि 'वचनानि' इति प्रसिद्धानि कर्णाटभाषामयानि, तेषु केषांचिदत्रानुवादाः दत्ताः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(६)

ज्ञानप्रभावाद्विनिहन्यतेऽज्ञता ज्योतिर्बलादेव तमो विहन्यते ।
ऋतप्रभावादनृतं विहन्यते तथावलोहश्च मणेः प्रभावात् ॥
भवो मदीयो हत एव देव महानुभावैः शरणैश्च सङ्गात् ॥

(७)

देवः प्रसन्नोऽभवदित्यसत्यं न हि प्रसाद्यस्सहसा हि देवः ।
तेनास्मदीया तनुरेव शोध्यते मनश्च नो नित्यमवेक्ष्यते ननु ॥
तथैव नो वित्तसमाश्रितो मदः परीक्ष्यते तत्परतः प्रलोभनैः ।
अवञ्चिते पावन एव जीवने भक्त्या सकम्पः सकृपो हि देवः ॥

(८)

सङ्गं विना नोद्भवतीह वह्निः सङ्गं विना नाङ्कुरयेच्च बीजम् ।
सङ्गं विना नास्ति शरीरभावः सङ्गं विना सर्वसुखस्य नाप्तिः ॥
देव ! त्वदीयैः शरणैश्च नित्यं संयुक्त एवानुभवं तदीयम् ।
ततश्च सौख्यं परमं लभेय सर्वोऽप्ययं मे भवतः प्रसादः ॥

(९)

जले यथा गूढतमोऽस्ति वह्नी रसश्च सस्येषु यथा निबद्धः ।
गन्धश्च पुष्पेषु यथा निरूढस्तथैव जीवेषु परो निगूढः ॥
बालासु सौहार्दमिवास्ति गूढं महेश्वरस्सर्वगतोऽपि गुप्तः ॥

(१०)

मनो निपीड्याथ गृहं विनाश्य त्रिस्रोतसस्त्वंभसि मज्जनेन ।
कं विन्दसे मानव ! पुण्यलेशम् ? गङ्गान्तिके यद्यवतिष्ठते ग्लौः ।
किं त्यज्यते तेन कळङ्क एषः ? ॥
ततश्च योऽन्यस्य मनो न पीडयन् न नाशयत्येव गृहं कदापि ।
स एव धन्यो भुवि पावनश्च तवैष योगः कपिलार्यसिद्ध ॥

(११)

श्रुत्वापि किं स्यात्पठनाच्च किं स्यात्तथैव किं वा गणनाच्च भूयः ।
तथैव संख्यानवशाद्धि किन्नु संप्राप्यते दिक्षु विधावनाच्च ॥
हित्वा पुरस्तादथ पृष्ठतश्चेत्येतादृशं भावमशेषतश्च ।
त्यक्त्वा तु डोलायनमेव चित्त ! समाश्रय त्वं गुरुसङ्गमार्यम् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# श्रीतुकारामगाथाः

अनु० एस्. एल्. ताम्बे

अभङ्गः १

समचरणमूर्तिरिष्टिकायां भाति । तिष्ठतु हरे, वृत्तिस्तत्र मम ॥ १
अधिकं नेच्छामि मायिकं पदार्थं । देव, तत्रासक्तिर्न मे भूयात् ॥ २
ब्रह्मादिपदानि दुःखस्य कारणम् । तत्रासक्तं चित्तं मास्तु मम ॥ ३
येये कर्मधर्मा नाशवन्तः सन्ति । तुको ब्रूते वर्म वयं विद्मः ॥ ४

अभङ्गः २

सुन्दरं तद्ध्यानं तिष्ठतीष्टिकायाम् । करौ कटिदेशे स्थापयित्वा ॥ १
तुलसीहारो गले पीताम्बरमङ्गे । रोचते मे सदा ध्यानमेतत् ॥ २
मकरकुण्डले श्रवणे भूषयतः । कण्ठे कौस्तुभमणिर्विराजते ॥ ३
तुको ब्रूते मम सुखमेतत्सर्वम् । द्रक्ष्यामि श्रीमुखं बहुप्रीत्या ॥ ४

अभङ्गः ३

सदा मम दृष्टिर्वसतु तव मूर्तौ । रुक्मिणीदेवीपते प्रियबान्धव ॥ १
मधुरं तव रूपं मधुरं तव नाम । मह्यं देहि प्रेम सर्वकालम् ॥ २
मम विठ्ठलमातर्वरमिमं देहि । प्रविश्य हृदयं नित्यं वस ॥ ३
तुको ब्रूते किंचिन्नाधिकं वरयामि । तव पादे सर्वं सुखमस्ति ॥ ४

अभङ्गः ३६

परेषां योषितो जननीसमानाः । मानयित्वा हानिः कीदृशी स्यात् ॥ १
अकृत्वा परनिन्दां परधनवाञ्छाम् । युष्माकं का हानिर्ब्रूत ब्रूत ॥ २
वदतो 'राम, राम' स्वासने तिष्ठतः । कति श्रमाः सन्ति ख्यात ख्यात ॥ ३
सतां वचनेषु विश्वासो निहितः । युष्माभिर्हीयते किं कथ्यताम् ॥ ४
सत्यभाषणे च कति सन्ति श्रमाः । का वा हानिरस्ति तत्कथ्यताम् ॥ ५
अनेनाचारेण देवप्राप्तिरस्ति । तुको नापेक्षते किंचिदन्यत् ॥ ६

अभङ्गः ३७

विशुद्धेभ्यः सुबीजेभ्यः । निसर्गनियमान्वयात् ॥
फलानि खलु जायन्ते । स्वादूनि सुन्दराणि च ॥ १
सुधामयी मुखे वाणी । देवकार्ये रतः सदा ॥
साधोश्चित्तं तस्य कथम् । सत्यं सर्वाङ्गनिर्मलम् ॥ २
यथा गङ्गा जलं लोके । पवित्रं पावनं तथा ॥
दर्शनेन तुको ब्रूते । तापभङ्गः सुखागमः ॥ ३

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अभङ्गः ६३

सुखं सर्षपसमानम् । दुःखं पर्वतप्रमाणम् ॥ १
चित्ते धारय स्मरणं दृढम् । मानय सत्पुरुषवचनम् ॥ २
आयुरर्धं नीतं रात्र्या । शेषं बालत्वजराभ्याम् ॥ ३
तुको ब्रूते, 'मूढ । मायामोहवञ्चितोऽसि' ॥ ४

अभङ्गः ६६

संसारतापेन सन्तप्तोऽस्मि देव । कुटुम्बस्य सेवाकार्ये व्यग्रः ॥ १
तस्मात्संस्मरामि चरणौ त्वदीयौ । एहि मम मातः पाण्डुरङ्ग ॥ २
जन्मजन्मान्तरे भारवाहकोऽस्मि । मुक्तता नास्तीति वर्म जाने ॥ ३
चोरैर्वेष्टितोऽहमान्तरैर्बाह्यैश्च । कुरुते नानुकम्पां कोऽपि मयि ॥ ४
भृशं भ्रंशितोऽस्मि भृशं वञ्चितोऽस्मि। बहुतिथं कालं परिश्रान्तः ॥ ५
तुको ब्रूते, 'धाव वेगेन संप्रति । दीननाथव्रतं सत्यं कुरु' ॥ ६

अभङ्गः ७६

अतः परं युष्मानुपदिशाम्येतत् । व्यर्थं मा क्षिपत स्वीयमायुः ॥ १
सर्वेषां चरणेषु दण्डवत्प्रणामाः । शुद्धं कुरुत चित्तं स्वं स्वं सर्वे ॥ २
देवं चिन्तयत हितकरं भवेत् । भावेन निजमनः शुद्धं कृत्वा ॥ ३
तुको ब्रूते 'कर्म कुरुत हितकरम् । बहुशासनेन वदत कोऽर्थः' ॥ ४

अभङ्गः १२३

सुवर्णस्य पात्रं क्षीरेण सम्भृतम् । भक्षणार्थं दत्तं कुक्कुराय ॥ १
मुक्ताफलहारः खरकण्ठार्पितः । कस्तूरिका लिप्ता सूकराङ्गे ॥ २
वेदपरायणो बधिरमुपदिशति । बधिरः कथं वेत्ति मर्म तस्य ॥ ३
तुको ब्रूते 'ज्ञाता केवलं जानाति । भक्तेर्महिमानं साधुर्वेत्ति' ॥ ४

अभङ्गः १२५

धर्मरक्षणार्थं । महायत्नान्कुर्मः ॥ १
वेदनीतिं वाचा वच्मः । करिष्यामः सद्भिः कृतम् ॥ २
कर्मत्यागी, विना ब्राह्मीम् । स्थितिं नीचः स मानवः ॥ ३
तुकस्तमधमं ब्रूते । 'हरिभक्तेः स दूषकः' ॥ ४



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अभङ्गः १२६

यस्योदरे चतुर्दश भुवनानि । स एव सञ्चितोऽस्माभिः कण्ठे ॥ १
अस्माकं सदने किं वस्त्वस्ति न्यूनम् । ऋद्धयः सिद्धयो द्वारि स्थिताः ॥ २
येन पादतले चूर्णिता असुराः । बद्धाञ्जलिरसावस्मदग्रे ॥ ३
न रूपं न रेखा न यस्य चाकारः । अस्माभिः स भक्तैर्दत्ताकारः ॥ ४
अनन्तब्रह्माण्डानि यस्याङ्गे तिष्ठन्ति । पिपीलिकासमः सोऽस्मत्कृते ॥ ५
पादेन प्रहृता ऋद्धयः सिद्धयः । कियती मात्रा तत्र प्राकृतस्य ॥ ६
तुको ब्रूते, 'वयं देवादपि श्रेष्ठाः । संजाता दुराशां दूरीकृत्य' ॥ ७

अभङ्गः १२८

तौ मम बान्धवौ सज्जनौ सुहृदौ । स्मरामि चरणौ विठ्ठलस्य ॥ १
अन्यानहं मन्ये विधिपालनार्थं । भूतानि देवस्य तानि मत्वा ॥ २
सर्वथाहं जातो वैष्णवानां दासः । इच्छामि सेवितुं तदुच्छिष्टम् ॥ ३
तुको ब्रूते यथा हरिदासाः प्रियाः । तथा मह्यमन्ये न रोचन्ते ॥ ४

अभङ्गः १३१

कन्या गच्छति श्वशुरगृहं । परावृत्य पश्यति पश्चात् ॥ १
तादृगवस्था मम जीवस्य । कदा द्रक्ष्यामि केशवम् ॥ २
यदि माता न दृश्यते । बालः सोत्कण्ठः पश्यति ॥ ३
जीवनं विना यथा मत्स्यः । तथैवार्त एष तुकः ॥ ४

अभङ्गः १४१

तृषितस्य कामना । पूरिता न गङ्गा क्षीणा ॥ १
मम मनोरथाः सिद्धिं । यान्तु देव कृपानिधे ॥ २
उदाराणामग्रेसरः । त्वमसि ममाल्पा वासना ॥ ३
कृपादृष्ट्या विलोकय । तुको ब्रते 'भव सहायः' ॥ ४

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# श्रीकबीर - अनुवादः*

अनु० चन्द्रशेखर रामचन्द्र ताम्बे

प्रभुस्ते हृदये नित्यमामोदः कुसुमे यथा ।
द्रष्टुं तृणेषु कस्तूरीं मृगस्य भ्रमणं मुधा ॥ १ ॥

दुःखे स्मरति सर्वोऽपि प्रभुं कोऽपि सुखे न तु ।
सुखे चेत्स्मरणं कुर्यात्तर्हि दुःखं कथं भवेत् ॥ २ ॥

तिष्ठतो गुरुगोविन्दौ प्रागहं प्रणमामि कम् ।
गुरो! दर्शितगोविन्दो वन्द्यः पूर्वं भवानिह ॥ ३ ॥

सञ्चरन्ती करे माला भ्रमन्ती रसना मुखे ।
मनस्तु दिक्षु दशसु भ्रमत्येतन्न चिन्तनम् ॥ ४ ॥

ईदृशस्तु भवेच्छिष्यः सर्वस्वं गुरवेऽर्पयेत् ।
ईदृशश्च गुरुः शिष्यादाददीत न किञ्चन ॥ ५ ॥

एतावद् दीयतां स्वामिन्! यावता भ्रियते कुलम् ।
क्षुधितो नाप्यहं वर्ते न च गच्छेत्तथातिथिः ॥ ६ ॥

साधुं जातिं नैव पृच्छेत्प्रष्टव्यं ज्ञानमेव हि ।
मूल्यं खड्गस्य कर्तव्यं खड्गाधानं तु तिष्ठतु ॥ ७ ॥

कबीरो भाषतेऽन्येषां सत्सङ्गो व्याधिनाशकः ।
असत्सङ्गः शुभोच्छेदी लोकेऽष्टप्रहरेष्वपि ॥ ८ ॥

एतादृशो भवेत्साधुः स्वभावो यस्य शूर्पवत् ।
सारं सारं समादाय निपुणः फल्गुवारणे ॥ ९ ॥

रूक्षं शुष्कं भक्षयित्वा पिब शीतं जलं मुदा ।
परस्य घृतसंयुक्तं वीक्ष्य चित्तं न लुभ्यतु ॥ १० ॥

येनान्विष्टं तेन लब्धं गभीरेष्वपि वारिषु ।
वराको मज्जनाद् भीतस्तट एव निषीदति ॥ ११ ॥

---

*प्राचीनहिन्दीवाङ्मये सुप्रसिद्धस्य भक्तवरस्य कबीरनाम्नः महात्मनः कतिपयदोहापद्यानामनुवादः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उन्नतेनापि किं तेन यथा खर्जूरपादपः ।
पान्थानां न कृते छाया फलान्यप्यतिदूरतः ॥ १२ ॥

असन्तं द्रष्टुकामोऽहं गतः कमपि नालभे ।
यदान्विष्यामि हृदयं मादृशो न ह्यसज्जनः ॥ १३ ॥

आयान्तं मालिनं दृष्ट्वा कलिकाः क्रोष्टुमुद्यताः ।
पुष्पिताः सञ्चिता अद्य क्रमोऽन्येद्युस्तथा हि नः ॥ १४ ॥

योधास्तिष्ठन्ति परितः सर्वे व्यर्थपरिश्रमाः ।
प्रासादमध्यान्निष्कास्य क्रूरः कालो विनिर्गतः ॥ १५ ॥

चलन्तीं पेषणीं* प्रेक्ष्य कबीरो रोदिति त्वहो ।
उभयोः शिलयोर्मध्ये सकलः कोऽवशिष्यते ॥ १६ ॥

कुमुदिनी सलिले विकसत्यहो, वियति यद्यपि भाति सुधाकरः ।
प्रियकरं किल सिध्यति यस्य यद्, भवति तस्य तदेव समीपगम् ॥ १७ ॥

यत्कार्यं श्वस्तत्किलाद्यैव कार्यं कुर्याः सम्प्रत्यद्य यत्कार्यमस्ति ।
आगच्छेच्चेदप्ययोऽपि क्षणेऽस्मिन्, कार्यं भूयस्त्वं विदध्याः कदा नु ॥१८॥

मृत्तिका वदति कुम्भकारकं, मामकं तु विदधासि मन्थनम् ।
आगमिष्यति स वासरो ध्रुवं, मन्थनं तव मया विधास्यते ॥ १९ ॥

ब्रूते कबीरः कुरु मेह गर्वं, कालेन केशाः करयोर्गृहीताः ।
न ज्ञायते कुत्र हनिष्यतेऽसौ, स्वैरं स्वदेशेऽप्यथवा विदेशे ॥ २० ॥

त्वत्कृते वपति कण्टकं हि यस्तत्कृते कुसुममेव रोपय ।
त्वत्कृते भवति पुष्पमेव तत्, तत्कृते तु भवति त्रिशूलकम् ॥ २१ ॥

यदपि सहजमाप्तं ज्ञायतां दुग्धतुल्यं
भवति सलिलकल्पं याचनेनेह लब्धम् ।
अथ रुधिरसमं तद्विद्धि युद्धादुपात्तं
कथयति हि कबीरश्चिन्तनीयोऽत्र पन्थाः ॥ २२ ॥

---

*'चक्की' इति भाषायाम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# मधुगाथा*

वे. राघवः

चैत्राण्यमूनि हि दिनान्यधुनेह जाग्र-
त्युद्बोधयन्त्यसमबाणसखं वसन्तम् ।
नानाविधश्रिविकचप्रसवावलीभि-
राबद्धमञ्जुलवतंसविराजमानम् ॥ १ ॥

माकन्दकन्दलरसान्धपिकोऽत्र कूज-
त्युन्मादकाकलिकलापमयं वनान्ते ।
कीराङ्गनाललितचाटुवचश्च तेन
साहित्यवत् सहृदयोन्मदनं समेति ॥ २ ॥

उत्फुल्लसान्द्रमकरन्दभृतप्रसून-
सौरभ्यमाकिरति दिक्षु सरोऽम्बुशीतः ।
मन्दानिलोऽत्र मलयद्रुमगन्धवाहः
कर्णान्तिके मदनमन्त्रजपं व्र कुर्वन् ॥ ३ ॥

सोऽयं तमालविटपी परिकीर्य शाखा
उल्लोचमुष्णकररोधिनमातनोति ।
प्रच्छायशीतलतलेऽस्य विसारितास्ते
शय्या च शैवललनवरूढघासैः ॥ ४ ॥

कासारतीरभुवि पद्मबिसाशहंस-
कूजार्पितश्रुतिगवोज्झितघासपाल्याम् ।
चिन्तोपगूहनरसेन सुखं शयान
एषोऽत्र दीर्घमनने मन आदधामि ॥ ५ ॥

उत्साह एष जनतासु कियानसारः
उद्रेकिणः कियदधः प्रतिभान्ति फल्गु ।
उत्कर्षिणः कियदमर्षणशालिनश्च
ग्रामश्रियामिह पुरी वितथा विभाति ॥ ६ ॥

---

*आङ्ग्लकवेः 'ग्रे' - नामकस्य 'Ode to the Spring'-नामकं खण्डकाव्यमालम्ब्य रचिता ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संप्रत्युपर्यतिगतो गगनार्धमार्गं
विश्रम्य किञ्चिदिव तिष्ठति सप्तसप्तिः ।
चिन्तोरुकर्मकरपाणिरपि प्रशान्तः
शेते भृशोच्छ्वसितकारि गवां कदम्बम् ॥ ७ ॥

अङ्गात्र झङ्कृतिरवाश्च समुज्जिहाना
उद्योगिसंकुलहरित्सु तथापि पश्य ।
लोलम्बपुञ्ज इह मञ्जुलकुञ्जमेत्य
गुञ्जत्यसौ मधुनि लम्पटतां निबध्नन् ॥ ८ ॥

केचिच्च चित्रशलभा बहुवर्णचित्र-
पत्रं प्रसार्य परितो विटवद् भ्रमन्ति ।
एवंविधेयमथवा जनतापि सूक्ष्म-
दृष्टेः स्फुरत्यचिरभाग्यतटिद्विलासा ॥ ९ ॥

ये ये कृमिप्रसरणाश्च वयोवयस्याः
भूमौ निलीय विचरन्ति नभश्चरा वा ।
ते ते जना यत उपक्रममारभन्त
नूनं लभन्त उपसंहरणं च तत्र ॥ १० ॥

उद्योगिनः सुखभुजश्च समं तथैव
स्वायुर्दिने तनुनि संविलसन्ति लास्यैः ।
लक्ष्मीविवर्तपरिवर्तवशादनेक-
संभिन्नभिन्ननचिरश्रिय आवसानाः ॥ ११ ॥

तीक्ष्णापदा व्यपघृणं परिमर्द्यमाना
आयुःक्षयाच्छिशिरिता जरयापहास्याः ।
मुक्त्वान्ततो गगनलास्यमसारमेतद्
गच्छन्ति भस्मविधया विलयं कुतोऽपि ॥ १२ ॥

एवं विचिन्तयति मय्यधिधर्मचिन्ता
लीलोत्तरोक्तिमिव मन्दमहं शृणोमि ।
निर्भाग्य ! हा मननशोषित ! कस्त्वमेव-
मेकाकितामुपगतो व्यथसे वृथैव ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रामा न कापि समुपैति महे भवन्तं
माध्वी चिता तव न काप्युपभोक्तुमास्ते ।
चित्रं न ते वसनमस्ति, न वा सहाया
अङ्गं च हन्त तव नैव विलासयोग्यम् ॥ १४ ॥

क्षिप्रं पलायितमहो तव यौवनं तद्
अस्तं गतस्तव स भासुररश्मिमाली ।
नूनं गतस्तव गतस्स वसन्तमासः
चैत्रो न एष, वयमद्य मुदा ललामः ॥ १५ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# सम्मोदवीचिः*

डा० हरिहर त्रिवेदी

१

आलोकवर्त्मनि मम प्रथमं पतन्ती
सम्मोदवीचिरिव सा सुतरामराजत् ।
लावण्यवारिझरपूरमिवोत्किरन्ती
सम्प्रेषिता नयनयोरचिरोत्सवाय ॥ १ ॥

तस्या दृशौ शुचिदिवामुखतारकाभे
कान्तः प्रदोषकपिलः कबरीविलासः ।
अन्यत्तु सर्वमपि तां सृजता विधात्रा
प्रत्यूषसः खलु चितं कुसुमाकराद्वा ॥ २ ॥

मूर्त्तं नु लास्यं किमुताकृतिर्वा मुदो नु सा मोहयतीव लोकम् ।
मुहुर्मुहुर्विस्मयकारिणीव प्रकाममाक्रामति मानसं मे ॥ ३ ॥

२

निर्वर्ण्य सन्निधिगतामथ तां शुभाङ्गीं
सत्त्वं पुनश्च ललनां च तथैव मन्ये ।
सोल्लासमप्रतिहतं गृहिणीचरित्रं
स्वाच्छन्द्यलाघवमनोज्ञगतेरमुष्याः ॥ ४ ॥

पूर्वस्मृतिं सुमधुरामथ संश्रवं च
तुल्यं व्यनक्ति मुदितं मुखमेतदीयम् ।
सृष्टिक्रमे प्रतिदिनस्य च साहचर्ये
सा नैव शोभनतरा न च दिव्यरूपा ॥ ५ ॥

क्षणव्यथां निष्कपटं च भावं स्तवानुरागस्मितचुम्बनानि ।
अश्रूण्युपालम्भमयीं च वृत्तिं व्यनक्ति काले ललनामणिः सा ॥ ६ ॥

---

*विल्लियम् वेड्स्वोर्त् नामकस्याङ्ग्लकवेः 'She was a Phantom of Delight' इति कविताया रूपान्तरम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

३

ध्यात्वा तु शान्तमनसाथ पुनः पुनस्ताम्
आकारकल्पितसमुन्नतभावशीलाम् ।
बोधप्रदर्शनकरीं सहचारिणीं च
धीरोपपत्तिपृथुसंयमशीलवृत्तिम् ॥ ७ ॥

प्राग्दृष्टिधैर्यपटुताक्षमताभिरामाम्
आदेशबोधपरिसान्त्वनकर्मदक्षाम् ।
निर्माणशिल्पकुशलेन विचार्य धात्रा
सृष्टां जगत्यभिनवां सुषमामनन्याम् ॥ ८ ॥

क्षणे क्षणे भिन्नविकल्पमुग्धो यदा यदा तां ललनाममन्ये
तदैव सा मे प्रतिभासते स्म दिव्यप्रकाशस्फुटसत्त्वरूपा ॥ ९ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# स्वर्णपुष्पाणि*

डा० हरिहर त्रिवेदी

क्षितिधरतटभूमौ कन्दराणां च देशे
सलिलधर इवाहं सञ्चरन्नद्वितीयः ।
कनककुसुमपङ्क्तिं वायुलोलप्रनृत्ता-
मुपसरसि तरूणां मूलभूम्यामपश्यम् ॥ १ ॥

पुलिनतटरुहाणां व्योमगङ्गोडुभासा-
मविरतपृथुरेखासीमविस्तारभाजाम् ।
सरसि दशसहस्राण्येकदृक्पात एव
प्रमुदितमृदुलास्याचालिताङ्गान्यपश्यम् ॥ २ ॥

सविधजलतरङ्गोत्कृष्टसौन्दर्यधाम्नां
सहवसतिरमीषां मोदहेतुर्नु सूरेः ।
स्फुरदपरिमिताभां तां पिबन्निर्निमेषः
श्रियमतनुमुदः स्वां बोद्धुमासं न शक्तः ॥ ३ ॥

भूयो भूयो मयि तु शयनं संश्रिते, ध्यानमग्ने
शून्ये वा मे मनसि, नितरां निर्जनत्वात्प्रसन्ने ।
अन्तर्दृष्टौ स्फुरति सुमनःसंहतिः सा नितान्तं
हर्षोत्फुल्लं हृदपि कुसुमैर्नृत्यतोवाशु सार्धम् ॥ ४ ॥

---

*तस्यैवाङ्ग्लकवेः 'Daffodils' इति कवितायाः संस्कृतरूपान्तरम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# अन्धकुमारः* ।

एल्. जे. खरे

आलोकनामविषयो वद कस्स कीदृग्
योऽसौ ममात्र भविता न कदापि भोग्यः ।
सौख्यानि कानि विविधानि ददाति दृष्टि-
र्भ्रूताऽन्धबालकमिमं भवतां वराकम् ॥ १ ॥

दृश्यानि शंसथ चमत्कृतिमन्ति यूयं
सूर्यो विभाति वदथेति च दीप्तियुक्तः ।
सूर्योष्णतामनुभवामि परं, न जाने
भानुः कथं स दिवसं रजनीं च कुर्यात् ॥ २ ॥

रात्रिं स्वयं मम करोमि दिनं च तद्वद्
स्वापे निशा भवति केलिकृतो दिनं मे ।
निद्रां विनाऽविरतजागरणं यदि स्या-
च्छक्यं, तदा दिवस एव सदा भवेन्मे ॥ ३ ॥

नित्यं शृणोमि सहनिश्वसितां शुचं वो
निर्दिश्य मे हतविधिप्रभवामवस्थाम् ।
या सर्वथाप्यविदिता क्षतिरस्ति कापि
सह्या भवेन्ननु मया भजता तितिक्षाम् ॥ ४ ॥

तस्मान्मयेह खलु यन्न कदापि लभ्यं
तच्चिन्तनं न विलिनातु मनःप्रसादम् ।
गायामि यावदिति हन्त भवामि राजा
यद्यप्यहं विगतदृष्टि-वराक-बालः ॥ ५ ॥

---

*Cibber, Colley इत्याख्यस्य आङ्ग्लकवेः 'The Blind Boy' इति ख्यातस्य खण्डकाव्यस्यानुवादोऽयम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# "तस्या वीरपती रणाङ्गणहतो नीतो यदा मन्दिरम् ।"*

एल्. जे. खरे

तस्या वीरपती रणाङ्गणहतो नीतो यदा मन्दिरं
मोहं सा न गता; तथैव च तया शोकेन नाक्रन्दितम् ।
दास्यस्तद्वदनं विकाररहितं निर्वर्णयन्त्योऽवदन्
'अस्मभ्यं प्रतिभाति राज्यमनया नो चेदियं नङ्क्ष्यति' ॥ १ ॥

प्राशंसन् मिलिता जना मृदुपदैर्मन्दं तदा स्वर्गतं
प्रेमार्हं समबोधयन्नवितथं मित्रं तमाहुर्भृशम् ।
शत्रूणां विषयेऽप्युदारहृदयश्चासीदसौ तेऽब्रुवन्
शृण्वत्येव च सा न किंचिदवदत् किंचिन्नवाऽचेष्टत ॥ २ ॥

दासी काचिदनन्तरं च निभृतं त्यक्त्वा स्वकीयासनं
निःशब्दं व्यचरच्छनैरुपगता वीरस्य तस्यान्तिकम् ।
वस्त्रं तद्वदनावगुण्ठनमसौ वक्त्रादपासारयद्
दृष्ट्वा सा मृतभर्तुरास्यमपि नारोदीत् स्थिता निश्चला ॥ ३ ॥

धात्री कापि समुत्थिता तु नवतिर्वर्षाणि यस्या वयः
धृत्वा तस्य शिशुं तदा च जननीजानौ न्यधत्त प्रियम् ।
तत्स्पर्शेन निदाघवृष्टिरिव तन्नेत्राम्बु सद्योऽक्षरत्
सास्रं साऽऽह च मञ्जु वत्स मम भो जीवामि हेतोस्तव ॥ ४ ॥

---

* 'Home they brought her warrior dead' इति 'टेन्निसन्'-आख्यस्य कवेः खण्डकाव्यस्यानुवादः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## मञ्जरीः प्रति ।*

एल्. जे. खरे

मञ्जर्यः प्रसविष्यतः फलितरोर्वार्तां वहन्त्यः शुभां
यूयं किं पतथ द्रुतं यदपि वोऽतीतो न यानावधिः ।
कंचित्कालमिहैव तिष्ठत रुचं स्वां धारयन्त्यः सुखं
सव्रीडस्मितसुन्दरं, तदनु भो गन्तुं क्षमं वोऽन्ततः ॥ १ ॥

किं यूयं विधिनाऽल्पकालसुखदा इत्येव भो निर्मिता-
स्तावच्छर्म वितीर्य कालभवनं गन्तुं किमाज्ञापिताः ।
हा धिक् कष्टमिदं ध्रुवं यदसृजद्युष्मान्निसर्गो मुधा
यः संदर्श्य गुणप्रकर्षमचिरान्नाशाय वः सज्जति ॥ २ ॥

ग्रंथस्य स्थ सचेतनान्यवितथं यूयं तु पर्णानि भोः
सत्यं येषु वयं पठेम लिखितं यद् 'वस्तु मात्रं त्विह ।
अत्यन्तं सुभगं समर्थमपि वा युष्मत्समं भङ्गुरं
काले नश्यति लोकसंमुखमहो दर्पं प्रदर्श्यात्मनः' ॥ ३ ॥

---

* 'हेरिक्'-आख्यस्याङ्ग्लकवेः "To Blossoms" इति ख्यातस्य खण्डकाव्यस्यानुवादः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# निकषोपलः

## १. वेदलावण्यम् (भागद्वयात्मकम्)

प्रणेता डा० सुधीर कुमार गुप्तः । एम्. ए. पी. एच्डी. बी. ए. ऑनर्स्, शास्त्री, प्रभाकर, आचार्यः, संस्कृतविभागः, गोरखपुर विश्वविद्यालयः, गोरखपुरम् । प्रकाशनस्थानम् : भारती मन्दिर, ४ हीरापुरी, गोरखपुर । मूल्यम् प्र. भागः रू. ८-२५. द्वि. भागः २-५०.

एतद्ग्रन्थप्रणेत्रा विरचिताः, पूर्वनिर्दिष्टप्रकाशनस्थानेन प्राकाश्यं नीताः हिन्दीभाषानुवादरूपाः, संस्कृतव्याख्यानरूपाश्च अन्येऽपि केचिद् ग्रन्थाः विमर्शनार्थमागताः । तेऽपि क्रमशोऽत्र विमृश्यन्ते ।

'वेदलावण्यनामकस्य ग्रन्थस्यास्य प्रथमभागतया परिगणनीयेऽस्मिन् पुस्तके, पारस्करगृह्यसूत्रनामकस्य कर्मकाण्डप्रक्रियाबोधकस्य सूत्रग्रन्थस्यैकदेश-भूतानि उपनयनसंस्कारप्रतिपादकानि सूत्राणि व्याख्यातानि । तत्सन्दर्भे आश्वलायन-आपस्तम्ब-गोभिलगृह्यसूत्रैर्विहितानां प्रक्रियाणां पारस्करगृह्यसूत्र-विहितानां च पारस्परिको विभेदः सुस्पष्टं विमृष्टः ।

ऋग्वेदीयानि विष्णुसूक्त-पुरुषसूक्तानि संहितापाठपदपाठैः सहितानि सायणभाष्य-हिन्दीभाषानुवादाभ्यां साकमेतद्ग्रन्थस्योत्तरं भागमलङ्कुर्वन्ति । तत्र तत्र विवृतिमपेक्षमाणानां पदानां टिप्पणं च दत्तमास्ते । वेदप्रामाण्यविषये प्राचीनपरिपाटीस्थाने नवीनयुक्तिसङ्गतविवरणोपस्थापकत्वेनास्य ग्रन्थस्य वेद-लावण्याख्यां सङ्गमयत्ययं ग्रन्थकारः । वैदिकस्वरवैदिकव्याकरणविवरणपरौ च द्वावध्यायौ वर्तेतेऽत्र ग्रन्थान्ते । हिन्दीभाषाविदां वैदिकश्रद्धावतां चायं ग्रन्थो मोदमापादयेदित्ययमस्मदाशयः ॥

## २. वेदलावण्यम् (द्वितीयो भागः)

अत्र हिरण्यगर्भप्रजापतिसूक्तस्य वाक्सूक्तस्य संहितापाठः पदपाठश्च सस्वरं प्रकाशितौ । यथापूर्वं सायणभाष्यं, हिन्दी-अनुवादः, टिप्पणी चेत्येते अंशाः परिदृश्यन्ते । अन्ते वेदलावण्य-ऋक्सूत्राणां, टिप्पणीषु व्याख्यातानां च वर्णानुक्रमणिका संयोजिता ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## ३. गायत्रीमन्त्राक्षराणामृषिच्छन्दआदयः

चतुर्विंशत्यक्षरात्मिकायां गायत्र्याम् एकैकस्य मन्त्राक्षरस्य ऋषिः, छन्दः, देवता, तत्त्वं, शक्तिः, वर्णः, मुद्रा, न्यासः, विनियोगः इत्येते अंशाः ब्राह्मण-निरुक्तादीन्यनुसृत्य ग्रन्थेऽस्मिन् संस्कृते हिन्दीभाषायां च निरूपिताः।

अपूर्णोऽयं ग्रन्थः ८८ तमे पृष्ठे विश्राम्यति। मूल्यमज्ञातम्। परिशिष्टभागे दत्तानि अग्न्यादिदेवतानां वेदसम्मतानि शताधिकानि नामान्तराणि परितोषमुपजनयन्ति; निरूपयन्ति च ग्रन्थप्रणेतुः परिश्रमं, विमर्शनचातुरीं च।

## ४. वेदभाष्यकारों का आलोचनात्मक अध्ययन

ग्रन्थेऽस्मिन् वेदभाष्यकाराणां, तथा वेदसंहितामन्त्रयोर्व्याख्यातॄणां च विचारधारा-विवेचनपाटवशैल्यादिविषये विमर्शनात्मकमवलोकनं कृतम्। माधवभट्टः, स्कन्दस्वामी, उद्गीथः, वेङ्कटमाधवः, माधवभरतस्वामिनौ, उवटमहीधरौ, सायणः, वररुचिः, भट्टभास्करः, चतुर्वेदस्वामी, गुणविष्णुः, हरदत्तः, मुद्गलः, आनन्दबोधः, देवपालः, कालनाथः, रावणः, द्याद्विवेदः, शौनकः, भट्टोजीदीक्षितः, आत्मानन्दः, मध्वः, दैवज्ञपण्डितसूर्यः इत्येवं त्रयोविंशाः प्राचीना वेदभाष्यकारा अत्र विमर्शनविषयीकृताः। अन्ते आधुनिकसाम्प्रदायिक-भाष्यकृतां च शैल्यादिविषये विमर्शः कृतः। अत्र माक्समूलराख्यस्य तथान्येषाम् आधुनिकव्याख्यातॄणां वेदविचारधारापि विमर्शविषयीकृता। १०४ तमेन पुटेनायमप्यसम्पूर्णो ग्रन्थ इत्याभाति। वैदिकविमर्शकानां कृतेऽयमत्यन्तोपयोगी ग्रन्थः। अज्ञातमूल्यः।

## ५. ऋग्वेद के ऋषि और उनका दर्शन और सन्देश मूल्यं रू. ३-५०

केरलविश्वविद्यालयसम्बन्धि केरलवर्मा वलिय-कोयिलूतम्बिरान्-स्वर्णपदकेन सम्भावितोऽयं लेखः। वेदार्थपरिज्ञानाय ऋषिच्छन्दोदेवता-नामवगमस्यापरिहार्यतां स्पष्टयत्यस्मिन् ग्रन्थेऽयं विमर्शकः। अपि च वेदार्थ-परिज्ञानविषये ऋषिच्छन्दआदीनामनुपयुक्ततां भावयतो दयानन्दसरस्वती-महाशयस्याऽऽशयं सयुक्तिकं खण्डयत्ययं ग्रन्थकारः। आंग्लानुवादेन हिन्दी-मूलेन च साकं सन्दृब्धोऽयं ग्रन्थः सर्वत्र समादरमुपलभेतेत्याशास्महे॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## ६. सूर्यदैवज्ञपण्डितविरचितं वेदमन्त्रादीनां भाष्यम्

विंशतिपुटात्मकोऽयं लघुग्रन्थः "अग्निमीड" इत्यादीनां कतिपयानामृङ्मन्त्राणां भाष्यमुद्वहति । तत्तादृङ्मन्त्रोपबृंहणत्वेनोद्धृताः श्रीभगवद्गीताश्लोकाः भाष्यस्यास्य पुष्टिमुपजनयन्ति । उपोद्घाताद्यङ्गराहित्यादस्य सम्पूर्णता सन्देहविषयीक्रियते ॥

## ७. रावणभाष्यम्

केवलं द्वात्रिंशत्पुटात्मकेऽस्मिन् लघुग्रन्थे "तद्विष्णोः परमं पदं," "द्वा सुपर्णा" इत्यादीनां त्रयोदशसंख्याकानां ऋङ्मन्त्राणां रावणकृतं भाष्यं प्रकाशितमस्ति । एतद्ग्रन्थस्य प्रथमपरिशिष्टे मन्त्राणां पदच्छेदः, द्वितीये च भाष्यसम्बन्धि-हिन्दीभाषानुवादश्च वर्तेते । लघुरप्ययं ग्रन्थो नाम्ना, विषयविन्यासेन च हृदयमावर्जयति । मूल्यमज्ञातम् ॥ —की. श्री.

## सुगलार्थमाला

ब्रह्मश्रीनारायणद्विजवरैः प्रणीता । तदन्तेवासिना श्रीदामोदरपिषारकेण विरचितया दीपिकयोज्ज्वलिता । मूल्यं सार्धं रूप्यकद्वयम् । प्राप्तिस्थानम् : Sri P. Narayana Nampootiri, Srinadam, Mukkalivattam, Tripunithura, Kerala.

संस्कृतभाषायां व्याकरणपरिनिष्ठितपदप्रयोगोदाहरणत्वेन प्रणीताः भट्टिकाव्यं, धातुकाव्यं, वासुदेवविजयम् , इत्यादिका ग्रन्था वर्तन्त एव । अथाप्यस्यां भाषायां परस्परव्यवहारकाले एकस्मिन्नेव वाक्ये कालत्रयसंबद्धतयैव प्रयोगश्शुद्ध एव क्रियते । अनुभवसिद्धश्चायम् । परन्तु ईदृशलकारप्रयोगे किं नियामकं कीदृशी शास्त्रप्रवृत्तिः इत्यादिकं सविमर्शमनूद्य उदाहरणरूपतया छन्दोनिबद्धोऽयं ग्रन्थः इदम्प्रथमतयाऽवतीर्णः, ईदृशप्रयोगकुतूहलिनामवश्यमादरणीयः । किञ्च विषयस्यास्य दुरूहत्वात् तदर्थमनायासेनावगन्तुमस्य व्याख्या च यथायथं विलिख्य मुद्रिता प्रकाशिता च । चतुरश्रं मुद्रणम् । ग्रन्थः छिष्ट इति नामैवावगमयति-सुगलार्थमाला-इति । एतदर्थवर्णनं च इदंग्रन्थद्वितीयखण्डद्वितीयश्लोकेन कृतमस्ति । षट् खण्डा अत्र विद्यन्ते, आहत्य च १३० श्लोकाः । नवीनोऽयं ग्रन्थः शब्दाभिमानिभिरतीवादरणीयः ॥

—अ. मु. श्री.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## विमर्शामृतम्

श्रीपूर्णानन्दभारतीस्वामिविरचितम् । रा. श्रीनिवासशास्त्री, राममन्दिर-वीथी, सत्यनारायणपुरम्, विजयवाडा—३. मूल्यं रू. ५.

सनातनधर्मप्रचारबद्धादरैः साम्प्रदायिकैः यतिवर्यैः विरचितोऽयं ग्रन्थः । अत्र तिथितत्त्वं, चन्द्रसूर्ययोः मिलितयोः ऋतुहेतुत्वं, भूभ्रमणवादस्य दृग्गणितस्य च प्रामाणिकत्वं, मनसो विभुत्वं, श्रीविद्यारहस्यम्, आयुर्वेदस्य भारतीयानामावश्यकता, सगोत्रताविवाहस्य असवर्णविवाहस्य च दुष्टफलत्वम्, अद्वैतदृष्टेः लौकिकदृष्ट्यविरोधः, श्रीकृष्णस्य जारचोरत्वादिनिराकरणम् इत्यादयो विषयाः विमृश्य निर्धारिताः । आस्तिकैः अवश्यमुपादेयोऽयं ग्रन्थः ॥

—श्री. सु. शास्त्री

## श्रीमन्मरुच्छास्त्रसारसङ्ग्रहः, सद्भक्तिदर्पणं च

ग्रन्थद्वयमिदं शास्त्ररत्नं ची. रघुनाथाचार्यविरचितम् । प्राप्तिस्थानम् : २९, हयवदनसदनम्, ६ ने. वीथी, चामराजपेट, वेङ्कटूर्—१८. मूल्यं ०. ५०; १. ७५.

तत्र मरुच्छास्त्रसारसङ्ग्रहः "मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा" इति श्रीमध्ववचनव्याख्यामिषेण अद्वैतखण्डनपरः । खण्डनयुक्तयस्तु प्रायः प्राचीनैरुद्भाविता एव श्रीमधुसूदनसरस्वत्यादिभिः निरस्ताश्च । सद्भक्तिदर्पणं तु श्रीमध्वाचार्याभिमतमोक्षसाधनानि तद्ग्रन्थानुसारेण प्रतिपादयति । भक्तिज्ञानवैराग्याणां मोक्षसाधनानां कस्य प्राधान्यं कस्य वा गुणत्वमित्यपि विवेचयति । ग्रन्थद्वयमपि अशुद्धिबहुलत्वात् दीर्घतरां शुद्धिपत्रिकामपेक्षते ॥

—श्री. सु. शास्त्री

## परतत्त्वदिग्दर्शनपरीक्षा

श्रीकाञ्ची-प्रतिवादिभयङ्करश्रीमदण्णङ्गराचार्याणां कृतिः । मूल्यम् ५० पैसा । प्राप्तिस्थानम् : ग्रन्थमाला आफीस्, काञ्चीपुरम् ।

अस्यां कृतौ देहलीपुरवास्तव्यमाधवाचार्यशास्त्रिलिखितस्य परतत्त्व-दिग्दर्शनाख्यग्रन्थस्य स्थालीपुलाकन्यायेन कञ्चिदंशमनूद्य सर्वात्मनेदमसङ्गतमिति बहुमुखमुपन्यस्तम् ॥

—अ. मु. श्री.



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## संस्कृतस्तोत्रग्रन्थाः

आङ्ग्लान्ध्रानुवादसहिताः । प्राप्तिस्थानम् : श्री. पिं. कृष्णमूर्तिः, ५६७७, सेइन्ट् मेरी रोड्, सिकन्दराबाद्, आ. प्र.

| | | रू. | पै. | | | रू. | पै. |
|---|---|---|---|---|---|---|---|
| १ | भजगोविन्दम् | १९५९ | ०. ५० | ९ | प्रश्नोत्तररत्नमालिका | १९६४ | १. १० |
| २ | शिवानन्दलहरी | १९६१ | ०. ७५ | १० | श्रीवेङ्कटेशसुप्रभातम् | १९६४ | १. ०० |
| ३ | दक्षिणामूर्तिस्तोत्रम् | १९६२ | ०. २५ | ११ | भर्तृहरिनीतिशतकम् | १९६५ | १. ०० |
| ४ | कनकधारास्तवः | १९६२ | ०. २५ | १२ | प्रश्नोत्तरमणिरत्नमाला | १९६५ | ०. ५० |
| ५ | लक्ष्मीनृसिंहस्तोत्रम् | १९६३ | ०. २५ | १३ | अन्नपूर्णाविश्वनाथाष्टके | १९६५ | ०. २५ |
| ६ | मुकुन्दमाला | १९६३ | ०. ५० | | | | |
| ७ | आदित्यहृदयम् | १९६३ | ०. ५० | | | | |
| ८ | जीवन्मुक्तानन्दलहरी | १९६४ | ०. ३७ | | | | |

सर्वाण्येतानि सुप्रसिद्धस्तोत्राणि, आन्ध्रलिप्यां सरलेन स्वीयाङ्ग्लानुवादेन, कानिचित् आन्ध्रानुवादेन सह उन्मुद्य श्रीमता विदुषा पि. कृष्णमूर्तिना प्रकाशितानि । तेषु ६, ७, १०, १२, संख्याङ्कितानि मुक्त्वा, शिष्टानि श्रीमज्जगद्गुरुशङ्करभगवत्पादैः विरचितानि । आन्ध्रलिपिज्ञानां, आङ्ग्लविद्यावासनावासितानां, विशेषतः तत्तत्स्तोत्रार्थबुभुत्सूनां नित्यं पारायणं कुर्वतां कृते सुतरामुपकारायैव अनुवादकस्य कृषिरेषा भविष्यति । तत्र प्रतिस्तोत्रं प्रेक्षावद्भिः प्रसिद्धिमद्भिः विद्वद्भिरुपरचितोपोद्घातवचनैः भूषितम् । श्रीमतः कृष्णमूर्तेरनुवादः सुलभः अर्थवांश्च दृश्यते । वदान्यसुहृत्साहाय्येन श्रीमान् प्रकाशयिता अनल्पमूल्यानि स्तोत्ररत्नानि अल्पमूल्येन सङ्ग्रहणयोग्यानि चकारेति परं प्रमोदस्थानम् ॥

—रा. कृ. शास्त्री

## संस्कृताध्यापनम् (The Teaching of Sanskrit)

प्राध्यापक-श्री. के. रामवर्मराजेन लिखितम् । मद्रपुरी-संस्कृतविद्यासमित्या (१४, प्राच्यमाडवीथी, मैलापूर्, मद्रास्-४) प्रकाशितम् . रू. ५.

नातिचिराद् मद्रपुर्यां श्रीकाञ्चीकामकोटिपीठाधीश्वराणां श्रीमच्छङ्कराचार्याणामनुग्रहेण प्रचालिता संस्कृतविद्यासमितिः शास्त्रशिक्षा, ग्रन्थप्रकाश-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नमित्यादिकं विविधं संस्कृतकार्यं तन्वाना दक्षिणदिशि संस्कृतरक्षायै उद्युञ्जाना वर्तते। अद्यतने लोके, पाठशालासु पाठ्यविषयेषु बहुलीभूतेषु, विरलीभूते च संस्कृतवातावरणे, सुबन्ततिङन्तनियमैः कष्टेयं भाषेति वृथापवादे च रूढप्राये सञ्जाते, संप्रदायसिद्धा शिक्षाप्रणाली एकैव सर्वत्रापि नोपयोक्तुं शक्या; तत्र तत्र सन्निवेशानुसारं सा शिक्षापद्धतिः समुचित-विपरिणामेन प्रयोज्या; भाषाध्ययने च ये ये नूतना उपाया आधुनिकैरुद्भाविताः तेऽपि यथोपयोगं स्वीकार्याः। सर्वथा यथा संस्कृताध्ययनं न कठिनं स्यात्, यथा च तत्र रुचिरेधेत तथा यद्यत्कर्तुं शक्यते, तत्सर्वं संस्कृतप्रचारोत्सुकैः कार्यमेव।

एतत्सर्वमालोच्यैव ग्रन्थोऽयं संपादितो ग्रन्थकृता, प्रकाशितश्च संस्कृत-विद्यासमित्या। ग्रन्थकृच्चायं संप्रदायरीत्या आधुनिकमार्गेण च पठित्वा संस्कृतं, तदध्यापने कृतश्रमः लब्धानुभवः, आधुनिकशिक्षाप्रक्रियोत्तीर्णश्च। १४-अध्यायेषु अत्र विचारिता विषयाः—संस्कृतमुख्यत्वम्; संस्कृताध्यापनम्; प्राचीननवीनमार्गौ; पाठ्यविषयाः; पठनकालक्रमादिकम्; पाठपर्यवेक्षणम्; संस्कृताक्षराणां स्वरूपमुच्चारणं च; पठनम्; शब्दराशिसमार्जनम्; विषयोपन्यासः; सन्दर्भविरचनम्; माणवकलेखानां शोधनम्; अनुवादः; हस्तलेखः; शब्दानामक्षरशो ज्ञानम्; साहित्यम्; तद्विभागाः; गद्यपद्यादीना-मध्यापनम्; तत्पाठे रसोत्पादनम्; व्याकरणम्; तदध्यापनस्य समुचितं स्थानम्; पाठ्यपुस्तकानि, पुस्तकालयश्च; परीक्षाः, लिखितपरीक्षाः, मौखिकपरीक्षाश्च; अध्यापकगुणाः।

ग्रन्थस्य कर्ता प्रकाशयितारश्च धन्यवादार्हाः॥ —वे. रा.

## गीतजवाहरम्

रामकिशोरमिश्रेण कृतम्। ग्रामोदयप्रकाशनमन्दिरम्, आर्यनगरम् पो. मोरपुरखास्, जि० अलीगढ्, उ. प्र. रू. १-५०.

## शान्तिदूतस्मरणिका

प्रबोधकुमारकृता। शरपड़ा-शारदासदनम्, पो० अ० खण्डसाही, जि० कटक्. ६० न. पै.

कीर्तिशेषाणां स्वतन्त्रभारतप्रथममन्त्रिसभानेतॄणां तिरोभावेन भारतस्य यः शोकः, लोकस्य यः क्षेमभङ्गः, शास्त्रेश्च यः प्रत्यादेशः सर्वमिदं

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सार्वत्रिकं दौर्भाग्यं दुःखमये खण्डकाव्यद्वयेऽत्र प्रतिपादितम्। नेतृमुख्यस्यास्य गुणान्तराणि, मेधा, लेखशक्तिः, शिशुप्रियता इत्यादिकान्यपि वर्णितानि ॥

—वे. रा.

## भारतवैजयन्ती, यात्रा च

ए. वि. कृष्णवारियर्-अभिधेन कृते। गीता प्रेस्, तिरिशूर्, केरलम्।

प्रथमे प्रबन्धे ३४-पद्येषु भारतराष्ट्रीयध्वजपटः विविधमुल्लिख्य वर्णितः। विशिष्य तस्य अहिंसादिधर्मसन्देशव्यञ्जकता श्लोकेषु प्रतिपादिता। द्वितीये प्रबन्धे कविना हिमवत्पादपर्यन्तं तत्तत्प्रदेशदिदृक्षया या यात्रा कृता, तस्यां दृष्टाः विविधा विषया वर्णिताः। स्वतन्त्रभारतेन उपक्रान्ता वारिसेतुबन्धादिका उद्यमाः, चण्डीगर्- देहलीप्रभृतयो राजधान्यः अमृतसरः-स्थ-सिख-मतीयानां सौवर्णमन्दिरमित्यादयो वर्णिताः। तत्र तत्र दृष्टानां तत्तत्स्थल-विशेषाणां फोटोचित्राणि च योजितानि ॥

—वे. रा.

## केनोपनिषद्

डा० सीतानाथगोस्वामिना सविवरणं संपादिता। संस्कृतपुस्तकभण्डार्, ३८, कार्ण्वालिस् स्ट्रीट्, कल्कत्ता-६. रू. ५-५०.

यादवपुरविश्वविद्यालये संस्कृताध्यापकेन प्राचीनाधुनिकोभयरीत्या संस्कृत-मधीतवता ग्रन्थकृतात्र केनोपनिषद् आङ्ग्ल-संस्कृतविवरणसहिता टिप्पीसमृद्धा प्रदत्ता। छात्राणामन्येषां च बहूपयुक्ता स्यात्। शङ्करभाष्यमद्वैतप्रक्रिया च व्याख्यानेऽनुसृता। अन्ते वङ्गानुवादोऽपि योजितः।

—वे. रा.

## महालक्ष्मीस्तुतिमाला

प्राप्तिस्थानम्: सि. मुत्तुकुमारस्वामि मुदलियार्, चेय्यूर्, मधुरान्तकम् तालूका, मद्रास्।

अस्मिन् भक्तिभावप्रेरिते सङ्कलने इमा महालक्ष्मीविषयिकाः स्तुतयः प्रकाशिताः—महालक्ष्मीनामचतुर्विंशत्युत्तरत्रिशती, तस्याः त्रिशतीनामस्तोत्रम्, मन्त्रनामावली-पूजाक्रमसहिता, देव्या द्वादशनामस्तोत्रं च। सर्वमिदं देवनागरीलिप्यां द्रमिडलिप्यां च मुद्रितं भक्तेभ्यो महत उपकाराय भवेत्।

—वे. रा.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## श्रीसुन्दरविनायकनित्योत्सवपद्धतिः, देवतापञ्चकस्तुतिश्च

महाकविश्रीसुन्दरेशशर्मप्रणीते । प्रणेता, पश्चिमप्रधानवीथी, तञ्जावूर्, मद्रास् ।

भाणनाटकादिकर्ता श्रीसुन्दरेशशर्मा चिरादुपासनामार्गप्रविष्टः विशिष्य गणेशसाधनासक्तः । रचिताश्च कतिचित्तेन गणपतिसपर्याविषयका ग्रन्थाः । अस्मिन् पुस्तके विनायकसुप्रभातस्तोत्रम्, तन्मन्त्रमालास्तुतिः, तद्विषयकाणि गीतानि च प्रकाशितानि । द्वितीये भागे, कविनानेन रचिताः बालापरमेश्वरी-भुवनेश्वरी-त्रिपुरसुन्दरी-महिषासुरमर्दनी-मातङ्गीतिदेवीमूर्तीनां स्तुतयो दत्ताः । अन्ते च तन्त्रप्रशंसापराः श्लोकाश्च । —वे. रा.

## श्रीशास्तुः सुप्रभातम्, श्रीहरिहरपुत्राक्षरमाला

रचयिता—श्रीस्वामिशास्त्री, ३१३, टङ्कशालावीथी, मद्रास्-१ । न. पै. २५.

गाणपतादिमन्त्राध्वनिष्णाता एते दीक्षया अनन्तानन्दनाथाभिधानाः श्रीस्वामिशास्त्रिणः स्तोत्रद्वयमत्र शास्तृविषयकं भक्तानां पुरत उपहृतवन्तः । यद्यपि हरिहरपुत्रः पुराणेषु श्रुतः, तथापि तस्यालयाः, उपासना च दक्षिण-भारते, विशिष्य केरल एवाद्य दृश्यन्ते । पुस्तकाच्चास्मात् शास्तृभक्तिमार्गस्य परिचयो भविता भारते प्रान्तान्तरवासिनां पण्डितानाम् । —वे. रा.

## उदाहरणानि

कर्ता-श्रीभाष्यं विजयसारथिः, श्रीविश्वेश्वरसंस्कृतान्ध्रकलाशाला, वरंगल्, आन्ध्रप्रदेशः । रू. १.

प्रणेत्रानेन उपत्रिंशत् संस्कृतकृतयो गद्यपद्यरूपकात्मिका विरचिताः । तत्र बह्वयः स्तुतयः । प्रकृता कृतिश्च तादृश्येव, किन्तु तत्रास्ति कश्चन विशेषः । अर्वाचीनालङ्कारग्रन्थान् विशिष्य आन्ध्रदेशे विरचितान् प्रतापरुद्रीयादीनालोकितवतां परिचितमिदं स्यात् यद्बहवः क्षुद्रप्रबन्धविशेषाः राज्ञां देवतानां च प्रशस्तिरूपाः तत्र वर्णिता इति । तेष्वन्यतमोऽयमुदाहरणाख्यः, यत्र सप्तविभक्तिषु यतिप्रासालङ्कृताः पृथग्भागाः देश्यच्छन्दोबद्धाः मनाक् मालिनी-शार्दूलविक्रीडितादिप्रसिद्धसंस्कृतछन्दोनिवेशाश्च गुम्फिताः । यथा लक्षणं, तथा लक्ष्यं च भूयसा आन्ध्रदेशकविष्वेव दृष्टं, तैरेव चोदाहरणादीनि आन्ध्र्यां संस्कृते च रचितानि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रस्तुते पुस्तके कविना विजयसारथिना त्रीणि उदाहरणानि संस्कृते विरच्य समर्पितानि, येषां स्तुतिविषयाः श्रीवेङ्कटेश्वरः, श्रीरामचन्द्रः, श्रीरामानुजाचार्यश्च। आन्ध्राद् बहिर्ये संस्कृतज्ञाः कवयश्च तेषामेतत्पुस्तकद्वारा प्रादेशिकस्य खण्डकाव्यविशेषस्यास्य शैल्यादिकं सुज्ञं भविष्यतीति सर्वथाभिनन्द्योद्यमोऽयं कविः। —वे. रा.

## सारस्वतशतकम् (चित्रकाव्यम्) सटीकं सभूमिकं च

रचयिता-श्रीश्रीजीवन्यायतीर्थः, संस्कृतकलाशालाध्यक्षः, भट्टपल्ली। प्रकाशस्थानम् : कलकत्ता विश्वविद्यालयः। रू. २०.

संस्कृतप्रतिभावाचकानां काव्यस्यास्य कर्ता सुतरां परिचित एव। अनेन कृतानि बहूनि प्रहसनादीनि लघुरूपकाणि प्रतिभायां प्रकाशितानि। आधुनिकसंस्कृतकविषु मुख्यं स्थानं वहत्येषः। प्राचीनभाषाशैल्या आधुनिकवस्तुयोजनेन शुद्धया सरलया च भाषया शोभतेतमामस्य कविता। यद्यपि रूपक एव प्रायोऽनेन परिश्रान्तं तथापि मार्गान्तरेष्वपि पाटवमस्य विद्यते, यद्यपि प्रायः सरलसुन्दररीत्यैवैष लिखति, तथापि कठिने चित्रमार्गेऽप्ययमश्रान्तमतिरिति प्रकटयति व्यवसाय एषोऽस्य प्रत्यग्रः सारस्वतशतकं नाम। अत्र सरस्वतीस्तोत्ररूपेण अष्टोत्तरशतं विविधैर्वृत्तैः श्लोका निबद्धाः। अर्थतः सरला एवैते, किन्तु एकैकः श्लोकोऽत्र चित्रबन्धे कस्मिंश्चिन्निबद्धः। भारविमारभ्य चित्रबन्धकविता परिचितैव। बहुष्वलङ्कारग्रन्थेषु चास्या बहवो भेदा वर्णिताः। प्रसिद्धानप्रसिद्धांश्च भेदानादाय रचितेऽस्मिन् शतके श्रीजीवन्यायतीर्थैः महता कौशलेन परिश्रमेण च अपूर्वा अनेके बन्धाः प्रदर्शिताः। ६६-बन्धाः चित्रैः व्याख्यया च विशदीकृताः कौतुकमावहन्ति। आमुखे चित्रकवितायाः संस्कृतसाहित्ये क्रमिकं विकासमधिकृत्य आङ्ग्ल-वङ्ग-वाणीभ्यामुपन्यासोऽपि ग्रन्थकृतैव दत्तः। —वे. रा.

## कवितोदयचन्द्रिका

कर्ता डा० गिडुगु वे. सीतापतिः। विशाला पब्लिकेषन्स्, हैदराबाद्-४, आ. प्र.। रू. २.

कर्तासौ तेलुगुसाहित्यगोष्ठीषु प्रसिद्धः। तस्य संस्कृतभाषायां पाटवं नूतनरचनाकौतुकिता च श्लाघनीये। इदंप्रथमतया तस्य संस्कृते कस्यापि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रसिद्धस्य आधुनिकस्य आन्ध्रकवेः किमपि साहित्यं "स्वर्णपुत्तली पूर्णाम्बा" इति ख्यातम् अनूद्य अस्यां प्रतिभायामेव पूर्वं प्रकाशितम् । एवमेव बहु तेलुगुसाहित्यात् तेन तदा तदा संस्कृते अनूदितम्, स्वतन्त्रतया च संस्कृत एव कानिचन लघूनि विरचनानि च कृतानि । तदेतत्सर्वमत्र सङ्कलय्य मुद्रितं रसिकानां प्रमोदाय भवति । विशिष्यान्तिमे भागेऽत्र यानि क्षेत्रज्ञनाम्नां तेलुगुवाग्गेयकाराणां प्रसिद्धानि तेलुगुपदानि शृङ्गारनायिकानायकभेद-निदर्शनरूपाणि, तेषां संस्कृतानुवादाः प्रशंसामर्हन्ति । —वे. रा.

## कृष्णाभ्युदयं नाम प्रेक्षणकम्

श्रीलोकनाथभट्टप्रणीतम् । श्रीनरेन्द्रशर्मणा संपादितम् । प्रकाशकः— प्रो. जगदीशलाल शास्त्री, प्रेमनगरं, जबलपुर्, म. प्र । रू. ३.

इदमेकाङ्कं प्रेक्षणकं द्रमिडदेशे काञ्चीनगर्यां कविशेखरश्रीवरदार्य-तनूभवेन श्रीलोकनाथभट्टेन विरचितम् । भगवतः श्रीकृष्णस्य जन्म विषयीकरोति । अत्र नूतनतया कविना योजितोंऽशः विश्ववेदिन्याख्या हस्तरेखावाचिका भाग्यलक्षणवेदिनी, या गर्भालसां देवकीं कंसहिंसाभीरुमाश्वासयति भाविमङ्गल-कथनेन । प्रेक्षणकलक्षणं तु अत्र यथाकथञ्चिद्योजनीयम्; अथवा प्रेक्षणीयं नाम भेदान्तरविलक्षणत्वे सति प्रेक्ष्यसामान्यलक्षणवत्त्वं यस्येति समर्थनीयम् । संपादयित्रा हिन्दी-अनुवादः, भूमिका, प्राकृतशब्दकोशश्च योजिताः । मातृकायां तत्र तत्र पंक्तिलोपा वर्तन्ते । २१-पृष्ठे 'प्रेक्षामः' इति छाया दत्ता; 'प्रेक्षामहे' इत्यत्र भाव्यम् । —वे. रा.

## श्रीरामराज्यं जननायकम्

लेखकः— वि. एस्. रङ्गनाथाचार्यः, १७/१, जानकीरामपिल्लै वीथी, पश्चिम-माम्बलम्, मद्रास् ३३

नेदं वाचोयुक्तिरूपेणोक्तम्; स्वगुणैरावर्जितजनस्य तपस्विजनरक्षार्थ-मरण्यं गतवतः, जनवाक्येन देवीपरित्यागमपि सोढवतः, मर्त्यशिक्षणार्थं गृहीतावतारस्य श्रीरामचन्द्रस्य राज्यं फलेन जनतन्त्रराज्यमेवेति उपन्यस्तमत्र । —वे. रा.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## आपाशास्त्री-साहित्यसमीक्षा

निबन्धकः—अशोकः अकलूजकरः, फर्गुसन् महाविद्यालयः, पुण्यपत्तनम् ४. शारदापत्रिकायाः विशिष्टग्रन्थमाला ।

आधुनिकसंस्कृतप्रणयी को वा न जानाति श्रीमन्तं राशिवडेकर-आपाशास्त्रिमहोदयम्, येन संस्कृतचन्द्रिका-सूनृतवाणीपत्रिकाद्वारा बहुमुखं बहुगुणं नूतनं संस्कृतवाङ्मयमसृज्यत, गद्यं, पद्यम्, अनुवादाः, चर्चाः, लेखाः, आधुनिकविज्ञानविषयोपन्यासाश्च । विवृता च लेखेषु सरलसुभगा संस्कृतशैली । तेषां संस्कृतवरिवस्यामधिकृत्य प्रवृत्तोऽयं निबन्धः, आयुष्मता अशोक-अकलूजकरेण लिखितः । लेखकोऽयं, तदीयगद्यबन्धगुणश्च प्रतिभा-वाचकैरनुभूतचर एव । समीक्षात्मकं कार्यमस्मिन् पुस्तके सम्यङ् निर्वर्तितम् ।

—वे. रा.

## मलमासनिर्णयः साटिप्पणः

कर्ता-श्रीदरबारी झा । प्रकाशिका-श्रीमती कमलादेवीजी व्यास, वेतिया. हिन्दुस्तान् प्रकाशन् वेतिया, चम्पारण्, विहार् । रू. २. ५०

ग्रन्थस्यास्य प्रणेता ज्योतिषे साहित्ये च निष्णातः, संस्कृतोच्च-विद्यालयाचार्यः । ज्योतिषेऽनेन पूर्वं प्रकाशिता ग्रन्थाः गोलपरिभाषा ज्याक्षेत्र-विचारसहिता, लघुचन्द्रिकोत्तरार्धम, प्रश्नभूषणं च । अप्रकाशिताश्चान्ये त्रयो ग्रन्थाः सन्ति । प्रकृतग्रन्थस्य विषयः क्षयमासाधिकमासयोः क्लेशबहुलो गणना-प्रकारः, यन्निर्णयाधीनं श्राद्धव्रताद्यनुष्ठानं भवति । अत्र बहूनां पूर्वाचार्याणां निबन्धकर्तॄणां स्मृतिव्याख्यातॄणां च मतान्यालोड्य क्वचित् खण्डयित्वा स्वमतं स्थापितं ग्रन्थकृता । सौरचान्द्रभेदेन मानं, माससंज्ञायां मानं, अधिमासक्षयमासयोर्लक्षणं, साधनं च, तत्प्रयुक्तश्राद्धव्रताद्यनुष्ठानमित्येते विषया अत्र प्रमाणपुरस्सरं विचारिताः ।

—वे. रा.

## विचारत्रयी

श्रीसोमसुन्दरदीक्षितः, नूरणिग्रामः, पाल्घाट्, केरलम् ।

अत्र प्रथमो विचारः मन्त्रप्रश्ने क्वचित्पाठभेदं परामृशति । 'सखा सप्तपदा भव' इत्यादौ वैवाहिके मन्त्रे 'सखायौ बभूव', 'सखायौ अभूव' इति पाठभेदौ संप्रदायतः व्याकरणतश्च परीक्षितौ; प्रसङ्गात्स्थलान्तरेषु मन्त्रेषु दृश्यमानाः पाठभेदाश्चोदाहृताः । द्वितीयो विचारः तैत्तिरीयब्राह्मणे

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सायनभाष्ये स्थलमेकं परीक्षते । तथा तृतीयश्च अच्छिद्रकाण्डे स्थलमेकम् । अनयोर्विचारयोः श्रीदीक्षितानां श्रौते या प्रतिष्ठा सा विशदीभवति ।

—वे. रा.

सूत्रार्थः

पि. एस्. सुब्बरामभट्टः, गीतामुद्रणालयः, त्रिशूर्, केरलम् ।

श्रीसुब्बरामभट्टानां गद्यलेखाः प्रतिभायामनेकशः प्रकाशिताः । तेषां संस्कारशुद्धा शैली तत्र स्पष्टैव । अस्मिन् लघुनि क्रोडपत्रप्राये स्वव्याकरण-वैदुषीं विवृण्वानैरेतैः 'लः कर्मणि च भावे चाकर्मकेभ्यः', इतीदं सूत्रं सोदाहरणं प्रामाणिकव्याख्यातृमतोदाहरणपूर्वमत्र खण्डत्रयेण विचारितम् ।

—वे. रा.

सुसंहतभारतम्

लेखकः—पुल्लेल रामचन्द्रुडु, आर्ट्स्-सैन्स् कालेज्, वरङ्गल्, आन्ध्रप्रदेशः । प्रकाशिका-संस्कृतपरिषद्, विश्वविद्यालयः, सागर्, म. प्र.

समीचीनतया सन्दृब्धमिदं नाटकं प्रमोदमावहति । भारतस्य स्वातन्त्र्य-प्राप्त्यर्थमुद्यमः, तत्प्राप्तिः, देशस्य विभागः, नेहरूमहाशयं पुरस्कृत्य स्वतन्त्र-भारतशासनसंविधानं, पाकिस्तानोदयानन्तरं तत्रत्यहिन्दुसमुदायेनानुभूताः क्लेशाः इत्यादि चरित्रमा-'गोवा'-वृत्तान्तमत्र रूपकस्य वस्तुत्वेन उपात्तम् । चर्चिल्, आङ्ग्लेयराज्यप्रतिनिधिः, देशीयराजप्रतिनिधिभूतौ द्वौ-एको हिन्दुराजः, अन्यो मुस्लींराजः, यौ स्वातन्त्र्यादनन्तरं राज्यपालस्थानं प्रापितौ, गान्धी, सुभास्बोस्, नेहरू, अन्ते डा० राधाकृष्णन् इत्येतेऽत्र पात्रीकृताः । अधः तत्तद्वृत्तान्तप्रमाणत्वेन चारित्रका विषयाः तत्तद्ग्रन्थेभ्यः आङ्ग्लवाक्यै-रुदाहृताः । भूतपूर्वमहाराज-नवाब्व्यक्तयोश्चित्रणे हास्यरसोऽपि योजितः । गर्भाङ्कप्रक्रिया च सुष्ठु स्वीकृता । भारतस्य सुसंहतत्वसंपादनं, पञ्चशीलोद्घोषः इदमुभयं फलत्वेन निर्वहणसन्धौ सूत्रितं रूपकस्य अनुस्यूतां विशिष्टां गतिं देशभक्तानां सहृदयानां पुरत उपस्थापयति । अन्ते गर्भाङ्के महाराज-अशोकस्य प्रवेशः, कलिङ्गयुद्धव्यतिकरेण तदाघोषितः समरसन्न्यासः, वर्ण-भाषा-मतभेदभिन्नजनताः प्रति सामरस्यभावना, नेहरू-राधाकृष्णाभ्यां तदामोदनं च रूपकस्य किमपि परिणामरमणीयत्वमापादयन्ति । सर्वथा प्रशंसार्होऽयं रामचन्द्रार्यस्य परिश्रमः, आशास्महे रङ्गे प्रयुज्य रूपकस्यास्य साफल्यं संपादयिष्यति कविरिति ।

—वे. रा.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## मुकुन्दकोषः-लिङ्गानुशासनवर्गः ।

प्रणेता मुकुन्दशर्मा । प्राप्तिस्थानम्: मुकुन्दशर्मा, मुकुन्दाश्रमः, ज्योतिस्तत्त्वकार्यालयः, पोस्ट् औफीस् अमोल्, गढ़वाल्, उ. प्र. । मू. रू. १२.

अस्य समग्रस्य ग्रन्थस्य मुकुन्दकोष इति नाम । तत्र च पञ्चोत्तर-शताधिकतमभागोऽयम् । संस्कृतभाषायां स्त्रीलिङ्ग-पुंलिङ्ग-नपुंसकलिङ्गभेदात् त्रीण्येव लिङ्गानि । तेषु अवान्तरविभागस्य विद्यमानत्वात् तान्येव अष्टधा विभक्तानि । पुं, स्त्री, नपुंसक, पुंस्त्री, पुन्नपुंसक, स्त्रीनपुंसक, त्रि, अभिधेयवत्-लिङ्गानि इति क्रमेण । तत्र पुंलिङ्गे प्राचीनैः अमरसिंह-यादवादिभिः प्रदर्शितया रीत्या तेषामेव श्लोकान् प्रदर्श्य विपुलां च व्याख्यां निर्माय तत्सारसङ्ग्रहभूतं स्वकीयं पद्यं संख्याङ्कितं च कृत्वा तस्यापि व्याख्यां विपुलां निर्माय एवं रीत्या निर्व्यूढोऽयं ग्रन्थः । तत्रतत्रावश्यकस्थले टिप्पणी च संयोजिता । अत्र च पुंलिङ्गानुशासने (१७) सप्तदश श्लोकाः स्त्रीलिङ्गानुशासने (३३) त्रयस्त्रिंशच्छ्लोकाः । नपुंसकलिङ्गानुशासने (२४) चतुर्विंशतिश्लोकाः । पुंस्त्रीलिङ्गानुशासने (१२) द्वादश श्लोकाः । पुन्नपुंसकलिङ्गानुशासने (३६) षट्त्रिंशच्छ्लोकाः । स्त्रीनपुंमकलिङ्गानुशासने (६) षट् श्लोकाः । त्रिलिङ्गानुशासने (६) षट् श्लोकाः । अभिधेयवल्लिङ्गानुशासने (१) एकः । एवं रीत्या परिष्कृतेऽपि लिङ्गानुसनपरिशिष्टमिति यादवादीनां श्लोकानुदाहृत्य सव्याख्यं स्वीयं च पद्यत्रयं निर्माय अन्ते श्लोकद्वयेन स्वग्राम-नामादिग्रन्थावतरणकालनिर्देशपूर्वकं ग्रन्थोपसंहारश्च कृतः । अत्र उद्धृतानां प्राचीनग्रन्थानां नाम-प्रकाशनस्थानादिनिर्देशपूर्वकं सूचीपत्रमपि दत्तम् । एवं विस्तृत्य कृतलिङ्गनिर्देशानां पदानां कस्य पदस्य किं लिङ्गमिति गवेषणे संप्रवृत्ते तत्सौकर्यापादनार्थम् अकारादिक्रमेण सर्वेषामपि पदानाम् अनुक्रमणिका च संकलिता मुद्रिता च । एवं टिप्पणीस्थशब्दानामपि अनुक्रमणिका संयोजिता । मुद्रणसमये प्रमादादिना आपतितानां दोषाणां समीकरणार्थं शुद्धिपत्रं चायोजितम् ।

इदंपुस्तकमुद्रणं राजकीयपदाधिकृतानां बहूनां महाशयानाम् अन्येषां च संमाननेन राजकीयद्रव्यसाहाय्येन च निर्व्यूढमिति ग्रन्थकर्तुरेव कृतज्ञता-प्रदर्शनेन परिज्ञायते । अस्य भागस्यान्यतमत्वात् इतः पूर्वं परं च विद्यमानाः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

षडधिकशतसंख्याका भागा अपि क्रमेण तेषामेव महाशयानां प्रोत्साहनेन राजकीयद्रव्यसाहाय्येन च मुद्रिताः प्रकाशिताश्च भूयासुरिति पण्डितलोकस्य सर्वस्याप्याशंसा । —अ. मु. श्री.

सन्ध्या

लघुप्रेक्षणकम् । अनुवादकः—श्रीकृष्णशर्मा । मूलग्रन्थस्य कर्ता-'जि' शङ्करकुरुप् 'भद्रालयम्', एरणाकुलम्-१, केरलम् । १९६५. रू. १.

तिरुप्पति-श्रीवेङ्कटेश्वरविश्वविद्यालये संस्कृताध्यक्षपदमधिष्ठितेन श्रीकृष्णशर्मणा केरलभाषातः संस्कृतभाषयानूदितमिदं लघुप्रेक्षणकं नैसर्गिकप्रतिभाविलासेन रसभावपरिस्फूर्त्या च सहृदयहृदयं सम्यगाह्लादयति । अस्य मूलग्रन्थस्य रचयिता वर्तमानकेरलभाषाकविष्वग्रगण्यः श्रीशङ्करकुरुप्-नामा महाकविः, यः 'जि' इत्येकाक्षरेण केरलेषु सुविदितः, यस्य च विश्वदर्शनाभिधानः काव्यसमाहारः १९६३ तमे वर्षे साहित्य-अकादमीद्वारा भारतराष्ट्रपतेः बहुमानमुद्रायाः पात्रमभूत् । दुःखपर्यवसायिनि त्रिदृश्यकेऽत्र प्रेक्षणके नूतनां 'सिंबालिक्'-रीतिमाश्रित्य प्रकृतिप्रतिभासवर्णनद्वारा अहल्याशापकथा सूचिता व्याख्याता च । सर्गकर्तुरजस्य संकल्पनन्दिनी विश्वसौन्दर्यदेवता 'अनुरागवती सन्ध्या'त्र नायिका, या पित्रोग्रतेजसो दिवसस्य सहधर्मचारिणीपदं ग्राहिता । रजःप्रकृतिराकाशस्तस्याः कामुकः । तस्य दूती च तारका ।

"अधर्म्या निर्यन्त्रणा च भोगलालसा उपभोक्तुर्वैरूप्ये अनन्तदुःखे च पर्यवस्यति । इदमेव तत्त्वं रजःप्रकृतेः कामुकस्याकाशस्य तेन प्रसारिते कामपाशे सहजया भोगवासनया स्वयमुपनिबद्धायाः सन्ध्यायाश्च तमःप्राप्तिरूपपरिणामः प्रख्यापयति ।"

यद्यप्यनुवादग्रन्थोऽयं, तथापि स्वतन्त्रग्रन्थ इव निसर्गसुन्दरेण शैलीविशेषेण भावुकहृदयसंवादभाग्भवति । —के. कु. रा.

कृदन्तरूपमाला

मद्रपुरी-संस्कृतविद्यासमितेः उच्चशास्त्राध्यापनकक्ष्यायां प्रधानाध्यापकैः पण्डितवर्यैः श्रीमद्भिः श. रामसुब्रह्मण्यशास्त्रिभिः सन्दृब्धा । प्रथमो भागः । प्रकाशकः—श्री ति. वे. विश्वनाथार्यः, १४ पूर्वमाडवीथी, मद्रास्-४. मूल्यम् . रू. १०.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गाढावगाढव्याकारणानामपि विदुषां संस्कृतभाषया व्यवहारकाले यथेष्टं कृदन्तप्रयोगस्थलेषु क्लेशः संशयश्च अनुभवसिद्धावेव । अतः ईदृशौ क्लेशसंशयावपाकर्तुम् अनायासेन बोद्धुं प्रयोगानुगुणपरिपाट्या कृदन्तपदानाम् एकः कोशोऽवश्यं सज्जीकरणीय इति निर्धार्य मद्रपुरीयसंस्कृतविद्यासमित्या महता प्रयत्नेन इयं रूपमाला सज्जीकृत्य मुद्रयित्वा प्रकाशिता ।

कोशेऽस्मिन् प्रायः २००० धातवो विचारयिष्यन्ते । अस्मिन् प्रथमभागे २५० धातवो विचारिताः । अत्र प्रथमं धातवः ससंख्यं सगणं सेट्त्वानिट्त्वादिविशेषैः, सार्थं च निर्दिष्टाः । अर्थविषये प्रमाणश्लोकाश्च दैवाख्याद् ग्रन्थादुदाहृताः । ततः परं ण्वुल्, तृच् (तृन्), शतृ, शानच् इति क्रमेण त्रिंशत्प्रत्ययान्तानि रूपाणि दत्तानि । अपेक्षितस्थलेषु भट्टिकाव्य-धातुकाव्यादिभ्यः समर्थकान्युदाहरणानि च योजितानि । दृष्टिमात्रेण व्युत्पन्नानां व्युत्पित्सूनामन्येषां सर्वेषामेव कृदन्तज्ञानलाघवं यथा संपद्येत, तथा संपादितोऽयं कोशः ।

पुस्तकं चेदं डा० सि. पि. रामस्वाम्यार्याणां डा. वे. राघवार्याणां चामुखाभ्यां भूषितम् । संपादकाः प्रकाशकाश्च महान्तं धन्यवादमर्हन्ति । समग्रस्य पञ्चषभागात्मकस्य कृदन्तकोशस्यास्य प्राक्प्रकाशनमूल्यं रू. ५०; प्रतिभागं रू. १० । —अ. मु. श्री.

## द्युतिश्रुतिवाहिनी

कर्ता—श्रीराधाकृष्ण मुदलियार्, कर्णाटकविश्वविद्यालयः, धावार् । उषाप्रकाशन्, धारवाट, मैसूर् रू. ८.

कर्ता चतुर्षु विद्यास्थानेषु एम्. ए. परीक्षा उत्तीर्णः । पुस्तकेऽत्र स्वस्य अष्टादशभाषापरिचयं प्रदर्शयन् तासु भाषासु स्वकृतानि पद्यानि प्रकाशितवान् । उपक्रमे संस्कृतभाषायां पद्याष्टकं दत्तम् । आमुखे भारतीयानां भाषाणां प्रत्येकं चरित्रं वैशिष्ट्यं च संक्षेपेण वर्णितम् । यत् सर्वभाषामयानि कवित्वानि इमानि हिन्द्या आङ्ग्लभाषया चानूदितानि तत् मितंपचवाचां वाचकानां साह्याय भवेत् । —वे. रा.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## सांमनस्यम्

संपादकः—प्रा. ऋषिराज अग्निहोत्री से. नं. १९ ३९/५, अहमदाबाद्-१.

इदं बृहद्गुजरात-संस्कृत-परिषदः संस्कृतपत्रिका नूतनतया उपक्रान्ता। अत्र प्रथमसञ्चिकायां गद्यबन्धाः, कविताः, लघुरूपकम्, विचारात्मका लेखाः, सचित्रं संस्कृतवृत्तान्तजातम्, इत्यादिकं विविधं वस्तुप्रकाशितम्। स्वागतं ब्रूमो नवोद्गतायास्सोदर्याः, ब्रूमश्च 'वर्धस्व, चिरं जीव' इत्याशिषः।

—वे. रा.

## देवभाषा

कर्ता—नारायण कृष्ण सेन गुप्त। प्राप्तिस्थानम्: दास् सुप्त, ५४/३ कालेज् स्ट्रीट्, कल्कत्त—२०. १९६४. रू—१. २५.

कविराज रखल्दास काव्यतीर्थेन रचितस्य वंगभाषाग्रन्थस्य आङ्गालानुवादोऽयं ग्रन्थः। अत्र लघुभिः पदगुम्फैः षट्त्रिंशता पाठकदम्बकेन संस्कृतभाषाप्रवेशः सिषाधयिषितः। प्रयत्नोऽभिनन्द्यः। किन्तु बहुधा मुद्रणादिप्रमादकलुषितोऽयं ग्रन्थः परिशोध्य पुनर्मुद्रित एवोपयोगमर्हति।

## कण्टकाञ्जलिः

रचयिता-'कण्टकार्जुनः' (के. एम्. अर्जुनवाडकर)। प्राप्तिस्थानम्: क. अ. मंगरूळकरः, अश्वत्थसाहितो, 'पामीर', २०५७, सदाशिव पेठ, टिलक् रोड्, पुणें ९. रू. ५.

उपहासगर्भाः श्लोकाः बहुविषयस्पर्शिनः अत्र गुम्फिताः, आङ्ग्ल-संस्कृत-महाराष्ट्रविवरणैः सह। एषे श्लोकेषु कर्तुः न केवलं पचेलिमा संस्कृतशैली, अपि तु विडम्बनपरिहासयोः शेमुषी च व्यज्यते। रामराज्याख्यायां प्रथमपद्धतौ अद्यत्वे उपलभ्यमानस्य शासनक्रमस्य, शासितॄणां मन्त्रिणां शासकसभाङ्गभूतानां च स्वभाववैचित्र्यं व्यवहारकूटता च कवेः शरव्यतां प्रापिते। पञ्चशीलनीतिः, देशान्तराणां राज्यतन्त्रव्यवहाराः, चीनपाकिस्तानयोश्चेष्टा, जीवयात्रा, छात्रणां प्रवृत्तयः, किञ्च यो योऽद्यतनीयो व्यतिकरः, सर्वमिदं सधैर्यं सचमत्कारं चात्र विडाम्बनाशूले समारोपितम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्राचीनाः प्रसिद्धाः श्लोका विपरिवर्तिताः कर्तुः चातुर्यं प्रकाशयन्ति । 'कण्टककाथः', 'अस्माकं राष्ट्रियम्', 'स्वराज्यम्', 'आयव्ययौ', 'चन्द्रस्य कालिमा', 'गुण्डस्य कस्माद् भयम्', 'चलचित्रम्', 'धनब्रह्म', 'प्रशासनकृपा', 'संस्कृताध्येतुराकांक्षा', 'छात्रायणम्', 'विद्यार्थिरामायणम्', 'गार्हस्थ्योपनिषद्', 'चतुर्दश रत्नानि', 'गुरुलाघवम्', 'श्रद्धा', 'देवस्य शुल्कश्रेणी', 'सर्वं शून्यम्', 'ओंशान्तिः' इत्येते श्लोकाः चित्तावर्जकाः । सन्ति कानिचन पद्यानि यत्र वक्रता वा नास्ति, क्लेशो वा भाति, स्फुरति मनाक् वैरस्यं च । मध्येसंस्कृतं सुबहूनामाङ्ग्लशब्दानां च यथावदुपयोगश्च न प्रशस्तः । परन्तु भूयसा कौशलशालिन एव श्लोकाः । यात्र नूतना परिहाससरणिरुन्मीलिता तत्र प्रगल्भमानेन कविनानेन 'पाण्डित्यप्रकाशः', 'चुक्रनीतिः' इत्यन्ये विडम्बन-प्रबन्धा रचिताः शीघ्रमेब प्रकाशमेष्यन्तीति प्रतीक्षामहे ।

पुस्तकस्यास्य मुद्रणमतीव समीचीनं; चित्राणां योजनं गुणमुत्कर्षयति ।

—वे. रा.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

**Our Contributors :**

अस्यां सञ्चिकायां नूतनतया दृश्यमाना लेखकाः—

Madhava Deshpande, Student, 562, Budhwar, Poona-2.

माधव देशपाण्डे, विद्यार्थी, ५६२, बुधवार, पूणें-२.

Siva Prasad Bharadvaj 'Sastri', M.A., MO.L., Sadhu Asram, Hoshiarpur, Punjab.

शिवप्रसाद भारद्वाजः, शास्त्री, एम्. ए., एम्. ओ. एल्., साधु-आश्रमः, होशियार्पूर्, पञ्चनदप्रदेशः.

Rama Kailas Pandey, M.A. Research Scholar, Sanskrit Dept., University of Allahabad, Allahabad, U. P.

रामकैलासपाण्डेयः, एम्. ए., विमर्शविद्यार्थी, संस्कृतविभागः, प्रयागविश्वविद्यालयः, प्रयागः ।

D. D. Bahulikar, House No. 32, 'C'-Ward, Lonovla, Maharashtra.

दि. द. बहुलीकरः, ३२-'सि'-वार्ड्, लोनव्ला, महाराष्ट्रप्रदेशः.

Vidyullekha Vadh, Student, Sanskrit Dept., University of Poona.

श्रीमती विद्युल्लेखा वाध, विद्यार्थिनी, संस्कृतविभागः, विश्वविद्यालयः, पूणें.

Hari Ramachandra Diwekar, M.A., D. LITT., Sahityacharya, Jinsiwale's Wada, Huzrat, Laskar, Gwalior.

हरि रामचन्द्र दिवेकरः, एम. ए., डि. लिट्., साहित्याचार्यः, जिन्सिवाल वाड, हुस्रत्, लस्कर ग्वालियर्.

T. G. Siddhapparadhya, Reader in Sanskrit, University of Mysore, Mysore.

टि. जि. सिद्धप्पाराध्यः, संस्कृतविभागः, मैसूर्-विश्वविद्यालयः, मैसूर्.

Chandrasekhara Ramachandra Tambe, 56, Nanaghat, Mandla, M. P.

चन्द्रशेखर रामचन्द्र ताम्बे, ५६, नानाघाट्, मण्डला, मध्यप्रदेशः.

L. J. Khare, Retd. Pleader, 199, Gokul Peth, Nagpur, M. P.

एल्. जे. खरे, १९९, गोकुलपेठ्, नागपुरम्, मध्यप्रदेशः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# "संस्कृतप्रतिभा"

## अभिनन्दनानि

विद्यारत्न श्रीसातकडि मुखोपाध्यायः, काव्यव्याकरणतीर्थः, न्यायमीमांसा-वेदान्त-व्याकरणाचार्यः—

"साहित्य-अकादमीसंस्थया प्राकाश्यं प्रापितायाः संस्कृत-प्रतिभाया अवलोकनात् परिज्ञायते यत् तदीयां संपादनधुरां भवन्त एव समुद्वहन्ति ।....संस्कृतप्रतिभाया अद्ययावत् प्रकाशितानां विलासानां दर्शनाद् भवदीयं संपादननैपुण्यं रचनाचातुर्यं गैर्वाण्यां वाण्यामनुरागातिरेकं च सम्यग् विदित्वा परमानन्दसन्दोहमावहतेऽस्मदीयं चेतः ।.....तत्र संकलिता इदानींतनैर्निबन्धृभिर्निर्मिताः काव्यनाटकादिनिबन्धाः....भवदीय-संपादकीयप्रबन्धाः काव्यानुवादादयोऽपि अवधानेन परिशीलिताः। महत्खल्विदमाशास्थानं भग्नोद्यमानां संस्कृतप्रणयिनां यत्पूर्व-सूरिभिर्न्यस्तोऽमूल्यो निधिरद्यापि अविच्छिन्नसन्तानेत परिपाल्यते। अन्यच्च सुमहत् प्रशस्यं कर्म भवद्भिः क्रियमाणं पश्यामो यत् 'निकषोपले' नवीनसंस्कृतकृतीनां परीक्षणं नाम । तस्मात् वर्तमानसुरभारतीसेवकानां परिचयान् कृतीश्च वेदितुमलं भवेम ।....

'YUGANTAR' Calcutta:

"This Sanskrit Literary Magazine published by the Sahitya Akademi is rich with contributions from distinguished writers."

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

केन्द्रीय-संस्कृत-विद्यापीठम्-तिरुप्पदि

के. सं. वि. पी. ग्रन्थमाला-१

# सामविधानब्राह्मणम्

सायणाचार्यकृत–वेदार्थप्रकाशेन

भरतस्वामिकृत–पदार्थमात्रविवृत्या च

समान्वितम्

विद्यापीठनिदेशकेन
डा० वे. रामचन्द्रशर्मणा
संशोध्य संपादितम्

विद्यापीठाध्यक्षाणां
डा० वे. राघवार्याणाम्
आमुखेन सहितम्

मूल्यम् - रू. १५.

We are glad to announce the re-publication of the world famous

## Sacred Books of the East Series

in 50 volumes

Edited by F. MAX MULLER

*With the Blessings of*

Dr. S. RADHAKRISHNAN, *President of India*

★ Price Rs. 20 each volume
★ 33 volumes have been published
★ Remaining will be published by December, 1965
Catalogue sent free

*Write to*:

MOTILAL BANARSIDASS
ORIENTAL PUBLISHERS
Post Box No. 1586
DELHI-7

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# संस्कृतविद्यासमितिः, मद्रास्

## १४, प्राच्य माडवीथी, मैलापूर्, मद्रास्-४

# THE SANSKRIT EDUCATION SOCIETY (Regd.), MADRAS

## 14, East Mada Street, Mylapore, Madras-4.

श्रीकाञ्चीकामकोटिपीठशङ्कराचार्याणामनुग्रहेण सर्वपथीनं
दक्षिणप्रान्ते संस्कृतरक्षणाभिवृद्ध्यर्थं स्थापिता

Established with the blessings of His Holiness Sri Sankaracharya of Kanchi Kamakoti Peetha for the all-round preservation and promotion of Sanskrit learning in the South.

* मद्रपुरीसमीपवर्ति पेट्टै-नाम्नि स्थले प्रतिष्ठितशास्त्राध्यापनकेन्द्रे एकस्मिन् शास्त्रे उत्तीर्णानां शास्त्रान्तराध्यापनप्रक्रिया ऊरीकृता

** विविधेषु विद्यास्थानेषु, विशिष्य संस्कृतभाषाबोधनसौकर्यार्थं, ग्रन्थप्रकाशनमुपक्रान्तम्

* Post-Graduate courses in additional Sastras at the Teaching Centre at Pettai, Poonamalli, near Madras.

** Publication of Works in different branches of Sanskrit, especially aids to Sanskrit Learning.

## प्रकाशिताः ग्रन्थाः—

### १. संस्कृताध्यापनम्—

प्राध्यापक रामवर्मराजेन लिखितं, आधुनिकशिक्षाशास्त्ररीत्या संस्कृताध्यापनमनुशीलयति रू. ५

### २. कृदन्तरूपमाला

पण्डित श. रामसुब्बाशस्त्रिभिः संकलिता; २००० धातूनाम् अकारादिक्रमेण प्रतिधातु उपत्रिंशत्कृदन्तानां रूपप्रदर्शिका—प्रतिभागम् रू. १०

सर्वभागानां प्राक्प्रकाशनमूल्यम् रू. ५०

## अन्ये संपाद्यमाना ग्रन्थाः—

१. आङ्ग्लवाण्या नूतनसंस्कृतव्याकरणम्

२. अव्ययकोशः

*BOOKS PUBLISHED* :

### THE TEACHING OF SANSKRIT

By

Prof. K. RAMAVARMA RAJA

Deals with Sanskrit teaching, with the application of modern methods. **Rs. 5**

### KRIDANTARUPAMALA

By

Pandit S. Ramasubba Sastri

An Alphabetical concordance of Verbal Derivatives of about 2000 roots.

Each Pt. Rs. 10. Advance Price for all Pts. **Rs. 50.**

*Other works in preparation* :

**NEW MODEL SANSKRIT GRAMMAR**

**CONCORDANCE OF INDECLINABLES**

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# साहित्य-अकादेमी-परिषदा प्रकाशिताः संस्कृतग्रन्थाः

## कालिदासग्रन्थाः—

बहुमातृकापरिशोधनपूर्वं नूतनतया सम्पादिताः सोपोद्घाताः सटिप्पणाः

१. मेघदूतम्—सु. कु. दे.—विशिष्टं संपुटीकरणम्—
$ 1-50, 10 Sh. 6 d. Rs. 5. 00;
साधारणम्—Rs. 2-50.

२. विक्रमोर्वशीयम्—ह. दा. वेलणकरः—वि.सं. $ 3-00, 21 Sh. Rs. 8-00; सा. Rs 6.

३. कुमारसम्भवः—सूर्यकान्तः—वि.सं. $ 5-00, 37 Sh., Rs. 12-50; सा. Rs. 10. 00.

### मुद्यमाणानि अथवा सम्पाद्यमानानि

४. अभिज्ञानशाकुन्तलम्—श्री कृ. बेल्वेल्करः

५. मालविकाग्निमित्रम्—के. ए. एस्. अय्यर्

६. रघुवंशः—वे. राघवः

७. ऋतुसंहारः—पि. एम्. लाड् —वे. राघवः

## कोशावलिः—

१. पुराणेतिहाससंग्रहः—सु. कु. दे—रा. च. हस्रा—वि. सं.
$ 4-00, 25 Sh., Rs. 10-00 ; सा. Rs. 7-50.

२. बौद्धसंग्रहः—नलिनाक्षदत्तः—वि. सं. $ 4-00, 25 Sh., Rs. 10-00; सा. Rs. 7-50.

३. अभिलेखसंग्रहः—ब. च. छाब्रा
वि. सं. Rs. 8-50, सा. Rs. 7-00

### अन्यत् प्रकाशनम्

४. अशोकावदानम्—सु. कु. मुखोपाध्यायः
वि. सं. $ 8-00, 36 Sh., Rs. 18.

### मुद्यमाणा अथवा सम्पाद्यमानाः

५. वैदिकसंग्रहः—वि. ब. शास्त्री

६. काव्यनाटकसंग्रहः—१ भागः—वा. श. अग्रवालः

७. ,, २ ,, —वे. राघवः

८. जैनसंग्रहः—ही. ला. जैनः

९. सुभाषितसंग्रहः—वे. राघवः—के. ए. एस्. अय्यर्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# 'संस्कृतप्रतिभा'

वदन्ती विविधां वाचमेका भारतसाहिती ।
द्राविड्यामथ वङ्ग्यां वा भाल्येको भारतो गुणः ॥

समानं मूलमेतस्याः सम्प्रदायाः समास्तथा ।
वासनाः प्रेरका भावा बाह्या आभ्यन्तराः समाः ॥

एकैव भारती संविद् अध्यात्मगुणवासिता ।
ऐकात्म्यं नयति ह्येता विचित्रप्रसरा गिरः ॥

मधुच्छन्दा रवीन्द्रश्च बुद्धो गान्धिश्च यज्जगौ ।
तस्य भाषा मनाग् भिन्ना परिभाषा न भिद्यते ॥

देशतः कालतः प्राप्तचित्रप्रसरशालिनः ।
साहित्यस्यास्य दृश्येते बीजमैक्यं च संस्कृते ॥

अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतब्रह्म राजते ॥

मनुं व्यासं च वाल्मीकिं कालिदासं च शङ्करम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन् मतदेशिकान् ॥

उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥

धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥

सम्पादकः

वे. राघवः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha